Barcode : 99999990294534
Title - Abhidharamkosa amp Bhasya Part - IV
Author - Acharya Vasubandhu
Language - sanskrit
Pages - 192
Publication Year - 1969
Barcode EAN.UCC-13

Bauddha Bharati Series-9

ABHIDHARMAKOŚA

&

BHĀSYA

OF

ACHARYA VASUBANDHU

WITH

SPHUTĀRTHĀ COMMENTARY

OF

ĀCĀRYA YAŚOMITRA

PART IV

(VII and VIII Kośasthāna)

Critically edited by

SWAMI DWARIKADAS SHASTRI

Jaina (Vyākaraṇa, Nyāya & Bauddha Darśana)

आचार्ययशोमित्रकृत-

स्फुटार्थाव्याख्योपेतम्

आचार्यवसुबन्धुविरचितम्

स्वोपज्ञभाष्यसहितम्

अभिधर्मकोशम्

चतुर्थो भागः

(सप्तम-अष्टमकोशस्थाने)

सम्पादकः

स्वामी द्वारिकादासशास्त्री

व्याकरणपालि-साहित्य-बौद्धदर्शनाचार्यः

बौद्धभारती

७३ क्रिस्ताब्दः] वाराणसी [२५१६ बुद्धाब्दः

प्रास्ताविकम्

इदं ते, नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥

मान्या विद्वत्तल्लजाः !

इदं खलु विमृशतामस्माकं मानसं भृशमुल्लासमासादयति यद् वयं वौद्धभारतीस्थापनातः पष्ठेऽस्मिन् वर्षे इदं महत्त्वशालि, अभिधर्मशास्त्रस्य मुकुटालङ्कारभूतम् आचार्यवसुवन्धुविरचित्तं सभाष्यम् अभिधर्मकोशाख्यं ग्रन्थरत्नं यशोमित्रकृतस्फुटार्थाव्याख्यासहितं सप्तमाष्टमकोशस्थानात्मकं श्रीमतां करारविन्देषु समुपाहरामः ।

सर्वैरपि दार्शनिकैर्विदितचरमेवेदं यत् प्रतीत्यसमुत्पादसिद्धान्तो वौद्धदर्शनस्य मूलम् । सिद्धान्तस्यास्य सुखावबोधाय भगवता भिक्षूणां कृतेऽभिधर्मशास्त्रं वहुधा वह्वीभिर्वाचोयुक्तिभिरुपदिष्टम् ।

परन्तु गच्छता कालेनेमा भगवतोऽभिधर्मदेशनाः सारवत्योऽपि अल्पाक्षरत्वात्, असन्दिग्धा अपि विश्वतोमुखत्वात् मध्यमधियां मन्दधियां वा जिज्ञासूनां कृते दुरवगाहा जाताः । ताँस्तादृशान् जिज्ञासूनवलोक्य करुणैकहृदय आचार्यो वसुवन्धुस्तदभिधर्मशास्त्रं काभिश्चिद्पूर्वाभिः कारिकाभिः स्वोपज्ञभाष्यसहितेन अभिधर्मकोशनाम्ना ग्रन्थरत्नेनैवं व्याख्यातवान्, यथा ते तादृशा अपि कियतैवायासेन दुरधिगममेच्छास्त्रमधिगच्छेयुः ।

ततोऽप्यवरस्मिन् काले भाष्यस्यास्य गूढाशयतया तत्रत्यानाम्युपगमवादानां सिद्धान्तानां च दुरववोधतया मन्दमतीनामभीष्टसिद्धावन्तरायमवलोक्य आचार्ययशोमित्रेणात्र स्फुटार्थाभिधा व्याख्या रचिता । अस्यां व्याख्यायां वसुवन्धुविरचिताः सर्वा अपि कारिकाः प्रत्यक्षरं प्रतिपदं च वादिप्रतिवादिमतवैचित्र्यप्रदर्शनपुरस्सरं भाष्यसहिता व्याख्याताः । एवं च जातः सरलः पन्थाः सर्वेषामभिधर्मशास्त्रजिज्ञासूनां कृते ।

विषयक्रमः

स्फुटार्थसहितस्यास्य वासुबन्धवकर्मणः ।
अन्त्ययोः कोशयोरेवं ज्ञेयोऽयं विषयक्रमः ।।

सप्तमं कोशस्थानम् १०३३-११२४
(ज्ञाननिर्देशः)
नामलाः क्षान्तयो ज्ञानम् १०३३
क्षयानुत्पादधीर्न दृक् १०३४
लौकिकी प्रज्ञा ज्ञानम् १०३४
दशभिर्ज्ञानैः सर्वज्ञानसंग्रहः १०३५-१०४२
सप्तभिः कारणैः दश ज्ञानानि व्यवस्थाप्यन्ते १०४२-१०४४
दशानां ज्ञानानामाकार-वर्णनम् १०४५-१०६१
आकारो नाम क एष धर्मः ? १०६२
ज्ञानानां कुशलादिभेदः १०६३
स्मृत्युपस्थानसंग्रहः १०६४
कतमस्य ज्ञानस्य कति ज्ञानान्यालम्बनम् ? १०६५-१०६७
कः कतिभिर्ज्ञानैः समन्वागतः ? १०६७-१०६८
कस्यामवस्थायां कति ज्ञानानि भाव्यन्ते ? १०६८-१०७८
कस्मिन् मार्गे कतिभूमिकं ज्ञानं भाव्यते ? १०७८-१०८१
चतुर्विधा भावना १०८१-१०८२
अष्टादश आवेणिका बुद्धधर्माः १०८३-१०९९
दश बलानि १०८३-१०९०
चत्वारि वैशारद्यानि १०९०-१०९२
तीणि स्मृत्युपस्थानानि १०९२-१०९३
महाकरुणा १०९३-१०९९
अन्ये धर्माः शिष्यसाधारणाः १०९९-११०६
अभिज्ञावर्णनम् ११०६-१११५
ऋद्धिवर्णनम् ११११५-११२४
निर्माणचित्तानि ११११६-११२१
दिव्यश्रोत्रं चक्षुश्च ११२१-११२४
अष्टमं कोशस्थानम् ११२५-१२३२
(समापत्तिनिर्देशः)
ध्यानानि द्विधा ११२५
(उपपत्ति-समापत्तिभेदात्)
समापत्तिवर्णनम् ११२६-११३८
केयमेकाग्रता ? ११२६
ध्यानमिति कोऽर्थः ? ११२७-११२९
आरूप्यवर्णनम् ११३०-११३७
आकाशानन्त्यायतना-दीनामालम्बनम् ११३७-११३८
अष्टविधस्यापि समापत्ति-द्रव्यस्य आस्वादनासम्प्र-युक्तादिभेदेन वर्णनम् ११३९-११५१
शुद्धकादीनां कयं लाभः ? ११५१-११५८
केनाध्वनेह कति ध्यानारूप्याः सम्मुखीक्रियन्ते ? ११५८
ध्यानारूप्याणां किमा-लम्बनम् ? ११५९-११६०
सामन्तकचित्तवर्णनम् ११६०-११६३
समाधिवर्णनम् ११६३-११६९

अभिधर्मकोशम्

भाष्यस्फुटार्थासहितम्

❀ नमो बुद्धाय ❀

सप्तमं कोशस्थानम्

(ज्ञाननिर्देशः)

क्षान्तयश्चोच्यन्ते,[1] ज्ञानानि च, सम्यग्दृष्टिः, सम्यग्ज्ञानं च ।
किं पुनः क्षान्तयो न ज्ञानम्, सम्यग्ज्ञानं च न दृष्टिः ?

नामला क्षान्तयो ज्ञानम्,

तत्प्रहेयस्य विचिकित्सानुशयस्याप्रहीणत्वात् । दृष्टयस्तु ताः; सन्तीरणात्मकत्वात् ।

स्फुटार्थव्याख्यायां

सप्तमं कोशस्थानम्

पष्ठात् कोशस्थानादनन्तरं सप्तमस्योपन्यासे सम्बन्धं दर्शयन्नाह—क्षान्तयश्चोच्यन्ते, ज्ञानानि चेति विस्तरः ।

"लौकिकेऽग्र्यो ऽग्रधर्मेभ्यो धर्मक्षान्तिरनास्रवा" (अभि० को० ६.२५) इत्यवाप्तौ क्षान्तय उक्ताः, "कामदुःखे ततोऽन्वय धर्मज्ञानं तथा पुनः" (अभि० को० ६.२६) इत्यत्र ज्ञानानि, "न[2] चेत् क्षयज्ञानमशैक्षी वा दृष्टिः" (अभि० को० ६.५०) इत्यत्र सम्यग्दृष्टिः, "सैव विमुक्ती द्वे ज्ञानं वोक्तिर्यथोदिता" (अभि० को० ६.७६) इत्यत्र सम्यग्ज्ञानम्, इहैव वा पष्ठकोशस्थानावसाने एतत् सर्वमुक्तम् ।

दशश्च षट् ॥ १ ॥

पञ्च दृष्टयः, लौकिकी च सम्यग्दृष्टिः। एषा षड्विधा लौकिकी प्रज्ञादृष्टिः, अन्या न दृष्टिः। ज्ञानं त्वेषा चान्या च ॥ १ ॥

कियता सर्वज्ञानसंग्रहः ? दशभिर्ज्ञानैः। समासेन तु

सास्रवानास्रवं ज्ञानम्,

तयोः पुनः

आद्यं संवृतिज्ञापकम्।

यत् सास्रवं तत् संवृतिज्ञानम्, प्रायेण घटपटस्त्रीपुरुषादिसंवृतिग्रहात्। अज्ञानसंवृतत्वात् इत्यपरे।

अनास्रवं द्विधा धर्मज्ञानमन्वयमेव च ॥ २ ॥

अनास्रवं ज्ञानं द्विधा भिद्यते—धर्मज्ञानम्, अन्वयज्ञानं च ॥ २ ॥

या पुनर्दृष्टिस्वभावा या च मानसी कुशला, सा किं भवति ? इत्याह—"दृशश्च षट्" इति।

एषा षड्विधा लौकिकी प्रज्ञा दृष्टिः, अन्या न दृष्टिः; पडेवेत्यवधारणात्। का पुनरन्या ? या पूर्वमुक्ता लौकिकी।

ज्ञानं त्वेषा चान्या चेति। एषा च षड्विधा दृष्टिस्वभावा प्रज्ञा, ततोऽन्या च पूर्वोक्ता ज्ञानमित्युच्यते। अत एव च 'दृशश्च षड्' इति चकारः पठ्यते। यस्मादेताः षड् ज्ञानानि चोच्यन्ते दृष्टयश्चेति ॥ १ ॥

दशभिर्ज्ञानैः। कथम् ? धर्मान्वयसंवृतिपरचित्तदुःखसमुदयनिरोधमार्गक्षयानुत्पादज्ञानैरवधारणार्थोऽयमारम्भो दशैव ज्ञानानि; च्युत्युत्पादपुद्गलज्ञानादीनामेषामेवान्तर्भावात्। समासेन तु द्वे एव—आस्रवम्, अनास्रवं चेति।

प्रायेणेति विशेषणम्। घटपटादिकं संवृतिसद्वस्तु संवृतिज्ञानमालम्बते। स्वसामान्यलक्षणमपि तु कदाचित् गृह्णाति।

सांवृतमिति। संवृतौ भवं सांवृतम्।

अनास्रवमपि संक्षिप्यमाणं द्विधा—धर्मज्ञानम्, अन्वयज्ञानं चेति। दुःखज्ञानादीनामनयोरेवान्तर्भावात् ॥ २ ॥

एवमते द्वे ज्ञाने त्रीणि भवन्ति—संवृतिज्ञानम्, धर्मज्ञानम्, अन्वयज्ञानं च। तत्र

सांवृतं सर्वविषयम्,

संवृतिज्ञानस्य सर्वधर्माः संस्कृतासंस्कृता आलम्बनम्, सम्भवतः।

कामदुःखादिगोचरम्।

धर्माख्यम्,

धर्मज्ञानस्य कामावचरं दुःखं तत्समुदयनिरोधप्रतिपक्षाश्चालम्बनम्।

अन्वयज्ञानं तूर्ध्वदुःखादिगोचरम्॥ ३॥

अन्वयज्ञानस्य रूपारूप्यावचरं दुःखं तत्समुदयनिरोधप्रतिपक्षाश्चालम्बनम्।

ते एव सत्यभेदेन चत्वारि,

ते एव धर्मज्ञानान्वयज्ञाने सत्यभेदेन पुनश्चत्वारि ज्ञानानि भवन्ति—दुःख-समुदय-निरोध-मार्गज्ञानानि; तदालम्बनत्वात्।

एते चतुर्विधे।

अनुत्पादक्षयज्ञाने,

एते एव धर्मान्वयज्ञाने[1] चतुर्विधे अदृष्टिस्वभावे क्षयज्ञानमनुत्पादज्ञानं चोच्येते[2]।

ते पुनः प्रथमोदिते॥ ४॥

दुःखहेत्वन्वयज्ञाने,

आलम्बनं सम्भवत इति। यस्य यदालम्बनं तस्य तद् भवति। न हि चक्षुर्विज्ञानस्य षडालम्बनम्॥ ३॥

तदालम्बनत्वादिति। दुःखाद्यालम्बनत्वादित्यर्थः।

"एते चतुर्विधे" इति। एते एव **धर्मान्वयज्ञाने** द्वे दुःखाद्यालम्बनभेदाच्चतुर्विधे **अदृष्टिस्वभावे** सती **क्षयज्ञानम्, अनुत्पादज्ञानं चोच्येते**।

"ते पुनः प्रथमोदिते"। ते पुनः क्षयानुत्पादज्ञाने प्रथमोत्पन्ने सती **दुःखहेत्वन्वयज्ञाने भवतः**। दुःखसमुदयालम्बने अवश्यं भवत इत्यर्थः।

---

१. धर्मज्ञानान्वयज्ञाने—का०। २. चोच्यते—का०।

प्रथमोत्पन्ने तु क्षयज्ञानानुत्पादज्ञाने दुःखसमुदयान्वयज्ञाने; दुःखसमुदयाकारैर्भावाग्रिकस्कन्धालम्बनत्वात् ॥ ४ ॥

किं[1] वज्रोपमोऽपि ताभ्यामेकालम्बनो भवति[2] ? यदि दुःखसमुदयालम्बनो भवति । अथ निरोधमार्गालम्बनः, नैकालम्बनः ।

चतुर्भ्यः परचित्तवित् ।

वेत्तीति वित्=ज्ञानम् । परचित्तज्ञानं चतुर्भ्यो ज्ञानेभ्यो द्रष्टव्यम् । धर्मान्वयज्ञानमार्गः संवृतिज्ञानेभ्यः ।

कस्माद् ? इत्याह—**दुःखसमुदयाकारैः भावाग्रिकस्कन्धालम्बनत्वा**दिति । तस्य हि सर्वपश्चात् भवाग्रमेव प्रहीयते, तस्माद् येन च पीड्यते येन च वद्धम्, तत एव मोक्षं वहु मन्यमानोऽनन्तरं क्षीणं भवाग्रमालम्वते । तच्च दुःखसमुदयाकारैर्भवाग्रमालम्वते । यस्माद् अवश्यं ते प्रथमोत्पन्नक्षयानुत्पादज्ञाने दुःखाकारैरनित्यादिभिः समुदयाकारैर्वा हेत्वादिभिर्भावाग्रिकान् स्कन्धानालम्वते । अप्रथमोत्पन्ने त्वन्यसत्यालम्वने अपि ते भवत इत्यर्थादुक्तं भवति ॥ ४ ॥

वज्रोपमानन्तरं क्षयज्ञानं भवति, तदनन्तरं चानुत्पादज्ञानमित्यतः पृच्छति—**किं वज्रोपमोऽपि ताभ्यामेकालम्वनो भवतीति** । ताभ्यामिति प्रथमोत्पन्नाभ्यामित्यर्थः । 'यथा क्षयानुत्पादज्ञाने एकालम्वने, किं वज्रोपमोऽपि ताभ्यामेकालम्वनः' इति अपि-शब्दस्यार्थः । **यदि दुःखसमुदयालम्वनो भवतीति** । किम् ? **ताभ्यामेकालम्वनो भवतीति** सम्भवः । **अथ निरोधमार्गालम्वनो भवति नैकालम्वनः**; तयोर्नियमेन भावाग्रिकस्कन्धालम्वनत्वात् । यथा हि विषकाण्डविद्धस्य मृतस्य विषं सर्वमङ्गमभिव्याप्य व्रणदेश एव मरणकालेऽवतिष्ठते, नान्यत्र; तद्वदस्य योगिनः प्रहेय एव भावाग्रिकस्कन्धलक्षणे ज्ञानमवतिष्ठते ।

यावच्च स तत्र प्रयोगमारभते, तावदयं षोडशचित्तमनुप्राप्तो भवतीत्यन्तरा न जानाति ।

प्रत्येकबुद्धस्त्रीन् क्षणान् । प्रथमौ च द्वावष्टमं च समुदयान्वयज्ञानम्; मृदुप्रयोगत्वात् । प्रथमद्वितीयपञ्चदशानित्यपरे ।

बुद्धस्तु सर्वानेव दर्शनमार्गक्षणानप्रयोगेण जानाति ॥ ६ ॥

अथ क्षयज्ञानानुत्पादज्ञानयोः को विशेषः ?

क्षयज्ञानं हि सत्येषु परिज्ञातादिनिश्चयः ।
न परिज्ञेयमित्यादिरनुत्पादमतिर्मता ॥ ७ ॥

"क्षयज्ञानं कतमत् ? 'दुःखं मे परिज्ञातम्' इति जानाति । 'समुदयः प्रहीणो निरोधः साक्षात्कृतो मार्गो भावितः' इति जानाति । तदुपादाय यत् ज्ञानं दर्शनं विद्या बुद्धिर्बोधिः प्रज्ञा आलोकोऽभिसमयमिदमुच्यते क्षयज्ञानम् । अनुत्पादज्ञानं कतमत् ? 'दुःखं मे परिज्ञातं न पुनः परिज्ञेयम्' इति जानाति, यावत् 'मार्गो भावितो न पुनर्भावयितव्यः' इति । तदुपादाय" ( ) इति विस्तरेणोक्तं शास्त्रे ।

कथमनास्रवेण ज्ञानेनैवं जानाति ? तत्पृष्ठलब्धेन व्युत्थित एवं जानाति । अतस्तद्विशेषेण तयोर्विशेषः । शास्त्रे ज्ञापित इति काश्मीराः ।

अष्टमं च समुदयान्वयज्ञानमिति । धर्मज्ञानपक्षौ द्वौ क्षणौ ज्ञात्वा अन्वयज्ञानपक्षं परेण 'चित्तं ज्ञास्यामि' इति प्रयोगं कृत्वा समुदयान्वयज्ञानमष्टमं सम्भावयति । मृदुप्रयोगत्वादिति । अल्पप्रयोगत्वादित्यर्थः । श्रावकस्य हि महाप्रयोगसाध्यं तदन्वयज्ञानपक्षालम्बनं परचित्तम्, अतो यावत् स तत्र प्रयोगमारभते तावद् अयं षोडशं चित्तमनुप्राप्तो भवतीति अन्तरा न जानाति। प्रथम-द्वितीय-पञ्चदशानिति । एतानेव त्रीन् जानाति । कथम् ? दुःखे धर्मज्ञानक्षान्ति धर्मज्ञानं च ज्ञात्वा प्रयोगान्तरं च कृत्वा पञ्चदशक्षणं मार्गान्वयज्ञानक्षान्ति जानातीति ॥ ६ ॥

धर्मज्ञानमेकं ज्ञानं सप्तानां च भागो[1] दुःखसमुदयनिरोधमार्गक्षयानुत्पादपरचित्तज्ञानानाम् ।

एवमन्वयज्ञानम् ।

दुःखज्ञानमेकं ज्ञानं चतुर्णां च भागो धर्मन्वियक्षयानुत्पादज्ञानानाम् ।

एवं समुदयनिरोधज्ञाने चतुर्णां भागः ।

मार्गज्ञानमेकं ज्ञानं पञ्चानां च भागो चतुर्णामनन्तरोक्तानाम् परचित्तस्य च ।

परचित्तज्ञानमेकं ज्ञानं चतुर्णां च भागो धर्मान्वयमार्गसंवृतिज्ञानानाम् ।

ज्ञानं धर्मज्ञानमेव । **सप्तानां च भागो** दुःख-समुदय-निरोध-मार्ग-परचित्त-क्षयानुत्पादज्ञानानाम् । कथम् ? दुःखज्ञानं धर्मान्वयज्ञानस्वभावम्, तस्य यो धर्मज्ञानभागः तद् धर्मज्ञानम् । एवं समुदयज्ञानस्य, यावद् अनुत्पादज्ञानस्य धर्मान्वयज्ञानस्वभावस्य यो धर्मज्ञानभागः तद् धर्मज्ञानम्; न त्वन्वयज्ञानभाग इति । परचित्तज्ञानस्य तु धर्मान्वयमार्गसंवृतिज्ञानस्वभावस्य धर्मज्ञानभागो धर्मज्ञानमिति ।

एवमन्वयज्ञानम् । एकमन्वयज्ञानमेव । **सप्तानां च भागः** । तेषामेव दुःखज्ञानादीनां योऽन्वयज्ञानभागः, तदन्वयज्ञानमिति योज्यम् ।

दुःखज्ञानं दशसु ज्ञानेष्वेकं ज्ञानम् । तदेव दुःखज्ञानम् । चतुर्णां च भागो धर्मन्वियक्षयानुत्पादज्ञानानाम् । एतानि हि धर्मज्ञानादीनि चत्वारि चतुःसत्यालम्बनानि भवन्ति । य एषां दुःखसत्यालम्बनो भागः तद् दुःखज्ञानम्, नान्यो भाग इति ।

• **एवं समुदय-निरोधज्ञाने** योज्ये । प्रत्येकम् । एकं ज्ञानं समुदयज्ञानम् निरोधज्ञानं वा । **चतुर्णां च भागः** । धर्मान्वियक्षयानुत्पादज्ञानानां यः समुदयालम्बनभागः, निरोधालम्बनभागो वा । तत् समुदयज्ञानम्, निरोधज्ञानं च ।

क्षयज्ञानमेकं ज्ञानं षण्णां च भागो धर्मान्वयदुःखसमुदयनिरोधमार्ग-ज्ञानानाम् ।

एवमनुत्पादज्ञानम् ॥ ७ ॥

कस्मात् पुनरेतानि त्रीणि सन्ति दश व्यवस्थाप्यन्ते ?

स्वभावप्रतिपक्षाभ्यामाकाराकारगोचरात् ।
प्रयोगकृतकृत्यत्वहेतूपचयतो दश ॥ ८ ॥

सप्तभिः किल कारणैर्दश ज्ञानानि व्यवस्थाप्यन्ते—

१. स्वभावतः संवृतिज्ञानम्; अपरमार्थज्ञानत्वात् ।

भागो धर्मान्वयमार्गसंवृतिज्ञानानाम् । एतानि हि चत्वारि ज्ञानानि परचित्तापरचित्तज्ञानस्वभावानि[1] भवन्ति । य एषां परचित्तज्ञान-भागः तत् परचित्तज्ञानम्, नेतर इति । क्षयज्ञानं दशसु ज्ञानेष्वेकं ज्ञानम्, तदेव क्षयज्ञानम् । स्वभावसंग्रहतः । **षण्णां च भागो धर्मान्वय-दुःख-समुदय-निरोध-मार्गज्ञानानाम्** । 'दुःखं मे परिज्ञातम्' इत्येवमाद्याकार-ज्ञाननिष्यन्दम् । तत्र यत् कामावचरदुःखाद्यालम्बनं तद् धर्मज्ञाने ऽन्तर्भवति । यद् रूपावचरदुःखाद्यालम्बनं तद् अन्वयज्ञानेऽन्तर्भवति । यत् प्रत्येकं दुःखाद्यालम्बनं तद् दुःखज्ञानम्, यावत् मार्गज्ञानं वा भवति । तत्र य एषां एवंलक्षणो भागः तत् क्षयज्ञानम्, नेतर इति 'षण्णां भागः' इत्युच्यते ।

एवमनुत्पादज्ञानम् । दशसु ज्ञानेष्वेकं ज्ञानम् तदेवानुत्पादज्ञानम् । षण्णां च भागो धर्मान्वय-दुःख-समुदय-निरोध-मार्गज्ञानानां यो भागः ।

'दुःखं मे परिज्ञातं न पुनः परिज्ञेयम्' इत्येवमाद्याकारनिष्यन्दम्, तदनुत्पादज्ञानम् । रूपारूप्यावचरदुःखाद्यालम्बनम् । तद् अन्वयज्ञानम्, नेतरो भाग इति षण्णां भाग इत्युच्यते ॥ ७ ॥

"आकाराकारगोचरात्" इति । आकारश्च गोचरश्च आकारगोचरम्, तस्मात् ।

स्वभावतः संवृतिज्ञानमिति । स्वभावेन स्वभावतः संवृतिज्ञानम् । संवृतौ वा ज्ञानं संवृतिज्ञानम् । कस्माद् ? इत्याह—**अपरमार्थज्ञानत्वादिति** ।

---

१. ० ज्ञानं स्वभावानि—जा० ।

२. प्रतिपक्षतो धर्मान्वयज्ञाने; कामधातूर्ध्ववातुप्रतिपक्षत्वात् ।

३. आकारतो दुःखसमुदयज्ञाने ; आलम्बनाभेदात् ।

४. आकारालम्बनतो निरोधमार्गज्ञाने ; आकारालम्बनभेदात् ।

५. प्रयोगतः परचित्तज्ञानम् । न हि तेन चैत्ता न ज्ञायते, चित्त-ज्ञानार्थं तु प्रयुक्तस्याभिनिष्पत्तेः परचित्तज्ञानमुक्तम् ।

६. कृतकृत्यतः क्षयज्ञानं कृतकृत्यसन्तानोत्पत्तेः ।

७. प्रथमतः हेतूपचयतोऽनुत्पादज्ञानं सर्वानास्रवहेतुकत्वादिति ॥ ८ ॥

कामधातुप्रतिपक्षो धर्मज्ञानम्, ऊर्ध्वधातुप्रतिपक्षोऽन्वयज्ञानम् । तथा हि शास्त्रे उक्तम्—"धर्मज्ञानं कतमत् ? कामप्रतिसंयुक्तेषु संस्कारेषु यदनास्रवं ज्ञानम्, कामप्रतिसंयुक्तानां संस्काराणां हेतौ यदनास्रवं ज्ञानम्, कामप्रतिसंयुक्तानां संस्काराणां निरोधे यद् अनास्रवं ज्ञानम्, कामप्रति-संयुक्तानां संस्काराणां प्रहाणाय मार्गे यदनास्रवं ज्ञानम्—इदमुच्यते धर्म-ज्ञानम् । अपि खलु धर्मज्ञाने धर्मज्ञानभूमौ च यदनास्रवं ज्ञानम्—इदमुच्यते धर्मज्ञानम् । अन्वयज्ञानं कतमत् ? रूपारूप्यप्रतिसंयुक्तेषु संस्कारेषु यदनास्रवं ज्ञानम्, रूपारूप्यप्रतिसंयुक्तानां संस्काराणां हेतौ यदनास्रवं ज्ञानम्, रूपारूप्यप्रतिसंयुक्तानां संस्काराणां निरोधे यदनास्रवं ज्ञानम्, रूपारूप्यप्रति-संयुक्तानां संस्काराणां प्रहाणाय मार्गे यदनास्रवं ज्ञानम्—इदमुच्यते अन्वय-ज्ञानम् । अपि खलु अन्वयज्ञाने अन्वयज्ञानभूमौ च यदनास्रवं ज्ञानम्—इदमुच्यतेऽन्वयज्ञानम्" ( ) इति ।

आकारतो दुःखसमुदयज्ञाने इति । आकारत एव, नालम्बनतः । पञ्चोपादानस्कन्धलक्षणत्वेन तयोरभेदात् । तथा हि शास्त्रे उक्तम्—"दुःखज्ञानं कतमत् ? पञ्चोपादानस्कन्धान् अनित्यतो दुःखतः शून्यतो-ऽनात्मतश्च मनसिकुर्वतो यद् अनास्रवं ज्ञानम्—इदमुच्यते दुःखज्ञानम् । समुदयज्ञानं कतमद् ? सास्रवं हेतुकं हेतुतः समुदयतः प्रभवतः प्रत्ययतश्च मनसिकुर्वतो यदनास्रवं ज्ञानम्—इदमुच्यते समुदयज्ञानम्" ( ) ।

आकारालम्बनतो निरोध-मार्गज्ञाने इति । आकारतश्च आलम्बनतश्च निरोधमार्गज्ञाने व्यवस्थाप्येते । तथा हि शास्त्रे उक्तम्—"निरोधज्ञानं कतमत् ? निरोधं निरोधतः शान्ततः प्रणीततो निःसरणतश्च मनसिकुर्वतो यदनास्रवं ज्ञानम्—इदमुच्यते निरोधज्ञानमिति । मार्गज्ञानं कतमत् ? मार्गं मार्गतो न्यायतः प्रतिपत्तितो नैर्याणिकतश्च मनसिकुर्वतो यदनास्रवं ज्ञानम्—इदमुच्यते मार्गज्ञानम्" ( ) इति ।

प्रथमत इति ग्रहणम् अनुत्पादज्ञानविशेषणार्थम् । तदपि हि कुतश्चित्-

सकलस्य सकलप्रतिपक्षत्वात् कामधातुप्रतिपक्षो धर्मज्ञानमित्युक्तम् । अपि तु

धर्मज्ञानं निरोधे यन्मार्गे वा भावनापथे ।
त्रिधातुप्रतिपक्षस्तत्,

निरोधमार्गज्ञाने भावनामार्गसंगृहीते त्रिधातुप्रतिपक्षः ।

कामधातोस्तु नान्वयम् ॥ ९ ॥

सन्तान उत्पद्यते । **सर्वानास्रवहेतुकत्वादिति** । प्रथमोत्पन्नानि दश ज्ञानान्यधिकृत्य सभागहेतुना सर्वानास्रवहेतुकमनुत्पादज्ञानम् । क्षयज्ञानं तु न सर्वानास्रवहेतुकमनुत्पादज्ञानम् । न हि अनुत्पादज्ञानमस्य हेतुर्भवति; विशिष्टत्वात् ॥ ८ ॥

सकलस्य सकलप्रतिपक्षत्वादिति । सकलस्य कामधातोः दर्शन-भावना-प्रहातव्यसंगृहीतस्य पञ्चप्रकारस्य सकलं धर्मज्ञानं दर्शन-भावना-मार्गसंगृहीतं चतुरार्यसत्यालम्बनं प्रतिपक्ष इति कृत्वा **कामधातोरेव प्रतिपक्षो धर्मज्ञानमित्युक्तम्** । अपि त्वस्ति सम्भवो यद् रूपारूप्यधातोरपि धर्मज्ञानं प्रतिपक्षः । कतमत् तद् धर्मज्ञानम् ? यत् निरोधे मार्गे च धर्मज्ञानम् । निरोध-मार्गौ हि अधातुपतितौ । तावाधारावपि न हीनौ व्यवस्थाप्येते । दुःखसमुदयसत्ये त्वाधारभूमिके निहीने । न तदालम्बनं धर्मज्ञानं रूपारूप्य-धातुप्रतिपक्ष इत्यवगन्तव्यम् ।

भावनापथग्रहणं तु रूपारूप्यावचराणां दर्शनहेयानामन्वयज्ञानक्षान्ति-वाध्यत्वात् । अन्वयज्ञानं तर्हि निरोधमार्गालम्बनभावनामार्गसंगृहीतं कस्मात् त्रिधातुप्रतिपक्षो न भवति ? कामधातोर्जितत्वात् । धर्मज्ञानेनैव कामधातुः पूर्वतरजितो भवति, ततः पश्चादन्वयमुत्पाद्यते, ततः कामधातोर्जितत्वान्न **तत् कामधातुप्रतिपक्ष** इति । धर्मज्ञानं तु रूपारूप्यधातोरजितत्वात् प्रतिपक्षो युज्यते । कस्मान्[1] निरोधमार्गधर्मज्ञानाभ्यामेव त्रैधातुकभावनाप्रहात-व्यक्लेशप्रहाणम्, न पूर्वाभ्याम् ? शान्तनैर्याणिकतासभागात्[2] । न हि कामावचरसंस्काराणां निरोधात् प्रतिपक्षाद् वा रूपारूप्यावचरसंस्काराणां निरोधस्य प्रतिपक्षस्य वाऽस्ति कश्चिद् विशेषः । सर्वो हि निरोधः कुशलः, असंस्कृतः; मार्गश्च नैर्याणिकः ।

---

१. करमान्–जा० । २. ०सागागात्–जा० । साभाव्यात्–इत्यन्यपुस्तके ।

Licenced to Post W!
Delhi Postal Regn. No.: DL-(N)

अन्वयज्ञानं तु सर्वथा नास्ति कामधातुप्रतिपक्षः ॥ ९ ॥

एषां दशानां ज्ञानानां

धर्मज्ञानान्वयज्ञानं षोडशाकारम्,

तान् पुरस्तादुपदेक्ष्यामः ।

अन्यथा ।

तथा च सांवृतम् ,

संवृतिज्ञानं षोडशाकारमन्यथाकारं च; सर्वधर्माणां स्वसामान्यलक्षणादिग्रहणात् ।

स्वैः स्वैः सत्याकारैश्चतुष्टयम् ॥ १० ॥

दुःखसमुदयनिरोधमार्गज्ञानानि स्वैः स्वैः सत्याकारैः प्रवर्तन्त इत्येकैकं चतुराकारं भवन्ति ॥ १० ॥

तथा परमनोज्ञानं निर्मलम् ,

अनास्रवं परचित्तज्ञानं तथैव; स्वसत्याकारत्वाच्चतुराकार मार्गज्ञानत्वात् ।

समलं पुनः ।

अन्वयमिति । अन्वेतीत्यन्वयम् = ज्ञानम् ।

सर्वथेति । भावनामार्गसंगृहीतमपि ॥ ९ ॥

तान् पुरस्तादिति । तान् अनित्यादीन् आकारान् ऊर्ध्वं व्याख्यास्यामः । षोडशाकारमूष्मगतादिषु । स्वसामान्यलक्षणादिग्रहणादिति । स्वलक्षणग्रहणात्, सामान्यलक्षणग्रहणाच्च । आदिशब्देन 'भुङ्क्ष्व', 'तिष्ठ', 'गच्छ' इत्येवमाकारं च । न ह्येते स्वलक्षणाकाराः, किं तर्हि ? एवमाकारा एवेति ॥ १० ॥

उभयमपि त्विति । सास्रवानास्रवम् । यत्तर्हीति विस्तरः । रागस्य चित्तस्य च युगपद् ग्रहणमित्यभिप्रायः । सूत्रं पुनरेवं पठ्यते—"सरागं चित्तं सरागं चित्तमिति यथाभूतं प्रजानाति, विगतरागं चित्तं विगतरागं चित्तमिति यथाभूतं प्रजानाति । यथा सरागम्, विगतरागम्; एवं सद्वेषम् विगतद्वेषम्, समोहम् विगतमोहम्, संक्षिप्तम् विक्षिप्तम्, क्लीनं प्रगृहीतम्, उद्धतम् अनुद्धतम्, अव्युपशान्तं भावितम्, अविमुक्तं विमुक्तमिति यथाभूतं

एवं तर्हि तदप्रतिपक्षः सास्रवं चित्तमक्लिष्टं नैव सरागं न विगतरागं स्यादित्येवमादि ? तस्माद्रागसम्प्रयुक्ततयापि सरागं चित्तमत्रेष्टव्यमित्यपरे।

एवं यावत् समोहं विगतमोहं च वेदितव्यम्।

संक्षिप्तं कुशलमालम्बनाभिसंक्षेपात्। विक्षिप्तं क्लिष्टं विक्षेपसम्प्रयोगात।

संक्षिप्तं मिद्धसंप्रयुक्तं विक्षिप्तमन्यत् क्लिष्टमिति पाश्चात्याः। तदेतन्न वर्णयन्ति। तदेव हि चित्तं संक्षिप्तविक्षिप्तं स्यात्; क्लिष्टमिद्धसम्प्रयोगात्।

शास्त्रविरोधश्च स्यात्—"संक्षिप्तं चित्तं यथाभूतं सम्प्रजानाति[1]।

एवं तर्हीति विस्तरः। यदि रागसम्प्रयुक्तं चित्तं सरागम्, रागप्रतिपक्षो विगतरागम्। तदप्रतिपक्षः सरागचित्तस्याप्रतिपक्षः। चित्तमक्लिष्टम्। अनिवृताव्याकृतम्। नैव सरागम्। रागेणासम्प्रयोगात्। नैव विगतरागम्। रागस्याप्रतिपक्षत्वात्। एवमादीति। आदि-शब्देन 'सद्वेषम्' 'समोहम्' इति तुल्यप्रसङ्गो योज्यः। कथम्? "अत्र तु सूत्रे द्वेषसम्प्रयुक्तं चित्तं सद्वेषम्, द्वेषप्रतिपक्षो विगतद्वेषमिति। यदि हि द्वेषेणासम्प्रयुक्तं वितगद्वेषं स्यात्, अन्यक्लेशसम्प्रयुक्तमिति स्यादित्येके। एवं तर्हि तदप्रतिपक्षश्चित्तमक्लिष्टं नैव सद्वेषं स्यात्, न विगतद्वेषम्। इत्येवं समोहं चित्तं विगतमोहम्" इति वक्तव्यम्।

तस्माद् रागसंयुक्ततयापि सरागं चित्तमत्रेष्टव्यम्। अपि-शब्दात् रागसम्प्रयुक्ततयापीत्यपरे। आभिधर्मिकाः।

एवं यावत् समोहं विगतमोहं चेति। तस्माद् द्वेषसंयुक्ततयापि सद्वेषम्, मोहसंयुक्ततयापि समोहमत्र सूत्रे एष्टव्यमिति।

आलम्बनाभिसंक्षेपादिति। कुशलं चित्तं विक्षेपेण न सम्प्रयुज्यते। तस्मात् तदालम्बने तस्याभिसङ्क्षेप इति।

संक्षिप्तं विक्षिप्तं च स्यात्, क्लिष्टमिद्धसम्प्रयोगादिति। द्विविधं मिद्धम्—क्लिष्टम्, अक्लिष्टं च। तदेव हि चित्तं क्लिष्टं मिद्धसम्प्रयुक्तमिति संक्षिप्तं स्यादिति। क्लिष्टमिति न विक्षिप्तं स्यादिति सान्तर्यदोषः।

शास्त्रविरोधश्चेति। कथम्? संक्षिप्तं चित्तं यथाभूतं सम्प्रजानाति

१. प्रजानाति—क०।

स्कन्धैः सानुपरिवर्तम् । अल्पबलं खल्वपि क्लिष्टं बहुबलं कुशलम् । एकया हि दुःखधर्मज्ञानक्षान्त्या[1] दशानुशयात्यन्तसमुच्छेदः[2] क्रियते । तस्मादपि क्लिष्टं परीत्तं कुशलं महद्गतम् । उद्धतं क्लिष्टमौद्धत्यसम्प्रयोगात् । अनुद्धतं कुशलं तत्प्रतिपक्षत्वात् । एवमव्युपशान्तं व्युपशान्तं च ।

असमाहितं क्लिष्टं विक्षेपसंप्रयोगात् । समाहितं कुशलं तत्प्रतिपक्षत्वात् । अभावितं क्लिष्टं प्रतिलम्भनिषेवणभावनाभ्यामभावितत्वात् । भावितं कुशलं ताभ्यां भावितत्वात् । अविमुक्तं क्लिष्टं स्वभावसन्तानविमुक्तिभ्यामविमुक्तत्वात् । विमुक्तं कुशलं ताभ्यां विमुक्तत्वादिति वैभाषिकाः । एवं तु सूत्रं नानुलोमितं भवति । एषां च पदानां नार्थविशेष उक्तो भवति ।

महापरिवारम्; तज्जातीयानागतभावनासद्भावात् । चतुर्भिश्च स्कन्धैः सानुपरिवर्तम् । तैश्च वेदनादिभिस्त्रिभिः, रूपस्कन्धेन च ध्यानानास्रवसंवरसंगृहीतेन; चिन्तानुपरिवर्तनासम्भवयोगतः । अल्पबलं खल्वपि क्लिष्टमिति । ननु च कुशलमपि दुर्बलम्, एकेन मिथ्यादृष्टिक्षणेन कुशलपञ्चस्कन्धसमुद्घातात् । न तदत्यन्तमुच्छिद्यते; पुनः प्रतिसन्धानात् । दुःखधर्मज्ञानक्षान्त्या तु दशानामनुशयानामत्यन्तछेद इति । तस्मादपीति । अपि-शब्देन पूर्वोक्तादपीति । तत्प्रतिपक्षत्वादिति । औद्धत्यप्रतिपक्षत्वादित्यर्थः । एवमव्युपशान्तं व्युपशान्तं चेति । अव्युपशान्तं क्लिष्टम्; औद्धत्यसम्प्रयोगात् । व्युपशान्तं कुशलं तत्प्रतिपक्षत्वादिति । क्लेशसम्प्रयोगासम्प्रयोगतो वा तदव्युपशान्तं व्युपशान्तं च भवति ।

समाहितं कुशलं तत्प्रतिपक्षत्वादिति । विक्षेपप्रतिपक्षत्वात् । प्रतिलम्भनिषेवणभावनाभ्यामिति । अलब्धपूर्वस्य प्राप्तिः=प्रतिलम्भः । सम्मुखीभावः=निषेवणम् । ते एव भावने । ताभ्यामभावितत्वाद् अभावितम् । न हि क्लिष्टं कुशलवदनागतं भाव्यते । न च निषेवणार्हं भवति; निहीनत्वात् । "प्रतिलम्भनिषेवाख्ये शुभसंस्कृतभावने ।" (अभि० को० ७.२८) इति ।

एवं कुशलस्यापि गुणविशेषसन्दर्शनादुक्त एवार्थविशेषो भवति। सूत्रविरोधस्यापरिहारान्नैष एषां पदानामर्थः।

यदि च सूत्रे तदेव लीनं चित्तं तदेवोद्धतमित्यभिप्रेतं स्यात्, इदं नोक्तं स्यात्—"यस्मिन्समये लीनं चित्तं भवति लीनाभिशङ्कि[1] वा, अकालस्तस्मिन् समये प्रस्रब्धिसमाध्युपेक्षासम्बोध्यङ्गानां भावनायाः। यस्मिन् समये उद्धतं चित्तं भवति औद्धत्याभिशङ्कि वा, अकालस्तस्मिन् समये धर्मविचय-

---

न वै नोक्त इति विस्तरः। 'वै' इति निपातः। न नोक्त इति द्वौ प्रतिषेधौ। उक्त एवेत्यर्थः। क उक्तः? पदानामर्थविशेषः। कथम्? इत्याह—क्लिष्टसामान्येऽपि विक्षिप्तादीनां तुल्ये क्लिष्टत्वे तेषां दोषविशेषसन्दर्शनादित्यप्येतत् क्लिष्टं चित्तं विक्षेपयोगात् विक्षिप्तं क्लिष्टम्, कौशीद्ययोगाल्लीनम्, औद्धत्ययोगादुद्धतम्—इत्येवमादिदोषे विशेषसन्दर्शनाद् उक्त एवार्थविशेषो भवति। एवं कुशलस्यापि संक्षिप्तादेर्गुणविशेषसन्दर्शनादित्यप्येतत् कुशलं चित्तं संक्षिप्तं प्रगृहीतमिति विस्तरेण उक्त एवार्थविशेषो भवति। सूत्रविरोधस्यापरिहारादिति। सूत्रे हि स्त्यानमिद्धसहगतं संक्षिप्तमुक्तम्। स्त्यानयोगेन यत् क्लिष्टं मिद्धसम्प्रयुक्तम्, तत् संक्षिप्तम्, न कुशलम्; स्त्यानस्य क्लेशमहाभूमिकत्वात्।

यदि च सूत्रे इति विस्तरः। यदि युष्मन्नीत्या सूत्रे लीनमेवोद्धतं भगवता अभिप्रेतं स्यात्, लीनोद्धतयोः पृथग् वचनं नोक्तं स्यात्। कथम्? इत्याह—यस्मिन् समये चित्तं लीनं कौसीद्यसम्प्रयुक्तम्, लीनाभिशङ्कि लीनमेतत् भविष्यतीत्यभिशङ्कितो लीनाभिशङ्कि। अकालस्तस्मिन् समये प्रस्रब्धिसमाध्युपेक्षासम्बोध्यङ्गानां भावनाया इत्येष नियमो न स्यात्। एवं च वक्तव्यं स्यात्—अकालस्तस्मिन् समये धर्म-विचय-वीर्य-प्रीतिसम्बोध्यङ्गानां भावनाया अपीति। किं कारणम्? तत एव लीनं चित्तमुद्धतमिति कृत्वा। तथा यस्मिन् समये उद्धतं चित्तं भवत्यौद्धत्याभिशङ्कि अकालस्तस्मिन् समये धर्मविचय-वीर्य-प्रीतिसम्बोध्यङ्गानां भावनाया इत्येष नियमो न स्यात्। एवं च वक्तव्यं स्यात्—'अकालस्तस्मिन् समये प्रस्रब्धि-समाध्युपेक्षासम्बोध्यङ्गानां भावनाया अपि' इति। किं कारणम्? तदेवोद्धतं चित्तं लीनमिति कृत्वा। अविभागेन वा वक्तव्यं स्यात्—'यस्मिन् समये चित्तं लीनं भवति, लीनाभिशङ्कि, उद्धतं वा भवति औद्धत्याभिशङ्कि; अकालस्तस्मिन् समये प्रस्रब्धि-

रागसंप्रयुक्तम् ? रागप्राप्तिसहितं चेत्, 'अनास्रवमपि[1] सरागं प्राप्नोति शैक्षं चित्तम्। रागालम्बनं चेत्, अर्हतोऽपि सास्रवं चित्तं सरागमिति गृह्णीयात्; रागालम्बनत्वात्। कथं वा तत्सास्रवम् ? सामान्यक्लेशालम्बनत्वादिति चेत्, एवमपि समोहं गृह्णीयान्मोहालम्बनत्वात्। न च परचित्तज्ञानं प्राप्त्यालम्बनम्, नापि तच्चित्तालम्बनरागालम्बनम्[2]। तस्मादपि[3] न रागसम्प्रयोगात् सरागं चित्तमत्रेष्टम्। किं तर्हि ? रागसम्प्रयुक्तं चित्तं सरागमसम्प्रयुक्तं विगतरागमिति सूत्राभिप्रायो दृश्यते।

यत् तूक्तम्—"विगतरागमस्य तच्चित्तं भवति विगतद्वेषं विगतमोह-

रागसम्प्रयुक्तं चित्तं द्वाभ्यां सरागम्; 'ततोऽन्यत् सास्रवं संयोगसरागम्' इति वचनात्। तत्र रागसंयुक्ततयापि सरागं चित्तमत्रेष्टव्यमिति वचनात्। अनालवमपि सरागं प्राप्नोति शैक्षं चित्तमिति। शैक्षस्थाने रागस्य सावशेषत्वात्। रागालम्बनं चेत्। अथ मतम्—रागस्य यदालम्बनं तद् रागसंयुक्तं सरागं च भवति अर्हतोऽपि सास्रवं चित्तं परकीयस्य रागस्यालम्बनत्वात् रागसंयुक्तमिति कृत्वा सरागमिति गृह्णीयात् परचित्तवित् परचित्तज्ञानं वा। अथ मतम्—न तद् रागेणालम्ब्यत इति ? तत उच्यते—कथं वा तत् सास्रवमिति। सामान्यक्लेशालम्बनत्वादिति चेत्। अथ मतम्—सामान्यक्लेशानां दृष्टिविचिकित्साऽविद्यानामालम्बनं तत्, अतः सास्रवमिति ? एवमपि समोहं गृह्णीयात्। अर्हतः सास्रवं चित्तं मोहालम्बनत्वात्। मोहोऽपि सामान्यक्लेशः। परकीयस्य च मोहस्यार्हच्चित्तमालम्बनीभवतीति। न च परचित्तज्ञानं प्राप्त्यालम्बनमिति। यस्मात् परचित्तज्ञानं चित्तचित्तालम्बनमिप्यते, तस्मान्न रागप्राप्तिसहितत्वेन रागसंयुक्तत्वात् सरागमिति। नापि तच्चित्तालम्बन-रागालम्बनमिति। तदिति, यत् परकीयं चित्तं परचित्तज्ञानेन गृह्यते तत् तच्छब्देनोच्यते। तस्यालम्बनः तच्चित्तालम्बनः। तच्चित्तालम्बनो रागः। आलम्बनमस्य परचित्तज्ञानस्येति तद् भवति तच्चित्तालम्बनरागालम्बनम्। यस्मादेवंविधं रागं नालम्बते परचित्तज्ञानं विप्रकृष्टत्वात्। एकैकद्रव्यगोचरं हि परचित्तज्ञानम्। न च परकीयचित्तज्ञानं तस्य चित्तस्यालम्बनं गृह्णाति; "आकारालम्बननिरपेक्षं हि तत्" इति वचनात्। "रक्तमिदं चित्तं जानाति" इति वचनाच्च। तस्मादपि न रागसम्प्रयोगात्[4] सरागं चित्तमिति। असम्प्रयुक्तं

मनावर्तिकधर्मि कामभवे रूपभवे आरूप्यभवे" इति। तत्र तत्प्राप्तिविगमं सन्धायोक्तम्। ननु चोक्तम्—अन्यक्लेशसम्प्रयुक्तमपि चित्तं रागविप्रयुक्तत्वाद्विगतरागं स्यात्" इति? एतेनाभिसन्धिना न दोषः। न तु तद्विगतरागमिति कृत्वा गृह्यते। किं तर्हि? सद्वेषं समोहमित्येवमादि।

अलं प्रसङ्गेन। सिद्धान्तो वर्ण्यताम्।

किं परचित्तज्ञानं परचित्तस्वाकारमालम्बनं वा गृह्णाति? न गृह्णाति। आकारालम्बननिरपेक्षं हि तद्रक्तमिदं चित्तमिति जानाति। न त्वमुष्मिन् रूपे रक्तमिति जानाति। अन्यथा हि तद्रूपालम्बनमपि स्यात्, तदालम्बनं च परचित्तं गृह्णतः स्वभावग्रहणं प्राप्नुयात्। सर्वं च परचित्तज्ञानं द्रव्यस्वलक्षणचित्तचैत्तप्रत्युत्पन्नपरसन्ततिकामरूपप्रतिसंयुक्ताप्रतिसंयुक्तविषयं दर्शन-

---

विगतरागमिति। सत्यामपि रागप्राप्तावित्यभिप्रायः। तत्र तत्[1] प्राप्तिविगमं सन्धायोक्तमिति[1]। रागादिप्राप्तिविगमं सन्धायोक्तम्, न सम्प्रयोगमिति दर्शयति—अनावर्तिकधर्मि कामभवे रूपभवे आरूप्यभवे इति। वैधातुकवैराग्यसन्दर्शनादित्यभिप्रायः। ननु चोक्तमिति विस्तरः। क्वोक्तम्? अत्र तु सूत्रे इति विस्तरेण, यावद्, यदि हि रागेणासम्प्रयुक्तं चित्तं विगतरागं स्यात् अन्यक्लेशसम्प्रयुक्तमपि विगतरागं स्यादित्यत्र। एतेनाभिसन्धिना रागविप्रयुक्तत्वाद् विगतरागम् अन्यक्लेशसम्प्रयुक्तमपीत्यनेन। यद्येवम्, 'सद्वेषं समोहम्' इत्येवमादि न वक्तव्यं स्यात् इति? अत आह—न तु तद् विगतरागमित्यादि। न तु तद् द्वेषादिसम्प्रयुक्तं चित्तं विगतरागमपि तत् विगतरागमिति कृत्वा गृह्यते। किं तर्हि? सद्वेषं समोहमित्येवमादि। द्वेषादिसम्प्रयोगितया विशिष्टत्वात्। आदि-शब्देन चात्र संक्षिप्तं विक्षिप्तमित्येवमादिसूत्रोक्तानि पदानि गृह्यन्ते।

अन्यथा होति विस्तरः। यद् यस्मिन् वस्तुनि रूपादिके रक्तमिति विजानीयात्, तद् रूपालम्बनमपि स्यात्। तथा च सति न तत् परचित्तज्ञानं स्यात्; रूपालम्बनत्वात्। **तदालम्बनं च परचित्तं गृह्णतः स्वभावग्रहणं प्राप्नुयादिति**। सालम्बनपरचित्तग्रहणे ह्युच्यमाणे स्वात्मा परचित्तज्ञानेन गृह्येत। अस्ति हि सम्भवो यत् परचित्तविद् यस्य चित्तं गृह्णाति, असावपि तस्य परचित्तविदश्चित्तमालम्बेत। ततश्च परचित्तज्ञानस्य स्वालम्बनपरिज्ञानात् स्वमेवासौ परचित्तवित् चित्तमालम्बेत। न चैतत् प्राप्यम् यत् तेनैव चित्तेन तदेव गृह्यते। **सर्वं चेति** विस्तरः। **द्रव्यस्य स्वलक्षणं च चित्तचैत्ताश्च प्रत्युत्पन्नाश्च परसन्ततिश्च कामरूपप्रतिसंयुक्ताश्चाप्रतिसंयुक्ताश्च**

१—१. तत्सन्धायो०—जा०।

मार्गप्रतिपिद्धं भावनामार्गं उपलभ्यते। शून्यताऽनिमित्तविप्रयुक्तं[1] क्षयानुत्पादज्ञानासंगृहीतमानन्तर्यमार्गं प्रतिषिद्धं च वेदितव्यम् ॥ ११ ॥

उक्तं परचित्तज्ञानम् ॥

शेषे चतुर्दशाकारे शून्यानात्मविवर्जिते।

क्षयानुत्पादज्ञाने शेषे ते चतुर्दशाकारे शून्यानात्माकारौ वर्जयित्वा। पारमार्थिकयोरपि संवृतिभजनात्। क्षीणा मे जातिर्नापरमस्माद्भवं प्रजानामीति तद्वलेनानुव्यवहारतः[2]।

विषयोऽस्येति समासविग्रहः। द्रव्यग्रहणं संवृतिसन्निरासार्थम्। स्वलक्षणग्रहणं सामान्यलक्षणनिवृत्त्यर्थम्। चित्तचैत्तग्रहणं रूपादिविशेषणार्थम्। प्रत्युत्पन्नग्रहणं स्वसन्तितिव्युदासार्थम्। कामरूपप्रतिसंयुक्ताप्रतिसंयुक्तग्रहणम् आरूप्यप्रतिसंयुक्तप्रतिषेधार्थम्। **दर्शनमार्गप्रतिषिद्धमिति**। दर्शनमार्गे वर्तमानः परचित्तज्ञानं न सम्मुखीकरोति, अतो दर्शनमार्गसंगृहीतं नास्ति। न हि दर्शनमार्गो व्यवच्छिन्नचित्तचैत्तालम्बनो भवति। **भावनामार्ग उपलभ्यते** इति। भावनामार्गसंगृहीतं भवतीत्यर्थः। **शून्यतानिमित्तविप्रयुक्तमिति**। शून्यतासमाधिना, अनिमित्तसमाधिना च विप्रयुक्तम्। शून्यतासमाधिः दुःखज्ञानसंयुक्तः, अनिमित्तसमाधिर्निरोधज्ञानसम्प्रयुक्तः। न च परचित्तज्ञानम् दुःखज्ञानं दुःखनिरोधज्ञानं वा भवति, आकारालम्बनभेदात्। अतस्ताभ्यां विप्रयुक्तमुच्यते। अर्थादुक्तं भवति–अप्रणिहितसमाधिसम्प्रयुक्तं सम्भवतीति। **क्षयानुत्पादज्ञानासंगृहीतमिति**। क्षयज्ञानेनानुत्पादज्ञानेन न संगृहीतम्। न क्षयानुत्पादज्ञानस्वभावमित्यर्थः। किं कारणम्? द्रव्यस्वलक्षण-सन्तीरण-परिमार्गणाशयं परचित्तज्ञानम्। न चैव क्षयज्ञानमनुत्पादज्ञानं चेति ताभ्यामसंगृहीतम्। **आनन्तर्यमार्गं प्रतिषिद्धं चेति**। स हि प्रहाणमार्गो भवति; परचित्तज्ञानं च विमुक्तिविशेषमार्ग इति ॥ ११ ॥

पारमार्थिकयोरपि संवृतिभजनादिति। परमार्थनिमित्ते, परमार्थेन वा दीव्यतः पारमार्थिके। तयोः संवृतिभजनात्। यस्मादेते संवृतिं भजेते, अतः शून्यतात्माकारौ न स्तः। कथं पुनरेते संवृतिं भजेते? **क्षीणा मे जातिः, नापरमस्माद् भवं प्रजानातीति** वचनम्। कथमेते अनात्मके सती एवमाकारे? **तद्वलेनानुव्यवहारतः**। अन्येन ज्ञानेनेति वाक्यशेषः। यस्मात्

किमनास्रवः स्वलक्षणाकारोऽस्ति ? अथ न ? काश्मीराणां तावत्

नामलः षोडशेभ्योऽन्य आकारः,

नास्त्यनास्रवाकारः षोडशाकारनिर्मुक्तः ।

अन्येऽस्ति शास्त्रतः ॥ १२ ॥

अन्ये पुनरस्तीत्याहुर्बहिर्देशकाः । कथं गम्यते ? शास्त्रत इति । शास्त्रे ह्येवमाह—"स्यादप्रतिसंयुक्तेन चित्तेन कामप्रतिसंयुक्तान् धर्मान् विजानीयात् । अनित्यतो दुःखतः शून्यतोऽनात्मतः हेतुतः समुदयतः प्रभवतः प्रत्ययतः । अस्त्येतत्स्थानमस्त्येतद्वस्त्विति योगविहिततो विजानीयात्" ( ) इति ।

नास्यायमर्थो यदस्त्येतत् स्थानमस्त्येतद्वस्त्वित्येवं विजानीयादिति, अपि त्वस्त्येतत् स्थानमस्त्येतद्वस्त्वनित्यादितो विजानीयादिति चेत् ? न ; अन्यत्रावचनात् । एष चेच्छास्त्रार्थोऽभविष्यत्, यदिदं पठ्यते—"स्याद्दर्शनप्रहातव्येन चित्तेन कामप्रतिसंयुक्तान्धर्मान्विजानीयादिति ? आह—विजानीयात् । आत्मत आत्मीयत उच्छेदतः शाश्वततः अहेतुतोऽक्रियातो-

---

तत्पृष्ठनिर्जाति संवृतिज्ञाने एवमाकारे प्रवर्तते, अतस्तन्निष्यन्देन तयोः संवृतिभाजनमित्युच्यते । न तु मुख्यवृत्त्या तयोः संवृतिभाजनमित्यभिप्रायः । यतश्चैव निष्यन्देनात्मदृष्टि भजमाने इव ते प्रवर्तेते, अत्र तस्माच्छून्यानात्माकारविवर्जितैश्चतुर्दशभिरेवाकारैः सम्प्रयुक्ते इति ।

अप्रतिसंयुक्तेनेति । अनास्रवेण । अनित्यमिति । अनित्यतः । अयं हि तसिप्रत्ययः स्वार्थे प्रयुक्तः । एवं सर्वत्रायं प्रत्ययो ज्ञातव्यः । अथ वा—अन्तरेणापि भावप्रत्ययं भावप्रधानो निर्देशो भवति—अनित्येन रूपेण भावोऽनित्यत इति । एवमन्यत्रापि योज्यम् । अस्त्येतत् स्थानम्. अस्त्येतद् वस्तु इति । एतावपि द्वावाकारावनास्रवौ । अस्त्येतत्स्थानमिति अस्त्येतल्लक्षणमित्यर्थः । अस्त्येतद्वस्तु इति, अयं हेतुरित्यर्थः । योगविहिततो विजानीयादिति । अविपरीततो विजानीयादित्यर्थः ।

नास्यायमर्थ इति विस्तरः । अस्त्येति, वाक्यस्य पदद्वयस्य वा—अस्त्येतत् स्थानम् अस्त्येतद् वस्तु । अस्त्ययं सम्भवोऽस्त्ययं योगो यद् अनित्यादितो विजानीयादिति मतं चेत्, न; नैतदस्ति । अन्यत्रावचनात् । अन्यत्र वाक्ये पदद्वयस्यावचनात् । दर्शनप्रहातव्येनेति । दर्शनप्रकारेण । आत्मत आत्मीयतश्चेति । सत्कायदृष्ट्या सम्प्रयुक्तेन चित्तेन । उच्छेदतः शाश्वतत

ऽपवादतोऽग्रतः श्रेष्ठतो विशिष्टतः परमतः शुद्धितो मुक्तितो नैर्याणिकतः काङ्क्षातो विमतितो विचिकित्सातः। रज्येत द्विष्यान्मन्येत मुह्येदयोग-विहिततो विजानीयाद्" इति, अत्राप्येवं पाठोऽभविष्यत्—अस्त्येतत्स्थान-मस्त्येतद्वस्त्विति, न चैवं पठ्यते। तस्मान्नास्यायमर्थः ॥ १२ ॥

किं पुनरिमे षोडशाकारा नामतः ? आहोस्वित् द्रव्यतः ? सप्त द्रव्यतः, नामतः षोडशेत्येके। दुःखाकाराश्चत्वारः; समुदयनिरोधमार्गाकाराणा-मेकैकद्रव्यत्वात्। **एवं तु वर्णयन्ति—**

द्रव्यतः षोडशाकाराः,

तत्प्रत्ययाधीनत्वात् अनित्यम्। पीडनात्मकत्वात्[1] दुःखम्।

इति। अन्तग्राहदृष्ट्या। अहेतुतः, अक्रियतः, अपवादत इति। मिथ्यादृष्ट्या। अग्रतः, श्रेष्ठतः, विशिष्टतः, परमत इति। दृष्टिपरामर्शेन। शुद्धितः, मुक्तितः, नैरात्म्यत इति। शीलव्रतपरामर्शेन। कांक्षातः, विमतितः, विचिकित्सात इति। विचिकित्सातः। रज्येतेति। रागेण। द्विष्यादिति। द्वेषेण। मन्येत इति। मानेन। मुह्येदिति। मोहेन। अयोगविहिततो[2] विजानीयादिति। एवमात्मादिभिर्विपरीततो[3] विजानीयादिति निगमयति। अत्रापि वाक्ये एवं पाठोऽभविष्यदिति। न चैवम्। अतो गम्यते नायमस्यार्थ इति ॥ १२ ॥

सप्त द्रव्यत इति। दुःखाकाराश्चत्वारो द्रव्यतो भवन्ति। समुदयाकारा-द्याकारास्त्वेकैक इति सप्त। य एव हेत्वाकारः स एव समुदयः, प्रभवः, प्रत्ययश्च प्रत्ययमात्रं नार्थभेदः। शक्रः, इन्द्रः, पुरन्दर इति यथा। एवं निरोध एव शान्तः प्रणीतो निःशरणम्—इत्येक आकारः। मार्ग एव च न्यायः, प्रतिपत्, नैर्याणिक :—इत्येक आकार इति। तदिदमुक्तं भवति—दुःखाकारांश्चतुरः पृथग्योगिनः सम्मुखीकुर्युः, हेत्वाकारांस्त्वेकैकमित्येकीय-मतम्।

द्रव्यतः षोडशेति वैभाषिका वर्णयन्ति। दुःखाकारत्वात् समुदयाद्या-काराणां सर्वेषामपि पृथक् पृथक् सम्मुखीकर्तव्यत्वात्। प्रज्ञास्वभावा ह्याकारा इति ब्रुवते। प्रत्ययाधीनत्वादिति विस्तरः। न नियतभाव-नित्यम्। प्रत्ययाधीनत्वात्। प्रत्ययप्रतिबद्धजन्मत्वादित्यर्थः। पीडनात्म-

---

१. पीडात्म०—का०।
२. ०विहितता—जा०।
३. °विपरीतता—जा०।

णार्थेन प्रत्यय इति । असम्बन्धः सम्बन्धोपरमान्निरोधः[1] । त्रिसंस्कृत-लक्षणविमुक्तत्वाच्छान्तः । कुशलत्वात् प्रणीतः । परमाश्वासत्वान्निःसरण-मिति । कुमार्गविपक्षेण मार्गः । अन्यायविपक्षेण न्यायः । निर्वाणपुराविरोध-नार्थेन प्रतिपत् । सर्वभवप्रतिपक्षत्वान्नैर्याणिक इति । एषां व्याख्यान-मनेकपर्यायः । यथाभिप्रेतं प्रवक्ष्यामः । उदयव्ययत्वादनित्यम् । प्रतिकूल-भावात् दुःखम् । आत्मरहितत्वाच्छून्यम् । स्वयमनात्मत्वादनात्मा । हेतुसमुदयप्रभवप्रत्ययत्वं तु यदेव सूत्र उक्तम्—"इमे पञ्चोपादानस्कन्धा-श्छन्दमूलकाश्छन्दसमुदयाश्छन्दजातीयाश्छन्दप्रभवाः" इति । प्रभवशब्दः केवलं पश्चात् पठितव्यः शास्त्रे ।

कः पुनरेषां छन्दानां विशेषः ? चतुर्विधो हि च्छन्दः । अस्मीत्यभेदे-नात्मभावच्छन्दः । स्यामित्यभेदेन पुनर्भवच्छन्दः । इत्थं स्यामिति भेदेन पुनर्भवच्छन्दः । प्रतिसन्धिवन्धच्छन्दश्चतुर्थः । कर्माभिसंस्कारच्छन्दो वा ।

अस्मादुत्पद्यत इत्यर्थः । **उन्मज्जनयोगेनेति** । अनागताध्वन उन्मज्जती-वेति अर्थः । **प्रसरणयोगेनेति** । प्रवन्धयोगेन । **प्रतिसरणार्थेन प्रत्यय** इति । जनिक्रियाप्रतिप्रधानभूत इत्यभिप्रायः । **असम्बन्धः सम्बन्धोपरमा-दिति** । पूर्वस्य दुःखस्योपरमात् । उत्तरस्य सम्बन्धोपरमो **निरोध** इत्यर्थः । **त्रिसंस्कृतलक्षणविमुक्तत्वाद्** । उत्पाद-व्यय-स्थित्यन्यथात्वविमुक्तत्वात् । **परमाश्वासत्वादिति** । सर्वदुःखोच्छित्त्या परमक्षेमत्वात् । **निर्वाणपुरा-विरोधनार्थेन प्रतिपदिति** । यस्मादनेन निर्वाणपुरं न विरोध्यते, न विसंवा-द्यते, किं तर्हि ? प्रतिपद्यत एवेत्यतः प्रतिपत् । प्रतिपद्यत अनयेति कृत्वा ।

छन्दमूलका इति । छन्दहेतुका इत्यर्थः । तृष्णापर्याय इह छन्दः । **छन्दसमुदया** इति । छन्दसमुद्गमा इत्यर्थः । **छन्दजातीया** इति । छन्द-प्रत्यया इत्यर्थः । **प्रभवशब्दः केवलं पश्चात् पठितव्यः** । आभिधर्मिकैरिति वाक्याध्याहारः । सूत्रानुसरणं हि कर्तव्यमित्यभिप्रायः । हेतुतः समुदयतः प्रत्ययतः प्रभवतश्चेति ।

कः पुनरेषां छन्दानां विशेषः ? अस्मीत्यभेदेनात्मभावश्छन्द इति । अनवधार्यैकं द्रव्यं समस्तेषु पञ्चसूपादानस्कन्धेषु अस्मीत्यभेदेन प्रकारान्तर-विशिष्टस्य प्रत्युत्पन्नस्यात्मभाववस्तुनोऽनालम्बनतः, त्रैयध्विकात्मभावाना-लम्बनतो वा आत्मभावप्रार्थना आत्मभावच्छन्द इति प्रथमः । **स्यामित्य-भेदेनेति** । पुनर्भावमात्रप्रार्थना, न विशेषरूपा प्रार्थनेति द्वितीयः । **इत्थं**

---

१ ०परमत्वा०—का० ।

तत्र प्रथमो दुःखस्यादिकारणत्वान्मूलहेतुः। फलस्येव वीजम्। द्वितीयः समुदयः, तेन तत्समुदागमात् फलस्येवाङ्कुरादिप्रसवः। तृतीयस्तज्जातीयदुःख-प्रत्ययः। फलस्येव क्षेत्रोदकपाश्यादिकम्। क्षेत्रादिवशेन हि फलस्य गन्धरसवीर्यविपाकप्रभावभेदा भवन्ति। चतुर्थः प्रभवस्तत एव तत्सम्भवात्। फलस्येव पुष्पावसानमिति।

अथ च[1] तृष्णाविचरितानां द्वौ पञ्चकौ, द्वौ चतुष्कौ, चत्वारश्छन्दाः। "अस्मीति भिक्षवः सति इत्थमस्मीति भवति, एवमस्मीति भवति, अन्यथाऽ-

---

स्यामिति। इदम्प्रकारः स्यामिति भेदेन **पुनर्भवच्छन्दस्तृतीयः**। **प्रतिसन्धिवन्धच्छन्दश्चतुर्थ** इति। प्रतिसन्धिरेव वन्धः, प्रतिसन्धेर्वा वन्धः प्रतिसन्धिवन्धः, तत्र छन्दः प्रार्थनेति चतुर्थः। **कर्माभिसंस्कारच्छन्दो वा**। चतुर्थ इत्यधिकृतम्। कर्मणो वाभिसंस्कारः, तत्र छन्दः—एवं चैवं च दानं दास्यामीति। कथं पुनस्ते छन्दा मूलादिशब्दवाच्या इति प्रतिपादयन्नाह—**तत्र प्रथम** इति विस्तरः। आदिः कारणम्, आदौ वा कारणम् **आदिकारणम्**। तद्भावाच्छन्दमूलकाः। हेत्वर्थो हि मूलशब्दः। **फलस्येव बीजमिति**। यथा फलस्य वीजमादिकारणम्, विप्रकृष्टकारणं तद्वदयमादिच्छन्दो दुःखस्य। **तेन तत्समुदागमादिति**। तेन द्वितीयेन छन्देन पुनर्भवस्य समुदागमात् क्षणपरम्परया। **फलस्येवाङ्कुरादिप्रसवः**। यया परम्परया अंकुरादिप्रसवः फलस्य समुदयः, तद्वत्। तृतीयश्छन्दः—इत्थं स्यामिति। **तज्जातीयदुःखप्रत्यय** इति। यत्प्रकारः पुनर्भवच्छन्दः तत्प्रकारस्य दुःखस्य प्रत्ययः सम्भवति। तस्य विशेषरूपत्वात् विशेषफलरूपमेव फलमुत्पद्यत इत्यभिप्रायः। **फलस्यैव क्षेत्रोदकपाश्यादिकमिति**। पाशिः = शुष्को गोमयः। आदिशब्देन वातातपादिर्गृह्यते। ततोऽपि हि फलसम्पदिति। **वीर्यम्**। शीतवीर्यता, उष्णवीर्यतेति। **विपाकः**। उष्णपरिणामता, मधुरपरिणामतेति। **प्रभावः**। सामर्थ्यविशेषः। तद्यथा—अम्लत्वे तुल्ये वीजपूरकरसः पित्तं जनयति, आमलकरसस्तु शमयतीति। तत एव तत्सम्भवादिति। तत एव प्रतिसन्धिवन्धच्छन्दात् तस्य प्रतिसन्धिवन्धस्य पुनर्भवलक्षणस्य सम्भवादुत्पादात्। **फलस्येव पुष्पावसानम्**। यथा पुष्पावसानं फलस्य प्रभवः, तद्वत्। अत्र चतुर्थच्छन्दः साक्षाद्धेतुः पुनर्भवस्य, पूर्वकास्त्रयः पारम्पर्येण हेतवः। **अथ चेति** विस्तरः। **तृष्णाविचरितानां द्वौ पञ्चकौ** गणौ **द्वौ चतुष्कौ चत्वारश्छन्दा** यथाक्रमं भवन्ति। प्रथमच्छन्दः पञ्चाकारः, द्वितीयोऽपि पञ्चाकारः, तृतीयः चतुःप्रकारः, चतुर्थोऽपि चतुः-

---

१. वा—का०।

स्मीति, सदस्मीति, असदस्मीति । भविष्यामीत्यस्य भवति—न भविष्यामि, इत्थं भविष्यामि, एवं भविष्यामि, अन्यथा भविष्यामि । स्यामित्यस्य भवति—इत्थं स्याम्, एवं स्याम्, अन्यथा स्याम्, अपितु स्याम्, अपीत्थं स्याम्, अप्येवं स्याम्, अप्यन्यथा स्यामित्यस्य भवति । प्रवृत्त्युपरमत्वान्निरोधः । निर्दुःखत्वाच्छान्तः ; "इति हि भिक्षवो दुःखाः संस्काराः शान्तं निर्वाणम्" इति वचनात् । निरुत्तरत्वात् प्रणीतः । अपुनरावृत्तित्वान्निःसरणम् । पथिभूतत्वान्मार्गः । यथाभूतप्रवृत्तत्वान्न्यायः । प्रतिनियतत्वात् प्रतिपत् ।

यथोक्तम्—

"एष मार्गो हि नास्त्यन्यो दर्शनस्य विशुद्धये" ( ) इति ।

अत्यन्तनिर्याणान्नैर्याणिकः । अथवा नित्यसुखात्मीयात्मदृष्टिचरितानां प्रतिपक्षेणानित्यदुःखशून्यानात्माकाराः । अहेत्वेकहेतुपरिणामबुद्धिपूर्वकृतदृष्टिचरितानां[1] प्रतिपक्षेण हेतुसमुदयप्रभवप्रत्ययाकाराः । 'नास्ति

प्रकारः । कथम् ? "अस्मीति भिक्षवः सत्यात्मदृष्टौ सत्यां इत्थमस्मीति भवतीदम्प्रकारोऽस्मीति भवति । तद्योगात् तृष्णामुत्पादयतीत्यर्थः । एवमस्मीति । यथापूर्वमेव, नान्यथेत्यर्थः । अन्यथास्मीति अन्येन प्रकारेण, वर्ण-बल-प्रतिभानादिदर्शनात् । सदस्मीति भवति । विपर्ययात् असदस्मीति । अयमभेदेन पञ्चधात्मभावच्छन्दः प्रथमः । भविष्यामीत्यस्य भवतीति शाश्वतरूपेण । न भविष्यामीत्युच्छेदरूपेण । इत्थं भविष्यामीति विस्तरेण पूर्ववत् व्याख्यानम् । इत्ययमभेदेन पञ्चधापुनर्भवच्छन्दो द्वितीयः । स्याम् इत्यस्य भवति—इत्थं स्याम्, एवं स्याम्, अन्यथा स्याम् इत्यस्य भवतीति । अयं भेदेन चतुर्धापुनर्भवच्छन्दस्तृतीयः । अपितु स्याम् इत्यस्य भवति—अपीत्थं स्याम्, अप्येवं स्याम्, अप्यन्यथा स्याम् इत्यस्य चतुर्धाप्रतिसन्धिवन्धच्छन्दश्चतुर्थः । तत्र प्रथमो दुःखस्यादिकारणत्वान्मूलहेतुरिति विस्तरेण पूर्ववत् योज्यम् । प्रतिनियतत्वात् प्रतिपदिति । नियतप्रतिपादनं प्रतिपद् । कथं पुनः प्रतिनियता ? अनयैव तद्गमनात् ।

यथोक्तमिति विस्तरः । नित्यसुखात्मीयात्मदृष्टिचरितानामिति । नित्यं सुखं आत्मीयम् आत्मेति वा दृष्टिचरितमेषाम् त इमे नित्यसुखात्मीयात्मदृष्टिचरिताः पुद्गलाः । तेषां प्रतिपक्षेण यथाक्रमं अनित्याद्याकाराः । नास्ति हेतुरित्यहेतुदृष्टिचरितानां प्रतिपक्षेण हेत्वाकाराः । एको हेतुः ईश्वरः प्रधानं चेति एकहेतुदृष्टिचरितानां समुदयाकाराः । समुदयो

---

१. °पूर्वंकदृष्टि०—का० ।

मोक्षः' इति दृष्टिचरितानां निरोधाकारः। 'दुःखो मोक्षः' इति दृष्टि-चरितानां प्रणीताकारः। 'पुनः पुनः परिह्राणितो नात्यन्तिको मोक्षः' इति दृष्टिचरितानां निःसरणाकारः। 'नास्ति मार्गः, कुमार्गोऽयम्, अन्यो मार्गः, पुनरावर्ती मार्गः' इति दृष्टिचरितानां मार्गन्यायप्रतिपन्नैर्याणिकाकारा इति।

आकारो नाम क एष धर्मः ?

प्रज्ञाकारः,

एवं तर्हि प्रज्ञा साकारा न भविष्यति, प्रज्ञान्तरासंयोगात् ? एवं तु युक्तं स्यात्—सर्वेषां चित्तचैत्तानामालम्बनग्रहणप्रकार आकार इति।

अथ किं प्रज्ञैवाकारयति ? नेत्याह। किं तर्हि ?

तया सह।

आकारयन्ति सालम्बाः,

प्रज्ञा चान्ये च सर्वे सालम्बना धर्मा आकारयन्ति।

सर्वमाकार्यते तु सत् ॥ १३ ॥

यत् किञ्चिदस्ति सर्वमाकार्यते। तदेवं कृत्वा सिद्धं भवति—प्रज्ञा आकारश्चाकारयति चाकार्यते च। अन्ये सालम्बना आकारयन्त्याकार्यन्ते च। आलम्बना आकार्यन्त एवेति ॥ १३ ॥

हेतुर्नैकहेतुरिति। परिणमते भाव इति परिणामदृष्टिचरितानां प्रभवाकाराः। आदिभवोऽयं न तु पूर्वमवस्थित परिणमत इति। बुद्धिपूर्वकृतोऽयं लोक इति बुद्धिपूर्वकृतदृष्टिचरितानां प्रत्ययाकाराः। नेदम् ईश्वरबुद्धिकृतं जगत्। किं तर्हि ? तं तं प्रतीत्य तत् तद्भवतीति वीप्सार्थो हि प्रतिशब्दः। तस्मादनेकप्रत्ययजनितं जगद्—इति ज्ञापितं भवति।

एवं तु युक्तं स्यात् इति। सौत्रान्तिकमतम्। आलम्बनग्रहणप्रकार आकार इति। नैरुक्तो[1] विधिरिति दर्शयति। आलम्बनशब्दात् आकारं गृहीत्वा प्रकारशब्दाच्च कारशब्दम्, शेषवर्णलोपे च कृते 'आकार' इति रूपं भवति। तदेवं सति प्रज्ञापि साकारा भवतीति सिद्धम्। सालम्बा इति। आलम्बेत्याकारान्तमेतच्छन्दरूपम्। घञन्तं वा आलम्ब इति। सहालम्बेन, सहालम्बया वा वर्तन्ते सालम्बाः। सालम्बना इत्यर्थः ॥ १३ ॥

---

१. नैरुक्ता विधि०—जा०।

अतः परमेषां ज्ञानानां कुशलादिभेदं निर्देक्ष्यामः ।

त्रिधाद्यं कुशलान्यन्यानि,

संवृतिज्ञानं श्लोकादौ भवत्वादाद्यम् । तत् त्रिविधम्—कुशलाकुशलाव्याकृतम् । अन्यानि नव ज्ञानानि कुशलान्येव ।

आद्यं सर्वासु भूमिषु ।

कामधातौ यावद् भवाग्रे ।

धर्माख्यं षट्सु,

धर्मज्ञानं चतुर्षु ध्यानेष्वनागम्ये ध्यानान्तरे च ।

नवसु त्वन्वयाख्यम्,

अन्वयज्ञानं तास्वेव च षट्सु भूमिष्वारूप्यत्रये च ।

तथैव षट् ॥ १४ ॥

दुःखसमुदयनिरोधमार्गक्षयानुत्पादज्ञानान्यप्येतास्वेव नवसु भूमिष्वभेदेन । भेदेन पुनर्धर्मज्ञानसंगृहीतानि षट्सु, अन्वयज्ञानसंगृहीतानि नवसु ॥ १४ ॥

ध्यानेष्वन्यमनोज्ञानम्,

परचित्तज्ञानं चतुर्ष्वेव ध्यानेषु, नान्यत्र ।

कामरूपाश्रयं च तत् ।

कामरूपधात्वोश्च तत् परचित्तज्ञानं सम्मुखीक्रियते ।

कामाश्रयं तु धर्माख्यम्,

धर्मज्ञानं तु कामधात्वाश्रयमेव न रूपारूप्यधात्वोः सम्मुखीक्रियते ।

कुशलादिभेदमिति । आदिशब्देन अकुशलाव्याकृतभूम्याश्रयग्रहणम् ।

श्लोकादौ भवत्वादाद्यमिति । इहाद्यम्, न शास्त्रमिति व्याचष्टे । शास्त्रे हि धर्मज्ञानमाद्यं पठितमिति ।

"धर्माख्यं षट्सु" इति । कामावचरदुःखाद्यालम्बनत्वात् । आरूप्यत्रये चास्ति भावनामार्गसंगृहीतमेवान्वयज्ञानम् ।

"तथैव षट्" इति । दुःखज्ञानादीनामन्वयज्ञानस्वभावत्वसम्भवात् । न रूपारूप्यधात्वोः सम्मुखीक्रियत इति । युक्तं तावत् आरूप्यधातौ धर्मज्ञानं

अन्यत् त्रैधातुकाश्रयम् ॥ १५ ॥

किं पुनरन्यत् ? परिचित्तज्ञानं धर्मज्ञाननिर्मुक्तम् ॥ १५ ॥

कृतो भूम्याश्रयनिर्देशः ॥

स्मृत्युपस्थानसंग्रहो वक्तव्यः, सोऽयमुच्यते—

स्मृत्युपस्थानमेकं धीर्निरोधे,

धीः, प्रज्ञा, ज्ञानमिति पर्यायाः । निरोधज्ञानमेकं धर्मस्मृत्युपस्थानम् ।

परचित्तधीः ।

त्रीणि,

परचित्तज्ञानं त्रीणि वेदनाचित्तधर्मस्मृत्युपस्थानानि ।

चत्वारि शेषाणि,

निरोधपरचित्तज्ञानाभ्यामन्यानि ज्ञानानि चत्वारि स्मृत्युपस्थानानि ।

न सम्मुखीक्रियत इति । आरूप्याणां कामावचरदुःखाद्यनालम्बनत्वात् । रूपधातौ तु कस्मान्न सम्मुखीक्रियते ? केचिद् आहुः—कामधातुविदूषणपरं धर्मज्ञानम् । रूपधातूपपन्नस्य च धर्मज्ञानं न कामधातुं विदूषयितुमुपजायते ; तस्य वैराग्यभूमिसञ्चारपरित्यक्तत्वात् । कामधातूपपन्नस्तु तद्वीतरागोऽपि तत् सम्मुखीकरोति ; कामधातूपपत्तेः सावशेषत्वादिति । अतो न रूपधातौ धर्मज्ञानं सम्मुखीक्रियते ।

आचार्यसङ्घभद्र आह—धर्मज्ञानं कामधातावेव सम्मुखीक्रियते, न रूपारूप्यधात्वोः ; तत्समापत्तिव्युत्थानचित्तानां कामधातावेव सद्भावात्, अनुपरिवर्तकाश्रयाभावाद् वा । धर्मज्ञानानुपरिवर्तकस्य हि शीलस्य कामावचराण्येव भूतान्याश्रयः ; दौःशील्यसमुत्थापकक्लेशप्राप्तिविबन्धकत्वात् प्रातिपक्षिकत्वात् । तानि च तत्र न सन्तीति धर्मज्ञानं कामधात्वाश्रयमेवेति ॥ १४–१५ ॥

ानमेकं धर्मस्मृत्युपस्थानम् । धर्मस्मृत्युपस्थाननिर्देश उक्तम्—चित्तेभ्योऽन्यः' इति । **अन्यानि ज्ञानानि चत्वारि स्मृत्युप**-र्मान्वय-संवृति-दुःख-समुदय-मार्ग-क्षयानुत्पादज्ञानानि चतुः-ाानि सन्ति । दुःख-ज्ञानमपि हि कदाचित् कायालम्बनम्,

कतमस्य ज्ञानस्य कति ज्ञानान्यालम्बनम् ?

धर्मधीगोचरो नव ॥ १६ ॥

धर्मज्ञानस्य नव ज्ञानान्यालम्बनम्; अन्यत्रान्वयज्ञानात् ॥ १६ ॥

नव मार्गान्वयधियोः,

अन्वयज्ञानस्यापि नव ज्ञानान्यालम्बनम्, अन्यत्र धर्मज्ञानात्। मार्गज्ञानस्यापि नव ज्ञानान्यालम्बनम्, अन्यत्र संवृतिज्ञानात्।

दुःखहेतुधियोर्द्वयम्।

दुःखसमुदयज्ञानयोर्द्वे संवृतिपरचित्ताने आलम्बनम्।

चतुर्णां दश,

संवृतिपरचित्तक्षयानुत्पादज्ञानानां दश ज्ञानान्यालम्बनम्।

नैकस्य,

एकस्य निरोधज्ञानस्य नैव ज्ञानमालम्बनम्।

योज्या धर्माः पुनर्दश ॥ १७ ॥

कतमे दश ?

त्रैधातुकामला धर्मा अकृताश्च द्विधा द्विधा।

कदाचित्... यावत् धर्मालम्बनम्। एवं समुदयज्ञानम्। मार्गज्ञानमपि यदनास्रवसंवरालम्बनम्, कायस्मृत्युपस्थानं तद् भवति। शेषं सुगमम्।

अन्यत्रान्वयज्ञानादिति। धर्मज्ञानं यद्यनास्रवं ज्ञानमालम्बेत, धर्मज्ञानपक्षमेवालम्बेत। एवमन्वयज्ञानमन्वयज्ञानपक्षमेवालम्बेत—इति नियमः। तत्र धर्मज्ञानस्य मार्गज्ञानभूतस्य धर्मज्ञानान्तरं दुःखज्ञानादीनि चानुत्पादज्ञानान्यालम्बनं सम्भवन्ति। दुःखसमुदयज्ञानभूतस्य तु संवृतिज्ञानमालम्बनं सम्भवति। परचित्तज्ञानभूतस्य परचित्तज्ञानमालम्बनं सम्भवतीति नव ज्ञानानि तन्वालम्बनमिति ॥ १६ ॥

संस्कृता धर्मा अष्टधा क्रियन्ते ; कामरूपारूप्यावचरानास्रवाणां सम्प्रयुक्तविप्रयुक्तभेदात् । असंस्कृता द्विधा क्रियन्ते ; कुशलाव्याकृतभेदात् ।

इमे दश धर्माः कथं योज्याः कस्य ज्ञानस्य कत्यालम्बनमिति ? तत्र संवृतिज्ञानस्य सर्वे दश धर्मा आलम्बनम् । धर्मज्ञानस्य पञ्च । कामावचरानास्रवाश्चत्वारः कुशलं चासंस्कृतम् । अन्वयज्ञानस्य सप्त । रूपारूप्यावचरानास्रवाः षट् कुशलं चासंस्कृतम् । दुःखसमुदयज्ञानयोः कामरूपारूप्यावचराः षट् । निरोधज्ञानस्यैकः कुशलमेवासंस्कृतम् । मार्गज्ञानस्य द्वावनास्रवौ । परचित्तज्ञानस्य त्रयः कामरूपावचरानास्रवाः सम्प्रयुक्ताः । क्षयानुत्पादज्ञानयोः नव धर्मा आलम्बनमव्याकृतमसंस्कृतं मुक्त्वा ।

स्यादेकेन ज्ञानेन सर्वधर्मान् जानीयात् ? न स्यात् । अपि तु

सांवृतं स्वकलापान्यदेकं विद्यादनात्मतः ॥ १८ ॥

संवृतिज्ञानं स्वस्मात्कलापादन्यान् सर्वधर्माननात्मतो जानीयात्—सर्वधर्मा

वम्, तस्य नवानास्रवाणि ज्ञानान्यालम्बनम् । यत सास्रवं तस्य संवृतिज्ञानं परचित्तज्ञानं चालम्बनं सम्भवति । क्षयानुत्पादज्ञाने दुःखज्ञानादिस्वभावे इति दशापि ज्ञानानि तयोरालम्बनानि भवन्ति ॥ १७ ॥

सम्प्रयुक्तविप्रयुक्तभेदादिति । ‘ सम्प्रयुक्ताश्चित्तचैत्ताः” (अभि० को० २.३४) इति । विप्रयुक्ताः प्राप्त्यादयः । कुशलाव्याकृतभेदादिति । कुशलं प्रतिसंख्यानिरोधः, परमक्षेमत्वात् । अव्याकृतौ आकाशाप्रतिसंख्यानिरोधाविति । कामावचरानास्रवाश्चत्वार इति । सम्प्रयुक्तविप्रयुक्तभेदात् । रूपारूप्यावचरानास्रवाः षडिति । प्रत्येकं सम्प्रयुक्तविप्रयुक्तभेदात् । कामरूपारूप्यावचरा अपि तत एव भेदात् षट् । द्वावनास्रवाविति । तत एव । कामरूपावचरानास्रवाः सम्प्रयुक्ता इति । आरूप्यावचराणां चित्तचैत्तानां विप्रयुक्तासंस्कृतानां च सर्वेषां परचित्तज्ञानाविषयत्वात् । अव्याकृतमसंस्कृतं मुक्त्वेति । क्षयानुत्पादज्ञानयोश्चतुःसत्यालम्बनत्वात् अव्याकृतस्य चासंस्कृतस्य तद्व्यतिरिक्ततत्वात् ।

स्याद्—एकेन ज्ञानेन सर्वधर्मान् जानीयात् ? न स्यादिति । कथं गम्यते ? सूत्रात् । “इहास्माकं भो गौतम ! उपस्थानशालायां सन्निषण्णानां सन्निपतितानाम् एतद्रूपान्तराकथासमुदाहारोऽभूत् । श्रमणो गौतमः किलैवमाह—‘नास्ति स कश्चिच्छमणो वा ब्राह्मणो वा यः सकृत् सर्व

अनात्मान इति । स्वभावस्तत्सहभुवश्च धर्मास्तस्य स्वकलापः । तेषामग्रहणं विषयिविषयभेदाद्, एकालम्बनत्वाद्[1], अतिसन्निकृष्टत्वाच्च[2] । तच्च कामावचरं श्रुतचिन्तामयम्, रूपावचरं श्रुतमयम्, भावनामयम्; तस्य व्यवच्छिन्नभूम्यालम्बनत्वात् । अन्यथा हि युगपत् सर्वतो वैराग्यं स्यात् ॥ १८ ॥

गतमेतत् ॥

इदं तु वक्तव्यम्—कः कतिभिर्ज्ञानैः समन्वागत इति ? पृथग्जनस्तावदेकेन समन्वागतः—संवृतिज्ञानेन । वीतरागस्तु परचित्तज्ञानेनापि ।

आर्यः पुनः—

जानीयात्, सर्वं पश्येत्' इति । तथ्यमिदं भो गौतम ? स्मरामि भवतोऽहमेवं वक्तुम् । अपि तु नास्ति स कश्चित् श्रमणो वा ब्राह्मणो वा यः सकृत् सर्वं ज्ञास्यति वा द्रक्ष्यति वा" ( ) इति ।

विषयिविषयभेदादिति विस्तरः । विषयिणो विषयस्य च भेदात् । यस्माद् यो विषयी, न स एव तस्य विषयो भवति ; स्वात्मनि वृत्तिविरोधात् । नहि सैवासिधारा तयैव छिद्यते । तस्मात तेन संवतिज्ञानेन स्वभावो न गृह्यते । नापि तेन चैत्ताः सहभुवो गृह्यन्ते । **एकालम्बनत्वात्** । यदेव हि तस्य संवृतिज्ञानस्यालम्बनं तदेव सम्प्रयुक्तानाम् । यदि च ते सम्प्रयुक्ता गृह्येरन् स्वभावालम्बनाः स्युः; संवृतिज्ञानेनैकालम्बनात् । न चैतद् युक्तम्; तस्मान्न ते तेन गृह्यन्ते । **अतिसन्निकृष्टत्वाच्च** । न तेन विप्रयुक्ताः सहभुवोऽपि गृह्यन्ते, चक्षुषोऽञ्जनशलाकादर्शनवत् । **तच्चेति** । संवृतिज्ञानम् । **तस्य व्यवच्छिन्नभूम्यालम्बनत्वादिति** । यस्माद् भावनामयं रूपावचरं संवृतिज्ञानं व्यवच्छिन्नमेव भूमिमालम्बते कामधातुं वा, प्रथमं वा ध्यानम्, यावद्, भवाग्रं वा, किं कारणम् ? आनन्तर्यविमुक्तिमार्गाणामधरोत्तरभूम्यालम्बनत्वात् यथाक्रमम् । "शान्ताद्युदाराद्याकारा उत्तराधरगोचराः" (अभि० को ६.५०) इति वचनात् । यदि च तत् सर्वभूम्यालम्बनं स्यात्, सर्वतो युगपद् वैराग्यं स्यात् । प्रयोगविशेषमार्गयोरपि यथासम्भवं काचिदेव भूमिरालम्बनम् । कथम् ? निर्वेधभागीयप्रयोगमार्गसंगृहीतस्य हि यस्य कामधातुरालम्बनम्, न तस्येतरौ धातू । यस्येतरौ धातू, न तस्य कामधातुरालम्बनम् । अशुभाप्रमाणाभिन्वायतनादिविदूषणे विशेषमार्गसंगृहीतस्य कामधातुरेवालम्बनम्, नेतरौ धातू ॥ १८ ॥

---

१. ०लम्बनत्वादिति—का० । २. सन्निकृ० —का० ।

एकज्ञानान्वितो रागी प्रथमेऽनास्रवक्षणे ।

कामावीतरागो दुःखधर्मज्ञानक्षान्तावेकेनैव संवृतिज्ञानेन समन्वागतो भवति ।

द्वितीये त्रिभिः,

दुःखधर्मज्ञाने त्रिभिः संवृतिज्ञानधर्मज्ञानदुःखज्ञानैः ।

ऊर्ध्वस्तु चतुर्ष्वेकैकवृद्धिमान् ॥ १९ ॥

अतः परं चतुर्षु क्षणेषु एकैकज्ञानवृद्धिरन्वय ज्ञातव्या—दुःखेऽन्वयज्ञाने-ऽन्वयज्ञानं वर्धते, समुदयनिरोधमार्गधर्मज्ञानेषु समुदयनिरोधमार्गज्ञानानि वर्धन्त इति । मार्गधर्मज्ञाने सप्तभिर्ज्ञानैः समन्वागतो भवति । वीतरागस्तु सर्वत्राविकेन परचित्तज्ञानेन समन्वागतो वेदितव्यः ॥ १९ ॥

अथ कस्यामवस्थायां कति ज्ञानानि भाव्यन्ते ?

यथोत्पन्नानि भाव्यन्ते क्षान्तिज्ञानानि दर्शने ।

अनागतानि,

"एकज्ञानान्वितो रागी प्रथमेऽनास्रवक्षणे" इति । यस्मात् क्षान्तिज्ञानं न भवत्यन्येनापि अनास्रवेण ज्ञानेन समन्वागतः, न भवति रागीति ग्रहणम् । यस्माद्वीतरागः परचित्तज्ञानेनापि समन्वागतो भवति ।

"द्वितीये त्रिभिः" इति । तदेव दुःखे धर्मज्ञानं चोच्यते, दुःखज्ञानं चेति । नामभेदाद् द्वित्वोपचारः । धर्मज्ञानेन, दुःखज्ञानेन, संवृतिज्ञानेन चेति त्रिभिः समन्वागतः ।

चतुर्ष्विति । दुःखेऽन्वयज्ञानक्षणे समुदय-मार्ग-निरोध-धर्मज्ञानक्षणेषु च । क्षान्तिषु पूर्ववदेवामसमन्वागमात् दुःखेऽन्वयज्ञानक्षणे हि अन्वयमेव वर्धते, न धर्मज्ञानम् ; तेन समन्वागतपूर्वत्वात् । समुदयधर्मज्ञानक्षणे समुदयज्ञानमेव वर्धते, न धर्मान्वयज्ञाने ; पूर्वमेव ताभ्यां समन्वागतत्वात् । एवं निरोध-मार्ग-धर्मज्ञानक्षणयोर्निरोधमार्गज्ञाने एव वर्धते इति वक्तव्यम् । वीतरागस्तु सर्वत्राविकेन परचित्तज्ञानेनेति । दुःखे धर्मज्ञानक्षान्तौ, यावत्, मार्गे धर्मज्ञानक्षणे परचित्तज्ञानेनापि समन्वागतः, तैश्च यथोक्तैर्ज्ञानैरिति वेदि-तव्यम् । मार्गेऽन्वयज्ञाने तु तैरेव सप्तभिर्वीतरागः समन्वागतः । वीतरागस्तु अष्टाभिः—तैश्च, परचित्तज्ञानेन चेति । 'क्षयानुत्पादज्ञानाभ्यां त्वर्हन्नेव समन्वागत इति सुबोधान्न तदर्थं सूत्रितमित्यवगन्तव्यम् ॥ १९ ॥

"यथोत्पन्नानि भाव्यन्ते" इति । इह द्विविधा भावना अधिकृता—

दर्शनमार्गे यद्यदेवोत्पद्यते क्षान्तिर्ज्ञानं वा तज्जातीयमनागतं भावनां गच्छन्ति[1] तदाकाराः[2] चत्वारः ।

कस्माद्दर्शनमार्गे सभागज्ञानाकारभावनैव ? गोत्राणामप्रतिलब्धत्वात् ।

तत्रैव सांवृतं चान्वयत्रये ॥ २० ॥

प्रतिलम्भभावना, निषेवणभावना च । प्रतिलम्भभावना प्राप्तितः, निषेवणभावना सम्मुखीभावतः ।

यथोत्पन्नानि भाव्यन्त इति । यानि यान्युत्पन्नानि तानि तानि भाव्यन्त इति । तद्यथा—दुःखधर्मज्ञानक्षान्तावुत्पन्नायां तज्जातीया क्षान्तिरेवानागता भाव्यते । **तदाकाराश्चत्वार** इति । क्षान्त्याकारा अनित्यादयश्चत्वारः; सभागत्वात् । नान्ये । एवं दुःखे धर्मज्ञान उत्पन्ने तदेवानागतं भाव्यते । तदाकाराश्चत्वार एव भावनां गच्छन्ति । एवं दुःखान्वयज्ञानक्षान्त्यादिषु योज्यम् ।

सभागज्ञानाकारभावनैवेति । **कस्मात्** सभागज्ञानभावना सभागाकारभावना च **दर्शनमार्गे एव** भवति न भावनामार्गे इति ? क्षान्तीनामपरिप्रश्नः; भावनामार्गे तेषामभावात् । तेषामपि वा प्रश्नः कर्तव्यः, तेषामपि सभागभावनात् । न हि दुःखक्षान्तावुत्पन्नायां समुदयादिदुःखक्षान्त्याकारा भाव्यन्ते । उदाहरणमात्रार्थत्वात्तु ज्ञानपरिप्रश्नः, न क्षान्तिपरिप्रश्न इति । **गोत्राणामप्रतिलब्धत्वादिति** । सभागहेतूनामप्रतिलब्धत्वादित्यर्थः । कथं कृत्वा ? दुःखे धर्मज्ञानक्षान्तौ उत्पन्नायां तद्गोत्रम्, तदाकाराणां च चतुर्णां गोत्राणि लब्धानि भवन्ति, न दुःखधर्मज्ञानादीनाम् । किं पुनः कारणम्—अनित्यादीनामाकाराणाम् एकैकस्मिन्नाकारे सम्मुखीभूते परिशिष्टानामाकाराणां गोत्राणि प्रतिलभ्यन्ते ? यतस्ते भावनानां गोचराणि; तुल्यालम्बनतया सभागत्वात् सर्वेषां गोत्राणि प्रतिलब्धानि भवन्ति । एवं दुःखे धर्मज्ञान उत्पन्ने, यावत्, मार्गेऽन्वयज्ञानक्षान्तावुत्पन्नायां तद्गोत्राणि तदाकाराणि च चतुर्णां गोत्राणि लब्धानि भवन्ति—इति तदेव भावनां गच्छति, नान्यत् । भावनामार्गे तु पुनः सर्वेषां ज्ञानानां सभागविसभागानां तदाकाराणां च सम्मुखीभावात् सर्वेषां हेतावलब्धा भवन्तीति । तद्विशिष्टा ज्ञानाकारा भावनां गच्छन्त्यनागताः ।

"सांवृतं चान्वयत्रये" इति । अलब्धपूर्वम् ।

---

१. गच्छति—का० । २. तदाकारा एव—का० ।

तत्रैव दर्शनमार्गे संवृतिज्ञानं चापि भाव्यते त्रिषु दुःखसमुदयनिरोधान्वयज्ञानेषु, न धर्मज्ञानेषु; अकृत्स्नसत्याभिसमयात् ॥ २० ॥

अतोऽभिसमयान्त्याख्यम्,

अत एव तदाभिसमयान्तिकं संवृतिज्ञानमाख्यायते; एकैकसत्याभिसमयान्ते भावनात् । कस्मान्न मार्गान्वयज्ञाने भावनां गच्छति ? मार्गस्य[1] पूर्वं लौकिकेन मार्गेणानभिसमितत्वात्, अकृत्स्नाभिसमयाच्च । कृत्स्नं हि दुःखं शक्यते परिज्ञातुम्, समुदयः प्रहातुम्, निरोधः साक्षात्कर्तुम्, न तु मार्गः शक्यते कृत्स्नो भावयितुमित्यभिसमयान्ताभावान्न तस्मिन्नाभिसमयान्तिकं भाव्यते ।

समुदयोऽपि तदा न सर्वः प्रहीणो भवतीति न स्यादाभिसमयान्तिकम् ? न; तत्सत्यदर्शनहेयः सर्वः प्रहीणो भवति । मार्गस्तद्दर्शनहेयप्रतिपक्षो न सर्वः शक्यते भावयितुम्; बहुगोत्रत्वात्—इत्यस्ति महान् विशेषः । दर्शनमार्गपरिवारत्वादित्यपरे । तदिदं साध्यत्वादज्ञापकम् ।

न धर्मज्ञानेषु अकृत्स्नसत्याभिसमयादिति । नहि तदानीं रूपादयावचरं दुःखं परिज्ञातम्, समुदयः परिक्षीणः, तन्निरोधः साक्षात्कृत इति ॥ २० ॥

मार्गस्य पूर्वं लौकिकेन मार्गेणानभिसमितत्वादिति । लौकिकमार्गेण पूर्वमनादिगतिसंसारे दुःखसमुदयनिरोधा अभिसमिताः, न तु संवृतिज्ञानेन कदाचित् मार्गो मार्गादिभिराकारैरभिसमितः । तस्मात् त्रयाणामेकैकस्य सत्यस्याभिसमयान्ते भावनां गच्छति । न मार्गान्वयज्ञाने । न तु मार्गः शक्यते कृत्स्नो भावयितुमिति सम्मुखीकर्तुमित्यर्थः ।

समुदयोऽपि तदा न सर्वः प्रहीण इति । निरोधमार्गदर्शनभावनाप्रहातव्यः । दुःखं पुनः सर्वं त्रैधातुकं परिज्ञातम्; तस्य परिज्ञेयत्वात्—इत्यतः समुदयमेव प्रतिचोद्यते । तत्सत्यदर्शनहेय इति । समुदयसत्यदर्शनहेय इत्यर्थः । बहुगोत्रत्वादिति । आत्मभावसन्ततिसामान्यविशेषः=गोत्रम् । तानि बहूनि गोत्राण्यस्येति बहुगोत्रो मार्गः । श्रावकगोत्रात् प्रत्येकबुद्धगोत्रमन्यत् । तथा बुद्धगोत्रम् श्रावकगोत्रमन्योन्यं भिन्नम्; मृद्वधिमात्रादिभेदात् । तेषां कश्चिदेव दर्शनहेयप्रतिपक्षो भाव्यते । सम्मुखीक्रियत इत्यर्थः ।

न मार्गः शक्यते कृत्स्नो भावयितुम्; दर्शनमार्गपरिवारत्वादिति । दर्शनमार्गस्य परिवारः संवृतिज्ञानम् । अतः सत्यत्रयान्ते एव दर्शनमार्गो

---

१. मार्गसत्यस्य—का० ।

सप्तभूमिजयाऽभिज्ञाक्षोप्याप्त्यार्कीर्णाभाविते ।
आनन्तर्यपथेषूर्ध्वं मुक्तिमार्गाष्टकेऽपि च ॥ २३ ॥

'सप्त ज्ञानानि भाव्यते' इति वर्तते । सप्त भूमयः, चत्वारि ध्यानानि, त्रयश्चारूप्याः, तासां जयः=वैराग्यम्, तस्मिन् सप्तभूमिके वैराग्ये पञ्चसु चाभिज्ञासु अक्षोप्यप्रतिवेधे च व्यवकीर्णाभाविते च ध्याने शैक्षस्य यावन्तः आनन्तर्यमार्गास्तेष्वपि सर्वेषु सप्त ज्ञानानि भाव्यन्ते, तान्येव । लौकिकश्चेद् भावनामार्गः संवृतिज्ञानं प्रत्युत्पन्नम् । लोकोत्तरश्चेत्, चतुर्णामन्वयज्ञानानां द्वयोश्च धर्मज्ञानयोरन्यतमत् । अक्षोप्यप्रतिवेधे तु संवृतिज्ञानं न भाव्यते; भवाग्राप्रतिपक्षत्वात् । तत्र क्षयज्ञानं सप्तमं वेदितव्यम् । सप्तभूमिवैराग्यादपि चोर्ध्वं भवाग्रवैराग्ये विमुक्तिमार्गेष्वष्टासु सप्तैव ज्ञानानि भाव्यन्ते धर्मान्वयदुःखसमुदयनिरोधमार्गपरचित्तज्ञानानि । संवृतिज्ञानं न भाव्यते; भवाग्राप्रतिपक्षत्वात् । प्रत्युत्पन्नं तु चतुर्णामन्वयज्ञानानां द्वयोश्च धर्मज्ञानयोरन्यतमत् ॥ २३ ॥

शैक्षोत्तापनमुक्तौ वा षट्सप्तज्ञानभावना ।

शैक्षस्येन्द्रियोत्तापनायां विमुक्तमार्गे सरागस्य षण्णां भावना धर्मान्वय-दुःखसमुदयनिरोधमार्गज्ञानानाम् । वीतरागस्य सप्तानाम्, परचित्तज्ञानं प्रक्षिप्य ।

पञ्चसु चाभिज्ञास्विति । आनन्तर्यक्षयाभिज्ञानमपास्य । **चतुर्णामन्वय-ज्ञानानामिति** । दुःख-समुदय-निरोध-मार्गान्वयज्ञानानाम् । **द्वयोश्च धर्मज्ञानयो-रिति** । निरोध-मार्गालम्बनयोः; त्रिधातुप्रतिपक्षत्वयोगात् । **संवृतिज्ञानं न भाव्यते, भवाग्रप्रतिपक्षत्वादिति** । सप्तभूमिवैराग्ये लोकोत्तरेऽपि भाव्यमाने संवृतिज्ञानं न भाव्यते । संवृतिज्ञानमपि हि तस्य क्लेशप्रकारस्य प्रतिपक्षो भवति । न केवलं लोकोत्तरमिति । संवृतिज्ञानमपि तत्र भाव्यते तज्जातीयम् । **अक्षोप्यप्रतिवेधे तु** न तथा प्रतिपक्षरूपं भूतं संवृतिज्ञानमस्ति । अतोऽत्र न भाव्यते । **तत्र क्षयज्ञानं सप्तममिति** । आनन्तर्यमार्गस्थितत्वात् क्षयज्ञानं न भाव्यते, नानुत्पादज्ञानम् । न ह्यानन्तर्यमार्गस्थितोऽक्षोप्यधर्मा भवति, अक्षोप्यधर्मणश्चानुत्पादज्ञानं भाव्यते इति । **भवाग्रवैराग्ये विमुक्तिमार्गेऽष्टासु सप्तैव ज्ञानानि भाव्यन्त** इति । परचित्तज्ञानं कथं भाव्यते ? आनन्तर्यमार्गे प्रतिषिद्धं परचित्तज्ञानम्, विमुक्तिमार्गे । अथ एकप्रकारे प्रहीणे, यावत्, अष्टप्रकारे प्रहीणे पूर्वपरचित्तज्ञानविशिष्टं परचित्तज्ञानं भाव्यते । यत् स एवंविध आर्यपुद्गलस्ततो मार्गाद् व्युत्थितः सम्मुखीकुर्यात् । सन्तानविशेषाद्धि परचित्तज्ञानविशेष इष्यते ॥ २३ ॥

संवृतिज्ञानस्याप्युभयोरिति केचित् । तत्र मतविकल्पज्ञापनार्थो वाशब्दः । प्रयोगमार्गे तु तयोः संवृतिज्ञानस्यापि भावना ।

आनन्तर्यपथे षण्णाम्,

वीतरागस्यावीतरागस्य वा शैक्षस्येन्द्रियोत्तापनायामान्तर्यमार्गे षण्णां भावना पूर्ववत् । न संवृतिज्ञानस्य. दर्शनमार्गसादृश्यात् । न परचित्तज्ञानस्य, सर्वानन्तर्यमार्गप्रतिषिद्धत्वात् ।

किमर्थं प्रतिषिध्यते ? अप्रतिपक्षत्वात् ।

भवाग्रविजये तथा ॥ २४ ॥

भवाग्रवैराग्येऽप्यानन्तर्यमार्गेषु षण्णां भावना तथैव ॥ २४ ॥

नवानां तु क्षयज्ञाने,

भवाग्रवैराग्ये नवमो विमुक्तिमार्गः क्षयज्ञानम् । तत्र नवानां ज्ञानानां भावना; अन्यत्वानुत्पादज्ञानात् ।

उभयोरपि सरागवीतरागयोः विमुक्तिमार्गे भावनेति । प्रयोगमार्गे तु तयोरिति । तयोरेव सराग-वीतरागयोः । संवृतिज्ञानस्यापि तत्र तदभिसमयान्तिकत्वाद् भाव्यत इत्येके । न चाभिसमयोऽस्ति, दर्शनमार्गसादृश्यं चेत्यपरे । इत्येवं विवादः ।

षण्णां भावना पूर्ववदिति । धर्मान्वय-दुःख-समुदय-निरोध-मार्ग-ज्ञानानाम् ।

न संवृतिज्ञानस्य, दर्शनमार्गसादृश्यादिति । किमत्र दर्शनमार्गेण सादृश्यम् ? फलप्राप्तिः । यथा दर्शनमार्गेण स्रोतापत्तिफलं वा, सकृदागाम्यनागामिफलं वा प्राप्यते; एवमनेनाप्यानन्तर्यमार्गेण शैक्षस्य शैक्षेन्द्रियोत्तापनायां तीक्ष्णेन्द्रियसंगृहीतानि संस्कृतानि स्रोतापत्तिफलादीनि प्राप्यन्ते । दर्शनमार्गे चानन्तर्यमार्गविरुद्धायां न संवृतिज्ञानभावनास्ति । एवमिहापि । इत्येवं दर्शनमार्गसादृश्यादानन्तर्यमार्गे न संवृतिज्ञानस्य भावना ।

तयैवेति । धर्मान्वय-दुःख-समुदय-निरोधमार्गज्ञानानाम् । अत्रापि संवृतिज्ञानं न भाव्यते; भवाग्रप्रतिपक्षत्वात् । न परचित्तज्ञानम्; सर्वानन्तर्यमार्गे प्रतिषेधत्वात् ॥ २४ ॥

अकोप्यस्य दशभावना ।

यस्त्वकोप्यधर्मा भवति, तस्य दशानां ज्ञानानां भावना. अनुत्पाद-ज्ञानलाभात् ।

तत्सञ्चारेऽन्त्यमुक्तौ च,

योऽप्यकोप्यतां सञ्चरति, तस्याप्यन्त्ये विमुक्तिमार्गे दशानां भावना ।

प्रोक्तशेषेऽष्टभावना ॥ २५ ॥

किं पुनः शेषम् ? कामवैराग्ये नवमो विमुक्तिमार्गः सप्तभूमि-वैराग्याभिज्ञाव्यवकीर्णभावितेषु विमुक्तिमार्गः । अकोप्यप्रतिवेधोऽष्टौ विमुक्त-मार्गाः । सर्वे च वीतरागस्य प्रयोगविशेषमार्गाः ।

तेषु सर्वेष्वष्टौ ज्ञानानि भाव्यन्ते, अनागतभावनया क्षयानुत्पादज्ञाने हित्वा ।

शैक्षस्यैवम ।

अशैक्षस्य पुनरभिज्ञादिप्रयोगविमुक्तविशेषमार्गेषु नव ज्ञानानि दश वा ।

किं पुनः शेषमिति विस्तरः । कथं **कामवैराग्ये नवमो विमुक्तिमार्गः शेषः** ? "सरागभावनामार्गे तदूर्ध्वं सप्तभावना" (अभि० को० ७.२२) इति वचनात् । **सप्तभूमिवैराग्याभिज्ञाव्यवकीर्णभावितेषु विमुक्तिमार्गः शेषः** ।

"सप्तभूनिजयाभिज्ञाकोप्याप्त्याकीर्णभावितेषु ।

आनन्तर्यपथेषु" (अभि० को० ७.२३) इति वचनात् । तथा यो-ऽकोप्यतां सञ्चरति, तस्याप्यन्ते विमुक्तिमार्गे दशानां भावनेति वचनात् । अष्टौ विमुक्तिमार्गाः शेषाः भवन्ति, **सर्वे च वीतरागस्यानागामिनः प्रयोगविशेषमार्गाः शेषाः**; तेषां भावनायामवचनात् ।

शैक्षस्यैवमिति । यदपदिष्टं "प्रोक्तशेषेऽष्टभावना" (अभि० को० ७.२५) इति ।

कथं पुनरेवमविशेषिते विशेषप्रतिपत्तिर्लभ्यते ? अशैक्षस्यावश्यं नव-दशज्ञानभावनायोगात् । अत एवाह—**अशैक्षस्य पुनरभिज्ञादीति** ।

अभिज्ञाव्यवकीर्णभावितानन्तर्यविमुक्तिमार्गेषु तु अष्टौ नव च[1]। द्वयोस्त्वभिज्ञाविमुक्तमार्गयोरव्याकृतत्वान्न किञ्चिदनागतं भाव्यते।

पृथग्जनस्य तु कामत्रिध्यानवैराग्यान्त्यविमुक्तिमार्गे[2] ध्यानभूमिकेषु च प्रयोगाभिज्ञात्रयविमुक्तिमार्गाप्रमाणादिगुणाभिनिर्हारेषु संवृतिज्ञानमनागतं भाव्यते। परचित्तज्ञानं चान्यत्र निर्वेधभागीयेभ्यः।

आदिशब्देन व्यवकीर्णभावनाध्यानादिग्रहणम्। अभिज्ञाभिनीहारे व्यवकीर्णभावनायां च ये प्रयोगविमुक्तिविशेषमार्गाः, तेषु यदि समयविमुक्तः, **नव ज्ञानानि भाव्यन्ते**। अनुत्पादज्ञानं हित्वा। यद्यकोप्यधर्मा **दश** तदेव प्रक्षिप्य। **अष्टौ नव चेति**। समयविमुक्तस्याष्टौ, अकोप्यधर्मणो नव, परचित्तज्ञानं हित्वा; तस्यानन्तर्यमार्गेषु प्रतिषेधात्। **द्वयोस्त्वभिज्ञाविमुक्तिमार्गयो**रिति। दिव्यश्रोत्र-दिव्यचक्षुरभिज्ञाविमुक्तिमार्गयोः। "अव्याकृते श्रोत्रचक्षुरभिज्ञे" (अभि० को० ७.५०) इति वचनात् तद्विमुक्तिमार्गौ अव्याकृतौ। न चाव्याकृतस्य धर्मस्य अनागतभावनास्ति।

पृथग्जनस्य तु कामत्रिध्यानवैराग्य इति। चतुर्थध्यानाग्रहणम्। यस्माच्चतुर्थध्यानवैराग्ये योऽन्त्यो विमुक्तिमार्गः तत्र मौलाकाशानन्त्यायतन-प्रतिलम्भः। न चारूप्यधातुसंगृहीतं परचित्तज्ञानमस्ति; रूपातीतार्थाभिनिष्पाद्यत्वात्। **प्रयोगाभिज्ञात्रयविमुक्तिमार्गाप्रमाणादिगुणाभिनिर्हारेषु**[3] इति। प्रयोगमार्गाश्च अभिज्ञात्रयविमुक्तिमार्गाश्चाप्रमाणादिगुणाभिनिर्हाराश्चेति विग्रहः। आदिशब्देन विमोक्षाभिभ्वायतनादिगुणग्रहणम्। अप्रमाणादीनां गुणानामभिनिर्हारा इति। ध्यानभूमिकग्रहणं सामन्तकनिरासार्थम्। तत्र हि परचित्तज्ञानं नास्ति। अभिज्ञात्रयम्—ऋद्धिविषयाभिज्ञा, पूर्वेनिवासानुस्मृत्यभिज्ञा, चेतःपर्यायाभिज्ञा चेति। तेषु च कामत्रिध्यानवैराग्यान्तविमुक्तिमार्गेषु ध्यानभूमिकेषु चाभिज्ञात्रयविमक्तिमार्गेषु। अप्रमाणविमोक्षाभिभ्वायतन-कृत्स्नायतनादिगुणाभिनिर्हारेषु च ध्यानभूमिकेष्वेव प्रयागविमुक्तिविशेषमार्गेषु संवृतिज्ञानमनागतं भाव्यते। यत् सत्संगृहीतं परचित्तज्ञानं च विशिष्टमेव भाव्यते। यत् तद्गुणविशेषलाभो सम्मुखीकुर्यात्। अन्यत्र निर्वेधभागीयेभ्यः। ऊष्मगतादिभ्यः।

---

१. वा—कां०।

२. ०विमुक्तिमार्गेषु—का०।

३. ०भिज्ञात्रयो०—जा०।

तेषु हि परचित्तज्ञानं न भाव्यते; दर्शनमार्गपरिवारत्वात् । अन्यथा-पूर्वमार्गलाभे संवृतिज्ञानमेवानागतं भाव्यते ।। २५ ।।

अथ कस्मिन् मार्गे कतिभूमिकं ज्ञानं भाव्यते ? संवृतिज्ञानं तावद् यद्भूमिको मार्गो यां च भूमिं[1] प्रथमतो[1] लभते तद्भूमिकमनागतं भाव्यते । अनास्रवं तु न केवलं यद्भूमिको मार्गः, किं तर्हि ?

तेषु हि निर्वेधभागीयेषु परचित्तज्ञानं न भाव्यते । किं कारणम् ? इत्याह—दर्शनमार्गपरिवारत्वात् इति । यथा दर्शनमार्गे परचित्तज्ञानं न भाव्यते, तथा तत्परिवारेऽपि न भाव्यते इत्यभिप्रायः । अन्यथेति विस्तरः । पृथग्जनस्यैवान्यत्रापूर्वमार्गलाभे कामधिक्यानवैराग्येऽन्त्यविमुक्तिमार्गान् हित्वा यः प्रयोगानन्तर्यविमुक्तिमार्गलाभः तस्मिन् अन्यत्रापूर्वमार्गलाभे । संवृतिज्ञानमेवानागतं भाव्यते, न परचित्तज्ञानम् । तथाभिज्ञावशात्प्रमाणादि-गुणाभिनिहरिषु य आनन्तर्यमार्गलाभः, तस्मिन् चान्यत्रापूर्वमार्गलाभे संवृतिज्ञानमेवानागतं भाव्यते । प्रयोगमार्गेषु न परचित्तज्ञानम्; तदप्राप्ति-पक्षत्वात् ।। २५ ।।

अथ कस्मिन् मार्गे इति ? लौकिके, लोकोत्तरे च । यद्भूमिको मार्ग इति । अनागम्यादिकः, सास्रवोऽनास्रवश्च । यां च भूमिं प्रथमतो लभत इति । वैराग्यतः प्रथमं ध्यानम्, यावत् भवाग्रम् । तद्भूमिकमित्यर्थः । कथं कृत्वा ? यद्यनागम्यभूमिसन्निश्रयेण हि लौकिकेन मार्गेण कामधातुवैराग्यात् प्रथम ध्यानं लभते अनागम्यभूमिकं सामन्तकस्वभावं प्रथमध्यानभूमिकं च मौलस्वभावम् । नवमे विमुक्तिमार्गे संवृतिज्ञानं भाव्यते । एवं द्वितीय-ध्यानसामन्तकसन्निश्रयेण प्रथमध्यानवैराग्यात् द्वितीयं ध्यानं लभते । तथैव द्वितीयध्यानसामन्तकसंगृहीतं मौलद्वितीयध्यानसंगृहीतं च भाव्यते । एवं यावत् यदि नैवसंज्ञानासंज्ञायतनसामन्तकसन्निश्रयेणाकिञ्चन्यायतनवैराग्यात् भवाग्रं लभते इति विस्तरेण योज्यम् ।

यदाप्यनास्रवानागम्यभूमिसन्निश्रयेण कामधातुवैराग्यात् प्रथमध्यानं लभते, तदापि तथैव तत्संवृतिज्ञानं भाव्यते । यदापि मौलप्रथमध्यानभूमिक-सन्निश्रयेण प्रथमध्यानवैराग्यानास्रवं प्रथमं ध्यानं लभते; तदापि प्रथम-ध्यानप्रथमप्रकारप्रतिपक्षभूतम्, यावत्, नवमप्रतिपक्षभूतं द्वितीयध्यान-सामन्तकसंगृहीतं संवृतिज्ञानं लभते । सा हि प्रथमतो भूमिस्तदा लभ्यते ।

१-१. प्रथमतो भूमिं—का० ।

यद्वैराग्याय यल्लाभस्तत्र चाधश्च भाव्यते ।

यद्भूमिवैराग्यायापि हि द्विविधोऽपि मार्गो भवति प्रयोगमार्गादिः यां च भूमिं लभते वैराग्यतस्तद्भूमिकान्यधोभूमिकानि वानास्रवाणि[1] ज्ञानानि भावनां गच्छन्ति ।

सास्रवाश्च क्षयज्ञाने,

क्षयज्ञाने तु सर्वभूमिकाः सास्रवा अपि गुणाः क्षयज्ञानलाभिका

नवमे तु विमुक्तिमार्गे मौलद्वितीयसंगृहीतमपि **संवृतिज्ञानमनागतं भाव्यते** । एवमनास्रवध्यानान्तरभूमिसन्निश्रयेण यावत् अनास्रवाकिञ्चन्यायतनभूमिसन्निश्रयेण संवृतिज्ञानभावना योज्या ।

"**यद्वैराग्याय**" इति । यस्य भूमेर्वैराग्याय । **यल्लाभः** यस्य भूमेर्लाभो यल्लाभः । **तत्र** उभयत्र । **अधः च** ततो **भाव्यते** अनास्रवज्ञानम् । कथमिति ? वृत्त्या व्याचष्टे—**यद्भूमिवैराग्यायापि हि** न केवलं यद्भूमिक इत्यपिशब्दार्थः ।

द्विविधोऽपि मार्गो भवतीति । लौकिकः, लोकोत्तरश्च । **प्रयोगमार्गादिः** । आदि-शब्देनानन्तर्यविमुक्तिविशेषमार्गग्रहणम् । **यां च भूमिं लभते वैराग्यत** इति । उपरिभूमिकम् । **तद्भूमिकान्यधोभूमिकानि वानास्रवाणि ज्ञानानि भावनां गच्छन्ति** । तद्यथा—द्वितीयमनास्रवं ध्यानं निःसृत्य तृतीयध्यानवैराग्यं करोति । यद्भूमिको मार्गो द्वितीयध्यानभूमिकस्तद्भूमिकमनास्रवं ज्ञानं भावनां गच्छति । यस्याश्च भूमेर्वैराग्यं करोति तृतीयाया भूमेस्तद्भूमिकं तृतीयध्यानभूमिकं नवमे विमुक्तिमार्गेऽनास्रवं ज्ञानं भावनां गच्छति । अधोभूमिकं च प्रथमध्यानभूमिकं अनागम्यभूमिकं वानास्रवं ज्ञानं भावनां गच्छति । अधोभूमिकमपि हि तत्प्रयोगमार्गादिकं सम्भवामि तज्जातीयमिति भावनां गच्छति । अथ तु तृतीयध्यानसामन्तकं निःसृत्य द्वितीयध्यानवैराग्यं करोति, तत्राष्टास्वानन्तर्यमार्गेषु विमुक्तिमार्गेषु च तस्य सामन्तकस्य सास्रवत्वाद् तद्भूमिकमनास्रवं ज्ञानं न भावनां गच्छति; अभावात् । अधोभूमिकं तु तज्जातीयं द्वितीयध्यानभूमिकं ध्यानान्तरभूमिकं प्रथमध्यानभूमिकमनागम्यभूमिकं च तज्जातीयमनास्रवं ज्ञानं भावनां गच्छति । एवमन्यत्रापि योज्यम् । एषा दिगिति ।

"**सास्रवाश्च क्षयज्ञाने**" इति । अनास्रवाश्चेति च-शब्दः । यान् गुणान् अर्हद्भूत्वा सम्मुखीकुर्यात्, ते सास्रवास्तस्यामवस्थायां भावनां गच्छन्ति ।

---

१. घाना०—का० ।

भावनां गच्छन्ति, अशुभानापानस्मृतिस्मृत्युपस्थानाप्रमाणविमोक्षादयः रज्जुच्छेदादुच्छ्वसन्तीव पेडासाधर्म्येण, स्वचित्ताधिराज्यप्राप्तस्य प्राप्तिभिः सर्वकुशलधर्मप्रत्युद्गमनादाधिराज्ये[1] प्राप्तौ[1] प्राभृतेन विषयप्रत्युद्गमनवत्। यत् किञ्चिल्लभ्यते तत् सर्वं भाव्यते। यदपूर्वं लभ्यते तद् भाव्यते।

लब्धपूर्वं न भाव्यते ॥ २६ ॥

यद्विहीनं पुनर्लभ्यते न तद् भाव्यते, भावितोत्सृष्टत्वात् ॥ २६ ॥

अप्रमाणविमोक्षादय इति। आदिशब्देन अभिभ्वायतन-कृत्स्नायतनादयो गृह्यन्ते। **उच्छ्वसन्तीव पेडासाधर्म्येणेति**। या पेडा रज्ज्वा निपीड्य वद्धा सा रज्जूच्छेदादुच्छ्वसन्तीव पेडोच्यते। उच्छ्वसतीव प्रतिरूपकशब्दाभिधानात्। तस्य रज्जूच्छेदाद् उच्छ्वसन्तीव पेडायाः साधर्म्येण। यथाऽसौ रज्ज्वा निपीडय वद्धा पेडा रज्जूच्छेदादुच्छ्वसन्तीव, एवं यथोक्ता अशुभादयो गुणाः वज्रोपमेन समाधिना क्लेशप्राप्तिरज्जूच्छेदादशैक्षसन्ताने वर्त्स्यन्त उच्छ्वसन्तीव। उच्छ्वासस्य प्राणिधर्मत्वादौपमिकम्। कस्माद्? इत्याह—**स्वचित्ताधिराज्यप्राप्तस्येति** सर्वम्। सर्वेषां राज्ञामधिको राजा अधिराजः, तद्भावः आधिराज्यम्। स्वचित्ते आधिराज्यं क्लेशपराधीनताविगमात्। स्वचित्तैश्वर्यमित्यर्थः। तत्प्राप्तस्यार्हतः **प्राप्तिभिः** प्राभृतस्थानीयाभिः **सर्वेषां कुशलानां** धर्माणां **प्रत्युद्गमनान्ते** गुणाः भावनां गच्छन्ति। **आधिराज्ये प्राप्तौ** कस्यचिद् राजाधिराजस्य **प्राभृतेन** वस्त्रादिना **विषयाणां** जनपदानाम् **यथा प्रत्युद्गमनम् तद्वत्।** तदेव क्लेशप्राप्तिरज्जूच्छेदे सति स्वप्राप्तिलाभादुच्छ्वसन्तीव गुणाः, उत्तप्ततराणां तेषां प्राप्तिरुत्पद्यत इत्यर्थः। कामधातावर्हत्वप्राप्तावेवाशुभादयो यथासम्भवं श्रुत-चिन्ता-भावनामयास्त्रैधातुका भावनां गच्छन्ति। रूपारूप्यधात्वोस्त्वर्हत्वाप्राप्तौ यथाक्रमं द्विधातुकैकधातुकाः। एवं धातुतोऽपि वोद्धव्यम्। नैवसंज्ञानासंज्ञायतनोपपन्नस्यार्हत्वप्राप्तौ तद्भूमिका एवेत्यवगन्तव्यम्। यत् किञ्चत् लभ्यते इति विस्तरः।

यद्विहीनं पुनर्लभ्यते सम्मुखीक्रियते संसारोचितम्। न तदनागतं भाव्यते भावितोत्सृष्टत्वात् संसारे। . यदेवात्र ध्यानाप्रमाणाद्यनुचितं संसारे विशिष्टमनास्रवानुगुणम्, तत्सम्मुखीभावे तज्जातीयमेवानागतं विशिष्टं भाव्यत इत्याचार्यो दर्शयति।

आचार्यसङ्घभद्रोऽप्येतमेवार्थं व्याचष्टे—लब्धपूर्वं न भाव्यते। यत्

१-१. ०राज्य प्राप्तौ—का०।

किं खलु प्रतिलम्भ एव भावना ? नेत्युच्यते । चतुर्विधा हि भावना—प्रतिलम्भभावना, निषेवणभावना, प्रतिपक्षभावना, विनिर्धावनभावना च । तत्र—

प्रतिलम्भनिषेवाख्ये शुभसंस्कृतभावने ।
प्रतिपक्षविनिर्धावभावने सास्रवस्य तु ॥ २७ ॥

प्रतिलब्धविहीनं पुनर्लभ्यते, न तद् भाव्यम् । अर्थाद् गम्यते—यद् अलब्धपूर्वं लभ्यते तद् भाव्यते; यथाभिमुखीकरणात् । अप्रतिप्रस्रब्धो हि मार्गो यत्नेनाभिमुखीक्रियत इति । तदावेधस्य बलवत्त्वादनागतो भावनां गच्छति । प्रतिप्रस्रब्धपूर्वस्त्वयत्नेन सम्मुखीभवति । भावितप्रतिप्रस्रब्धत्वात् कृतकृत्यदत्तफलत्वाच्च वेगहीन इति तत्सम्मुखीभावादनागतो न भाव्यत इति । योऽनागतो यत्नेन जन्यते स भाव्यत इत्यभिप्रायः ।

तदेवं सति यदुक्तम् 'संवृतिज्ञानं तावत्' इति विस्तरेण, तदार्यसन्तानपतितमेव गृह्यते; संसारानुचितत्वादिति **आचार्यवसुमित्रेणात्र** लिखितम् ।

अत्र किल **वैभाषिकाः** आहुः—नैतदेवम् । कुतः ? यस्मादलब्धमेव तद् भवति, त्यक्तत्वात्; तस्मात् भावितोत्सृष्टस्यापि पुनर्लाभे भवत्येव भावनेति । कथं तदपूर्वं भवति, यावता लब्धपूर्वमिति ! न ह्येवंविधं लोके पूर्वं प्रसिद्धमिति ।

अपरे पुनर्व्याचक्षते—एकं जन्मेदमधिकृत्योक्तम्, न जन्मान्तरम् । यद्धीनमस्मिन्नेव जन्मनि पुनर्लभ्यते न तद् भाव्यते; भावितोत्सृष्टत्वात् । जन्मान्तरे तु यल्लभ्यते तद्भाव्यते । न लभ्यते तन्न भाव्यते, विस्मृतभावनत्वादिति ॥ २६ ॥

चतुर्विधा हि भावनेति । प्रतिलम्भ एव भावना **प्रतिलम्भभावना** । अनागतप्राप्तिरेव भावनेत्यर्थः । एवं **निषेवणमेव, प्रतिपक्ष एव, विनिर्धावनमेव** भावनेति वक्तव्यम् । किं निषेवणम् ? किं च यावत् विनिर्धावनमिति ? निषेवणम् = पुनः पुनः सम्मुखीकरणम् । प्रतिपक्षः = मार्गः । यथोक्तं सूत्रे—"भावितकायो भावितचित्तः" इति । भावितप्रतिपक्षकायचित्त इत्यर्थः । कायप्रतिपक्षः पुनः चतुर्थ्यनिवैराग्याय यो मार्गः । तथा ह्युक्तम्—"भावितकायो भिक्षुरित्युच्यते—भावितचित्तः, भावितशीलः । कथं भावितकायो भवति ? कायाद् विगतरागो विगतस्पृहः विगतपिपासो विगतप्रेमा विगतनियन्तिः । अथवा—योऽसौ रूपरागक्षयानन्तर्यमार्गः सोऽनेन विगतरागो भवति" इति आगमः । विनिर्धावनम्=क्लेशप्राप्तिच्छेदः ।

सामान्येन सर्वेषां पुद्गलानां क्षयज्ञाने गुणभावनोक्ता ॥ २७ ॥

अष्टादशावेणिकास्तु बुद्धधर्मा बलादयः ।

ये बुद्धस्यैव भगवतः क्षयज्ञाने भावनां गच्छन्ति, नान्यस्य । कतमेऽष्टादश ? दश बलानि, चत्वारि वैशारद्यानि, त्रीणि स्मृत्युपस्थानानि,

---

सामान्येन सर्वेषामिति[1] । श्रावक-प्रत्येकबुद्ध-सम्यक्सम्बुद्धानां क्षयज्ञानक्षणे **गुणभावनोक्ता**, "सास्रवाश्च क्षयज्ञाने" (अभि० को० ७.२६) इति वचनात् ॥ २७ ॥

दश बलानीति विस्तरः । एते **बलाद्या महाकरुणान्ता अष्टादशावेणिका** वैभाषिकैर्व्यवस्थाप्यन्ते । बलादिव्यतिरिक्तान् केचिद् अन्यान् अष्टादशावेणिकान् बुद्धधर्मान् वर्णयन्ति । तद्यथा—नास्ति तथागतस्य स्खलितम्, नास्ति रवितम्, नास्ति द्रवता, नास्ति नानात्वसंज्ञा, नास्त्यव्याकृतं मनः, नास्त्यप्रतिसंख्यायोपेक्षा, नास्त्यतीतेषु प्रतिहतं ज्ञानदर्शनम्, नास्त्यनागतेषु प्रतिहतं ज्ञानदर्शनम्, नास्ति प्रत्युत्पन्नेषु प्रतिहतं ज्ञानदर्शनम्, सर्वं कायकर्म ज्ञानानुपरिवर्त्ति, सर्वं वाक्कर्म ज्ञानानुपरिवर्त्ति, सर्वं मनस्कर्म ज्ञानानुपरिवर्त्ति, नास्ति छन्दहानिः, नास्ति वीर्यहानिः, नास्ति स्मृतिहानिः, नास्ति समाधिहानिः, नास्ति प्रज्ञाहानिः, नास्ति विमुक्तिज्ञानदर्शनहानिरिति । तत्र रवितं नाम सहसा क्रिया । द्रवता=क्रीडाभिप्रायता । नानात्वसंज्ञा सुखदुःखादुःखासुखेषु विषयेषु रागद्वेषमोहतो नानात्वसंज्ञा । शेषं सुगमम् । दश बलानि--स्थानास्थानज्ञानबलम्, कर्मविपाकज्ञानबलम्, ध्यानविमोक्षसमाधिसमापत्तिज्ञानबलम्, इन्द्रियपरापरज्ञानबलम्, नानाधिमुक्तिज्ञानबलम्, नानाधातुज्ञानबलम्, सर्वत्रगामिनीप्रतिज्ञानबलम्, पूर्वनिवासानुस्मृतिज्ञानबलम्, च्युत्युपपत्तिज्ञानबलम्, आस्रवक्षयज्ञानबलं च ।

सूत्रं तु—"दश आयुष्मन्तः तथागतबलानि । कतमानि दश ? इहायुष्मन्तः स्थानं च स्थानतो यथाभूतं प्रजानाति, अस्थानं चास्थानतः—इदं प्रथमं तथागतबलम् । येन बलेन समन्वागतस्तथागतोऽर्हन् सम्यक्सम्बुद्धः उदारमार्षभस्थानं प्रतिजानाति, ब्राह्मं चक्रं प्रवर्तयति, पर्षदि सम्यक् सिंहनादं नदति । पुनरपरमायुष्मन्तस्तथागतोऽतीतानागतप्रत्युत्पन्नानि कर्मसमादानानि स्थानतो हेतुतो वस्तुतो विपाकतश्च यथाभूतं प्रजानाति । यदायुष्मन्तस्तथागतः, पूर्ववत्, यावत् विपाकतश्च यथाभूतं प्रजानाति—इदं

---

१ सर्वंस्वमिति—जा० ।

स्थानास्थाने दश ज्ञानानि,

स्थानास्थानज्ञानबलं दश ज्ञानानि ।

अष्टौ कर्मफले,

कर्मविपाकज्ञानबलमष्टौ ज्ञानानि, निरोधमार्गज्ञाने हित्वा ।

नव ॥ २८ ॥

करणीयम्, नापरमस्माद् भवं प्रजानामीति । यदायुष्मन्तस्तथागतः पूर्ववत्—इदं दशमं तथागतबलम् । येन बलेनेति पूर्ववत्" । ( )

"**स्थानास्थाने दश ज्ञानानि**" इति । स्थानं चास्थानं च स्थानास्थानम्, तत्र ज्ञानमेव बलं ज्ञानबलम् । तद् दश ज्ञानानि दश-ज्ञानस्वभावमित्यर्थः । कथं कृत्वा ? स्थानास्थानं समासेन संस्कृतं चासंस्कृतं च । तदपि संस्कृतमष्टधा भेत्तव्यम्–कामरूपारूप्यावचरानास्रवाणां सम्प्रयुक्त-विप्रयुक्तभेदात् । तत्र संवृतिज्ञानबलस्य दशापि धर्मा विषयः । दशस्वपि धर्मेषु तस्य वृत्तेरित्यर्थः । धर्मज्ञानस्य पञ्च, कामावचरानास्रवाश्चत्वारः कुशलं चासंस्कृतम् । अन्वयज्ञानस्य सप्त, रूपारूप्यानास्रवाः षट् कुशलं चासंस्कृतम् । दुःखसमुदय-ज्ञानयोः षट् कामरूपारूप्यावचराः । निरोध-ज्ञानस्यैकः कुशलमेवासंस्कृतम् । मार्गज्ञानस्य द्वावनास्रवौ । परचित्तज्ञानस्य त्रयः कामरूपावचरानास्रवाः सम्प्रयुक्ताः । क्षयानुत्पादज्ञानयोर्नव धर्माः विषयः, अव्याकृतमसंस्कृतं मुक्त्वा । एवं कृत्वा स्थानास्थानज्ञानबलं दशज्ञानानि ।

कथं पुनर्दश धर्माः स्थानास्थानमित्युच्यते ? सम्भवः स्थानम्, असम्भवोऽस्थानमिति । अथवा 'अस्थानमनवकाशो यत्[1] स्त्री बुद्धत्वं कारयिष्यति, स्थानमेतद् यत् पुरुषः' इति । 'अस्थानमवकाशो यत्[1] स्त्री ब्रह्मत्वं कारयिष्यति, स्थानमेतद् यः पुरुषः' इति । तथा 'स्थानमेतद् यत् दुःखस्य निरोधः' इति । एवमाद्याकारप्रवृत्तं स्थानास्थानज्ञानबलम-वगन्तव्यम् ।

"**अष्टौ कर्मफले**" इति । कर्मणः सास्रवस्य तद्विपाकस्य च दुःख-समुदय-सत्यसंगृहीतत्वात् । निरोधमार्गज्ञाने न भवत इति । अतोऽन्यानि तदालम्बनानि अष्टौ ज्ञानानि सम्भवन्ति ॥ २८ ॥

---

१. यः—जा० ।

"ध्यानाध्यक्षाधिमोक्षेषु" इति विस्तरः। ध्यानसमाधिसमापत्तय इति। ध्यानादयो ध्यानविमोक्ष-समाधिसमापत्तयः। ध्यानानि चत्वारि, विमोक्षा अष्टौ, समापत्तयः शून्यतादयः। समापत्ती द्वे – संज्ञि-निरोधसमापत्ती। नवानुपूर्वविहारसमापत्तयः। अक्षाणि = इन्द्रियाणि। अधिमोक्षश्चैतसिकः। ध्यानादयश्चाक्षाणि चाधिमोक्षश्चेति द्वन्द्वः। तेषु नव ज्ञानानि, निरोध-ज्ञानं हित्वा। कथं कृत्वा? ध्यानादीनां सास्रवानास्रवसम्प्रयुक्तविप्रयुक्तभेदात् तदालम्बनानि नव ज्ञानानि सम्भवन्ति। निरोधज्ञानं तु न भवति। तेषां संस्कृतत्वात्। इन्द्रियेष्वपि श्रद्धादिषु यत्प्रवाणाप्रवाणज्ञानं मृदु-मध्याधिमात्रेन्द्रियभेदेन। तत् परापरज्ञानबलम्। तेष्वपि सास्रवानास्रव-भेदभिन्नेषु नवज्ञानानि सम्भवन्ति, निरोधज्ञानं हित्वा। प्रवाणादिषु नवयो नानाधिमुक्तयः। ताः पुनः सास्रवानास्रवास्त्रिनातुगमश्च तदालम्बनत्वात् निरोधज्ञानं हित्वा। एवं नानाधातुज्ञानबलम्। तत्र हि धातुः पूर्वाभ्यास-वासनासमुद्गतः आशयो धातुः—इत्याचार्यसङ्घभद्रः। न पुनस्त एव चित्तचैत्ताः विशिष्टाः। तेषां तथैव सास्रवानास्रवभेदभिन्नानां निरोधज्ञानं हित्वा नव ज्ञानानि भवन्तीति पूर्ववत् योज्यम्।

"प्रतिपत्सु" इति विस्तरः। वह्व्योऽत्र प्रतिपदो नरकादिगामिन्यः। नरकगामिनी प्रतिपत्, यावत्, देवगामिनी, निरोधगामिनी च। तत्र या नरकादिगामिन्यः प्रतिपदः, ता हेतुः। प्रतिपद्यन्ते ताभिरिति कृत्वा। मार्गो हि प्रतिपद् उच्यते, तेन हि विसंयोगः प्रतिपद्यते। निरोधस्तु कथम्? स चापि प्रतिपद्। प्रतिपद्यते तमिति कृत्वा। प्रतिपत्फलं वा प्रतिपदित्युच्यते। अत एवाह—**यदि सफला प्रतिपद् गृह्यत** इति। हेतुर्हि सर्वत्रगामिनो प्रतिपदिहेष्यते। तथा हि व्याचक्षते—**सर्वत्रगामिनीप्रतिपज्ज्ञानबलमिति**।

संवृतिज्ञानं द्वयोः,

पूर्वनिवासानुस्मृतिज्ञानवलं च्युत्युपपत्तिज्ञानवलं च संवृतिज्ञानम् ।

षट् दश वा क्षये ॥ २९ ॥

आस्रवक्षयज्ञानवलं षड् ज्ञानानि धर्मान्वयनिरोधक्षयानुत्पादसंवृति-ज्ञानानि । यदि निरोधज्ञानमेव, आस्रवक्षयज्ञानम् ।

अथ क्षीणास्रवसंताने ज्ञानमास्रवक्षयज्ञानम्, ततो दश ज्ञानानि ॥ २९ ॥

उक्तः स्वभावः ॥

भूमिरिदानीमुच्यते—

प्राङ्निवासच्युतोत्पादवलध्यानेषु[1],

च्युतिरेव च्युतम् । पूर्वनिवासच्युत्युपपत्तिज्ञानं वलं चतुर्ध्यान-भूमिकम् ।

शेषितम् ।

सर्वभूमिषु,

शेषं वलं सर्वभूमिसंगृहीतम् । ताः पुनरेकादश । कामधातुरनागम्य-ध्यानान्तरं ध्यानारूप्याश्च । सर्वाणि जम्बूद्वीपपुरुषाश्रयाणि; अन्यत्र

सत्कायसमुदयगामिनीत्यर्थ इति । तत्र सत्कायः पञ्चोपादानस्कन्धाः । समुदय उत्पाद इहाभिप्रेतः । "एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति" इति वचनात् । सत्कायनिरोधः = विसंयोगः । तत्र सर्वत्र-गन्तुं शीलमस्या इति सर्वत्रगामिनी, सर्वत्रगामिनी चासौ प्रतिपच्च सर्वत्र-गामिनी प्रतिपद् । तत् ज्ञानम्, तदेव च वलमिति सर्वत्रगामिनीप्रतिपज्ज्ञान-वलम् । तद् दश ज्ञानानि योज्यानि ।

यदि निरोधज्ञानमेवास्रवक्षज्ञानमिति । आस्रवाणां क्षये निरोधे ज्ञानम् । आस्रवनिरोधालम्बनं ज्ञानमित्यर्थः । एवं सति षड् ज्ञानानि भवन्ति । निरोधज्ञानजातिरेव धर्मज्ञानादिभेदभेदिनीं कृत्वा ।

अथ क्षीणास्रवसन्तान इति । आस्रवक्षये सति यज्ज्ञानं तदास्रव-क्षयज्ञानमित्यर्थः । क्षीणास्रवसन्ताने सर्वाणि ज्ञानानि समुदाचरन्तीति दश ज्ञानानि भवन्ति ॥ २९ ॥

---

१. प्राङ्निवास०—का० ।

बुद्धानुत्पादात्। तदेव[1] दशविधं ज्ञानमन्यस्य वलं नोच्यते। बुद्धस्यैव वलमिति।

केनास्य वलमव्याहतं यतः ॥ ३० ॥

यस्मादस्य सर्वत्र ज्ञेये ज्ञानमव्याहतं वर्तते, तस्माद् वलम्। अन्येषां तु व्याहन्यते। ज्ञानं क्वचिदिच्छतामप्यप्रवृत्तेरिति नार्हति तद्वलाख्यां लब्धुम्। **स्थविरशारिपुत्रेण** प्रव्रजनप्रेक्षपुरुषप्रत्याख्यानम्[2], श्येनोपद्रुतस्य पक्षिण उपपत्त्यादिपर्यन्ताज्ञानं चात्रोदाहरणम्। एवं तावदव्याहतज्ञानत्वाद् बुद्धानां ज्ञेयवदनन्तं मानसं वलम् ॥ ३० ॥

अन्यत्र बुद्धानुत्पादादिति। जम्बूद्वीपादन्यत्र बुद्धानुत्पाद इति **जम्बूद्वीपपुरुषाश्रयाणि** दश वलानि बुद्धाश्रयोत्पत्तेरित्यभिप्रायः।

तदेव दशविधज्ञानमन्यस्य वलं नोच्यत इति। अन्यस्यापि एतदस्ति, न तु वलम्; **व्याहतत्वात्**। यत्त्वव्याहतं तद् वलम्। आवेणिक इत्यभिप्रायः। **प्रव्रजनप्रेक्ष-पुरुषप्रत्याख्यानमिति** विस्तरः। प्रव्रजनम्=प्रव्रज्या प्रेक्ष्यते प्रव्रज्याप्रेक्षः। तस्य प्रव्रजनप्रेक्षस्य पुरुषस्य प्रत्याख्यानं प्रव्रजनप्रेक्षपुरुष-प्रत्याख्यानम्। तदुदाहरणम्। यथा अन्यस्य व्याहन्यते ज्ञानं इति। **आर्यशारिपुत्रेण** किल कस्यचित् प्रव्रज्याप्रेक्षस्य पुरुषस्य मोक्षभागीयं कुशलमूलं व्यवलोकयता न दृष्टमिति प्रत्याख्यातः। न प्रव्रजित इत्यर्थः। भगवता तु दृष्टम्, प्रव्रजितश्च। तं चाधिकृत्य भिक्षुभिः पृष्टेन **भगवतोक्तम्**—"अनेनैवेदं कर्म कृतम्, यदर्हत्त्वं प्राप्तः। नहि कर्माणि पृथिवीधातौ विपच्यन्ते, नाब्धातौ, न तेजोधातौ, न वायुधातौ। अपि तूपात्तेष्वेव स्कन्ध-धात्वायत-नेषु" इति विस्तरः। इदं चोक्तम्—

"मोक्षवीजमहं ह्यस्य स्वसूक्ष्ममुपलक्षये।
धातुपाषाणविवरे निलीनमिव काञ्चनम् ॥" ( ) इति।

उपपत्त्यादिपर्यन्ताज्ञानं चेति। आदि-शब्देन च्युतिपर्यन्ता-

नारायणं[1] बलं[1] काये,

काये पुनर्बुद्धस्य नारायणं बलं वर्णयति ।

सन्धिष्वन्ये,

सन्धौ सन्धौ नारायणबलमित्यपरे ।

मानसवत् कायिकमप्यस्यानन्तं बलमिति भदन्तः । अन्यथा ह्यनन्त-ज्ञानबलसहिष्णुर्न स्यादिति । नागग्रन्थि-शङ्खला-शङ्कुसन्धयश्च बुद्ध-प्रत्येकबुद्ध-चक्रवर्तिनः ।

किं पुनर्नारायणस्य बलस्य प्रमाणम् ?

दशाधिकम् ।

हस्त्यादिसप्तकबलम्,

यद्दशानां प्राकृतहस्तिनां बलं तदेकस्य गन्धहस्तिनः । एवं महानग्न-प्रस्कन्दिवराङ्गचाणूरनारायणानां[2] दशोत्तरवृद्धिर्वक्तव्या । प्राकृतगन्ध-

---

नारायणं बलमिति । बलस्येयं संज्ञा 'नारायणम्' इति । यस्य च तद् बलम् असावपि 'नारायण' इत्युच्यते; चाणूरमहाङ्गत्वात् । भदन्त इति । दार्ष्टान्तिकस्थविरः । अन्यथा हीति । यदि मानसवत् कायिकबलं नेष्यते, अनन्तस्य ज्ञानबलस्य सहिष्णुर्न स्यात् । सहनशीलो भगवान् न भवेदित्यर्थः ।

"सन्धिष्वन्ये" इत्युक्तम्, अस्थिसन्धिविशेषोपन्यासः । नागग्रन्थिरिति विस्तरः । नागग्रन्थिसन्धयो बुद्धाः । नागपाशो नागग्रन्थिः । शङ्खलासन्धयः प्रत्येकबुद्धाः । शङ्कुसन्धयश्चक्रवर्तिनः ।

"दशाधिकं हस्त्यादिसप्तकबलम्" इति । हस्ति-गन्धहस्ति-महानग्न-प्रस्कन्दि-वरांग-चाणूर-नारायणानां सप्तकं तस्य बलं दशभिरधिकम्, दशभ्यो वाधिकम् । कथम् ? इत्याह—यद् दशानां प्राकृतहस्तिनां सामान्यहस्तिनां बलं तदेकस्य गन्धहस्तिनो बलम् । एवं यद् दशानां गन्धहस्तिनां बलं

१-१. नारायणबलं—का० । २. ०चानूर०—का० ।

प्रतिपज्ज्ञानं वलम्, एवं "यो वा पुनर्मया श्रावकाणां निर्याणाय मार्ग आख्यातः" इत्येतद्वैशारद्यं वेदितव्यम् ।

कथं ज्ञानमेव वैशारद्यम् ? निर्भयता हि वैशारद्यम् । एभिश्च ज्ञानैर्निर्भयो भवति । ज्ञानकृतं तु[1] वैशारद्यं युज्यते, न ज्ञानमेव ।

त्रीणि स्मृत्युपस्थानानि पर्षद्भेदात् भवन्ति यथाश्रुतम्[2] । तत्त्वेतत्

असफलतद्ग्रहणतो वा नवेति योज्यम् ।

निर्भयता हि वैशारद्यम् । एभिश्च ज्ञानैर्निर्भयो भवतीति ज्ञानानि वैशारद्यमिति वैभाषिकाः ।

आचार्य आह—**ज्ञानकृतं तु वैशारद्यम्, न ज्ञानमेवेति** । अथवा **आचार्य**-वचनमेवैतत् सर्वम् । निर्भयता हि वैशारद्यम् । तथा हि तद्भयप्रतिपक्षो धर्मश्चैतसिकः । भयमपि चैतसिको धर्म इति । एभिश्च ज्ञानैर्हेतुभूतैर्निभयो भवतीति तत् कथं ज्ञानमेव वैशारद्यम् ! ज्ञानकृतं तु वैशारद्यं युज्यते, न ज्ञानमेवेति ।

यथाश्रुतमिति । "त्रीणीमानि भिक्षवः स्मृत्युपस्थानानि । यानार्यः सेवते, यानार्यः सेवमानोऽर्हति गुणमनुशासयितुम् । कतमानि त्रीणि ? इह भिक्षवः शास्ता श्रावकाणां धर्मं देशयति, अनुकम्पकः कारुणिकोऽर्थकामो हितैषी करुणायमानः—'इदं वो हिताय, इदं वः सुखाय, इदं वो हितसुखाय' । तस्य मे श्रावकाः शुश्रूषन्ते, श्रोत्रमवदधति, आज्ञाचित्तमुपस्थापयन्ति, प्रतिपद्यन्ते धर्मस्यानुधर्मं प्रति । न व्यतिक्रम्य वर्तन्ते शास्तुः शासने । तेन तथागतस्य न नन्दी भवति, न सौमनस्यम्, न चेतस उत्प्लावितत्वम् । उपेक्षकस्तत्र तथागतो विहरति स्मृतः सम्प्रजानन् । इदं प्रथमं स्मृत्युपस्थानम् । यदार्यः सेवते, यदार्यः सेवमानोऽर्हति गुण-मनुशासयितुम् ।

"पुनरपरं शास्ता धर्मं देशयति पूर्ववत्, तस्य श्रावका न शुश्रूषन्ते, न श्रोत्रमवदधति, नाज्ञाचित्तमुपस्थापयन्ति, न प्रतिपद्यन्ते धर्मस्यानुधर्मम् । व्यतिक्रम्य वर्तन्ते शास्तुः शासने । तेन तथागतस्य नाघातो भवति, नाक्षान्तिः, नाप्रत्ययः, न चेतसोऽनभिराद्धिः । उपेक्षकस्तत्र तथागतो विहरति स्मृतः सम्प्रजानन्—इदं द्वितीयं स्मृत्युपस्थानम् । यदार्यः सेवते, यदार्यः सेवमानोऽर्हति गुणमनुशासयितुम् ।

---

१. का० पुस्तके नास्ति । २. यथासूत्रम्—का० ।

स्मृतिप्रज्ञात्मकं त्रयम् ॥ ३२ ॥

स्मृतिसम्प्रजन्यस्वभावान्येतानि[1] त्रीणि स्मृत्युपस्थानानि। यदा श्रावकस्यापि शुश्रूषमाणाशुश्रूषमाणोभयेषु नन्दी[2] न भवति, आघातो वा।

कस्मादेते आवेणिका बुद्धधर्मा उच्यन्ते ? सवासनप्रहाणात्। अथवा यस्य श्रावकास्तस्य तच्छश्रूषमाणाशुश्रूषमाणोभयेषु सौमनस्याद्यवकाशः सुतरां न तथाऽन्यस्येति तस्यैव तदनुत्पादादाश्चर्यं व्यवस्थाप्यते, नान्यस्येति ॥ ३२ ॥

महाकरुणेदानीं वक्तव्या, सेयमुच्यते—

महाकृपा संवृतिधीः,

"पुनरपरं भिक्षवः यावच्छासने। तत्र तथागतस्य न नन्दी भवति, न सौमनस्यम्, न चेतस उत्प्लावितत्वम्। नाघातो नाक्षान्तिः नाप्रत्ययो न चेतसोऽनभिराद्धिः। उपेक्षकस्तत्र तथागतो विहरति स्मृतः सम्प्रजानन्—इदं तृतीयं स्मृत्युपस्थानम्। यदार्यः सेवते यदार्यः सेवमानोऽर्हति गुणमनुशासयितुम्" इति। ( )

स्मृतिसम्प्रजन्यमिति। उभयस्वभावमिति दर्शयति। 'स्मृतः सम्प्रजानन्' इति वचनात्। **यदा श्रावकस्यापीति** विस्तरः। यदा श्रावकस्यापि हीनक्लेशस्य **शुश्रूषमाणेषु** च शिष्येषु **अशुश्रूषमाणेषु च उभयेषु** च शुश्रूषमाणाशुश्रूषमाणेषु च। **नन्दी** अनुनयो **न भवति आघातो वा** द्वेषो वा।

कस्मादेते आवेणिका असाधारणा **बुद्धधर्मा उच्यन्ते।** सवासनाप्रहाणादिति। सवासनानां नन्द्यादीनां[3] प्रहाणात्। का पुनरियं वासना नाम श्रावकाणाम्? यो हि यत्क्लेशचरितः पूर्वम्, तस्य तत्कृतः कायवाक्चेष्टाविकारहेतुसामर्थ्यविशेषश्चित्ते वासनेत्युच्यते। 'अव्याकृतश्चित्तविशेषो वासना' इति भदन्तानन्तवर्मा।

अयवेति विस्तरेणाचार्यः। **यस्य श्रावकाः** बुद्धस्य भगवतः श्रावकाः भवन्ति नान्यस्य। किं कारणम्? सर्वे हि श्रावकाः बुद्धमुद्दिश्य प्रव्रजिता

---

१. स्मृतिसम्प्रजान०—का०। २. ०ष्वनन्दी—का०।
३. आनन्द्या०—का०।

संवृतिज्ञानात्मिका महाकरुणा। अन्यथा हि न सर्वसत्त्वालम्बना सिद्ध्येत्, न च त्रिदुःखताकारा, करुणावत्।

कस्मादियं महाकरुणेत्युच्यते ?

सम्भाराकारगोचरैः।

समत्वादाधिमात्र्याच्च,

सम्भारेण महापुण्यज्ञानसम्भारसमुदागमात्। आकारेण त्रिदुःखताकरणात्। आलम्बनेन वैधातुकासत्त्वालम्बनात्[1]। समत्वेन सर्वसत्त्वेषु समवृत्तित्वात्। अधिमात्रत्वेन ततोऽधिमात्रतराभावात्।

इति। तेषां श्रावकाणां शुश्रूषमाणे चाशुश्रूषमाणे चोभयस्मिंश्च शुश्रूषमाणाशुश्रूषमाणेषु उभयेषु तस्यैव श्रावकवतस्तदनुत्पादः। नन्ध्यायातानुत्पादः। आश्चर्यम् अद्भुतं व्यवस्थाप्यते. नान्यस्य श्रावकस्येत्यर्थः॥ ३२॥

अन्यथा हीति विस्तरः। यदि संवृतिज्ञानस्वभावा न स्याद् अद्वेषस्वभावा स्यात्, करुणावत्। न सर्वसत्त्वालम्बना सिद्ध्येत्। न वैधातुकसत्त्वालम्बना, सिद्ध्येदित्यर्थः। यथा करुणा न वैधातुकसत्त्वालम्बना, किं तर्हि ? कामावचरसत्त्वालम्बना; दुःखितसत्त्वालम्बनत्वाद् एवं सिद्धं स्यादित्यभिप्रायः। न च त्रिदुःखाकारा। सिद्ध्येदिति वर्तते। करुणावत्। यथा करुणा दुःखताकारैव, न त्रिदुःखताकारा—दुःखदुःखता-संस्कारदुःखता-विपरिणामदुःखताकारा, तथा न स्यात्। इष्यते च त्रिदुःखताकारेति। अथ संवृतिज्ञान स्वभावेति।

महच्छब्दवाच्यताकारणं दर्शयन्नाह—कस्मादियमित्यादि। सम्भारेण महापुण्यज्ञानसम्भारसमुदागमादिति। महापुण्यसम्भारसमुदागमात्, महाज्ञानसम्भारसमुदागमाच्चेत्यर्थः। तत्र महापुण्यसम्भारः तिस्रः पारमिताः—दानशील-क्षान्तिपारमिताः। महाज्ञानसम्भारः प्रज्ञापारमिता। वीर्यध्यानपारमिते तु द्विधा; उभयत्र व्यापारात्। न हि विना वीर्येण दानं दीयते, शीलं समादीयते, क्षान्तिर्भाव्यते इति महापुण्यसम्भारभागीयं वीर्यं भवति। तथा नान्तरेण वीर्यम्, प्रज्ञा भवति महाज्ञानसम्भारभागीयं भवति। तथा मैत्र्यादिचतुर्विधाप्रमाणभावनापक्षं ध्यानं महापुण्यसम्भारभागीयम्। स्मृत्युपस्थानादिसप्तत्रिंशद्बोधिपक्षधर्मभावनापक्षं ध्यानं महाज्ञानसम्भारभागीयम्। तदेवं महापुण्यज्ञानसम्भारभागीयसमुदागमात् निर्वृत्तेः महतोयं

---

१. ०लुकानम्बन—का०।

करुणामहाकरुणयोः किं नानाकरणम् ?

नानाकरणमष्टधा ॥ ३३ ॥

स्वभावतः; अद्वेषामोहस्वभावत्वात् । आकारतः; एकत्रिदुःखताकारत्वात् । आलम्बनतः; एकत्रिधात्वालम्बनत्वात् । भूमितः; चतुर्ध्यानचतुर्थध्यानभूमिकत्वात् । सन्ततेः; श्रावकादिबुद्धसन्तानजत्वात् । लाभतः; कामभवाग्रवैराग्यलभ्यत्वात्[1] । अपरित्राणपरित्राणतः; अतुल्यतुल्यकरुणायनाच्च ॥ ३३ ॥

करुणेति महाकरुणा । **आकारेण त्रिदुःखताकरणात्** । यस्मात् तिसृभिरपि दुःखताभिराकारयति, न दुःखदुःखतयैव, करुणावत् । **आलम्बनेन त्रैधातुकसत्त्वालम्बनत्वात्** । यस्मात् त्रैधातुकोपपन्नान् सत्त्वान् आलम्बते, न च कामधातूपपन्नानेव, करुणावत् । "कामसत्त्वास्तु गोचर" इति वचनात् ।

समत्वेन सर्वत्त्वेषु समवृत्तित्वात् । यस्मात् सर्वत्त्वेषु त्रैधातुकपर्यापन्नेषु समं वर्तते संस्कारदुःखताकारेण, अतोऽपि महाकरुणेत्युच्यते । **ततोऽधिमात्रतराभावादिति** । प्रज्ञास्वभावतया तीक्ष्णतरत्वात् । यथा हि तया करुणायते, न तथा करुणयेति ।

नानाकरणम् विशेषः ।

अद्वेषामोहस्वभावत्वादिति । यथाक्रमं करुणाया अद्वेषस्वभावत्वात्, महाकरुणायाश्चामोहस्वभावत्वादित्यर्थः । **एकत्रिदुःखताकारत्वादिति** । एकदुःखताकारत्वात् करुणायाः, त्रिदुःखताकारत्वाच्च महाकरुणायाः— इत्युभयत्रापि सर्वत्र यथासंख्येन योजयितव्यम् ।

चतुर्ध्यानचतुर्थध्यानभूमिकत्वादिति । करुणा चतुर्ध्यानभूमिका । अनागम्यध्यानान्तरयोः प्रथमध्यानग्रहणेन ग्रहणान्न षड्भूमिकेत्युक्तम् । महाकरुणा तु चतुर्थध्यानभूमिकैव; सर्वसमाधिकर्मण्यत्वेन तस्यैव तदुत्पादनसमर्थत्वात् । **श्रावकादिबुद्धसन्तानजत्वादिति** । आदिशब्देन प्रत्येकबुद्धपृथग्जनानां ग्रहणम् । **कामभवाग्र-वैराग्यलब्धत्वादिति** । कामवैराग्यलभ्या करुणा । भवाग्रवैराग्यलभ्या महाकरुणा । **अपरित्राणपरित्राणत इति** । करुणया श्रावकादयः करुणायन्त एव । केवलमनुल्लायन्त्येवेत्यर्थः । न संसारभयात् परित्रायन्ते[2] । **अतुल्यतुल्यकरुणायनात्** । करुणया अतुल्यं करुणायते; दुःखितानामेव करुणायनात् । महाकरुणया तु तुल्यम्; सर्वसत्त्वसमकरुणायनात् ॥ ३३ ॥

---

१. कामधातुभवा०—का० । २. परित्रायते—ला० ।

अभि० को० ४ : ५

किं पुनः सर्वे बुद्धाः सर्वप्रकारसामान्या भवन्ति ? नेत्याह ।

सम्भारधर्मकायाभ्यां जगतश्चार्थचर्यया ।
समता सर्वबुद्धानाम् , नायुर्जातिप्रमाणतः ॥ ३४ ॥

त्रिभिः कारणैः साम्यं सर्वबुद्धानाम्—१. पूर्वपुण्यज्ञानसम्भारसमुदागमतः[1], २. धर्मकायपरिनिष्पत्तितः, ३. अर्थचर्यया च लोकस्य ।

आयुर्जातिगोत्रप्रमाणकृतस्तु भेदो भवति । चिरालजीवनात्[2], क्षत्रियब्राह्मणजातिभेदात्, काश्यपगौतमादिगोत्रभेदात्, अल्पानल्पप्रमाणभेदाच्च यथाकालमिति ।

एतामेव च त्रिविधां सम्पदं मनस्किुर्वाणेन विदुषा सर्वं बुद्धानां भगवतामन्तिके तीव्रप्रेम गौरवं चोत्पादयितुं यदुत हेतुसम्पदम्, फलसम्पदम्, उपकारसम्पदं च ।

तत्र चतुर्धा हेतुसम्पत्—सर्वगुणज्ञानसम्भाराभ्यासः[3], दीर्घकालाभ्यासः, निरन्तराभ्यासः, सत्कृत्याभ्यासश्च ।

पूर्वपुण्यज्ञानसम्भारसमुदागमत इति । पूर्वेषु ज्ञानेषु पुण्यसम्भारेण, पूर्वोक्तेन ज्ञानसम्भारेण च समुदागमतः । धर्मकायपरिनिष्पत्तित इति । अनास्रवधर्मसम्भारसन्तानो धर्मकायः । आश्रयपरिवृत्तिर्वा । अर्थचर्यया चेति । स्वर्गापवर्गकारणम् अर्थो लोकस्य, तस्य सम्पादनम् = अर्थचर्या । तुल्या हि सर्वेषां बुद्धानां महाकरुणा परार्थहेतुः । यथाकालमिति । सर्वत्राभिसम्बध्यते । कथम् ? चिरालपजोवनाद् यथाक्रमं दीर्घायुषि प्रजायां दीर्घायुषो बुद्धा भवति, अल्पायुषि अल्पायुषः । यथासम्भवं क्षत्रियगुरुके लोके क्षत्रिया भवन्ति, ब्राह्मणगुरुके ब्राह्मणाः । यथाकालमेव च काश्यपादिगोत्राः । गौतमगोत्राश्च । तथाल्पप्रमाणे लोके अल्पप्रमाणाः, अनल्पप्रमाणे अनल्पप्रमाणा इति ।

हेतुसम्पदम् । पुण्यज्ञानसम्भारलक्षणाम् । फलसम्पदम् धर्मकायलक्षणाम् । उपकारसम्पदम् जगदर्थचर्यालक्षणाम् । सर्वगुणज्ञानसम्भाराभ्यास इति गुणाः पञ्चपारमितास्वभावाः । ज्ञानानि[4] च प्रज्ञापारमितास्वभावानि । तेषां सर्वेषां गुणज्ञानानां सम्भारः । तस्याभ्यासः=पुनः पुनः प्रयोगः दीर्घकालाभ्यासः त्रिभिरसंख्येयैर्महाकल्पैः । निरन्तराभ्यासः असान्तरतया

---

१. सर्वपुण्य०—का० ।
२. ०लतरजी०—का० ।
३. सर्वपुण्यज्ञान०—का० ।
४. ज्ञानानानि—जा० ।

चतुर्विधा फलसम्पत्—ज्ञानसम्पत्, प्रहाणसम्पत्, प्रभावसम्पत्, रूपकायसम्पच्च ।

चतुर्विधोपकारसम्पत्—अपायत्रयसंसारदुःखात्यन्तनिर्मोक्षसम्पत्, यानत्रयसुगतिप्रतिष्ठानपनसम्पद्वा ।

ज्ञानसम्पत् पुनश्चतुर्विधा—अनुपदिष्टज्ञानम्, सर्वत्रज्ञानम्, सर्वथाज्ञानम्, अयत्नज्ञानम् च ।

चतुर्विधा प्रहाणसम्पत्—सर्वक्लेशप्रहाणम्, अत्यन्तप्रहाणम्, सवासनप्रहाणम्, सर्वसमाधिसमापत्त्यावरणप्रहाणं च ।

चतुर्विधा प्रभावसम्पत्—वाह्यविषयनिर्माणपरिणामाधिष्ठान-

सत्कृत्याभ्यासः तीव्रादरतया । **चतुर्विधाः फलसम्पद** इति । धर्मकायपरिनिष्पत्त्या ज्ञानादिसम्पदश्चतस्रो भवन्तीति ता अपि फलसम्पद इति व्यवस्थाप्यन्ते । ज्ञानसम्पत् चतुर्विधेति वक्ष्यति । तथा प्रहाणसम्पत्, प्रभावसम्पत्, रूपकायसम्पत् च चतुर्विधेति वक्ष्यति । तदेवासां व्याख्यानं भविष्यति । **चतुर्विधोपकारसम्पत्** । कथम् ? इत्याह—**अपायत्रयसंसारदुःखात्यन्तनिर्मोक्षसम्पदिति**। अपायत्रयं च नरकादि, संसारश्च, तयोर्दुःखम् । ततोऽत्यन्तनिर्मोक्षः, सैव सम्पदिति । **यानत्रयसुगतिप्रतिष्ठापनसम्पदिति** । यानत्रये च श्रावकयानादौ, सुगतौ च प्रतिष्ठापनम्, सैव सम्पदिति । इयं वा चतुर्विधोपकारसम्पत् ।

अनुपदिष्टज्ञानमिति । स्वयमभिसम्बोधनार्थेन । **सर्वत्र ज्ञानमिति** । निरवशेषस्वलक्षणावबोधनार्थेन । **सर्वथाज्ञानमिति** । सर्वप्रकारावबोधनार्थेन । **अयत्नज्ञानमिति** । इच्छामात्रावबोधनार्थेन ।

सर्वक्लेशप्रहाणमिति । त्रैधातुकदर्शनभावनाहेयक्लेशोच्छित्तेः । **अत्यन्तप्रहाणमिति** । अपरिहाणितः । **सवासनाप्रहाणमिति** । अनुबन्धाभावतः । **सर्वसमाधिसमापत्त्यावरणप्रहाणमिति** । उभयतोभागविमुक्तेः ।

वाह्यविषयनिर्माणपरिणामाधिष्ठानवशित्वसम्पदिति । तत्रापूर्ववाह्यविषयोत्पादनं निर्माणम्, अश्मादीनां सुवर्णादिभावापादनं परिणामः, दीर्घकालावस्थानमधिष्ठानमिति । आयुष उत्सर्गेऽधिष्ठाने च वशित्वसम्बद् आयुरुत्सर्गाधिष्ठानवशित्वसम्पदिति । आवृतेति विस्तरः । आवृतगमनं च, आकाशगमनं च, सुदूर-क्षिप्रगमनं च ।[1] अल्पे बहूनां प्रवेशः,

---

१. आकाशादिति अनवद् एकलेपः । —इदमेतावानधिकः पाठोऽत्र जा० पुस्तके मुद्रितो दृश्यते ।

वशित्वसम्पत्[1], आयुरुत्सर्गाधिष्ठानवशित्वसम्पत्, आवृताकाशसुदूरक्षिप्रगमनाल्पबहुत्वप्रवेशवशित्वसम्पत्[2], विविधनिजाश्चर्यधर्मसम्पच्च ।

चतुर्विधा रूपकायसम्पत्—लक्षणसम्पत्, अनुव्यञ्जनसम्पत्, बलसम्पत्, वज्रसारास्थिशरीरतासम्पत्[3] । इति ।

एतत् सामासिकं बुद्धानां माहात्म्यम् ।

अनन्तप्रभेदं तु तद्विद्यमानं जायते । तच्च पुनर्बुद्धा एव सकलं ज्ञातुं वक्तुं च समर्थाः, यद्यनेकासंख्येयकल्पं[4] जीवितमधितिष्ठेयुः । एवं च तावदनन्ताद्भुतगुणज्ञानप्रभावोपकारमहारत्नाकरास्तथागताः ।

परमाणौ बहूनां हस्त्यादीनां प्रवेशः, स चेति आवृताकाश-सुदूर-क्षिप्रगमनाल्पबहुप्रवेशः । तयोर्वशित्वसम्पदिति योज्यम् । विविधा नानाप्रकारा निजाः स्वाभाविकाः । के ? आश्चर्यधर्माः । तेषां सम्पदिति योज्यम् । धर्मतैषा बुद्धानां भगवतां यत् तेषां गच्छतां निम्नस्थलं च समीभवति, यदुच्चं तन्नीचीभवति, यन्नीचं तदुच्चीभवति । अन्धाश्च चक्षूंषि प्रतिलभन्ते, बधिराः श्रोत्रम्, उन्मत्ताः स्मृतिमिति यथासूत्रं सर्वमनुसर्तव्यम् ।

लक्षणसम्पदिति । द्वात्रिंशतां महापुरुषलक्षणानां ऊर्णोष्णीषादीनां सम्पत् । अनुव्यञ्जन सम्पदिति । वृत्ताङ्गुलिताम्रतुङ्गनखत्वादीनामशीतेरनुव्यञ्जनानां सम्पत् । बलसम्पत् । नारायणं बलम् । वज्रसाराण्यस्थीन्यस्येति वज्रसारास्थि, वज्रसारास्थि शरीरमस्येति वज्रसारास्थिशरीरः, तद्भावः, तस्य सम्पदिति वज्रसारादिशरीरतासम्पदिति ।

एतत् सामासिकं सापेक्षिकम् । ये केचित् प्रसादजाताः सत्पुरुषाः बुद्धं भगवन्तमस्तावीषुः, स्तुवन्ति, स्तोष्यन्ति वा । सर्वे ते एतयैव त्रिविधया सम्पदेति[5] । यद्यनेके असंख्येयाः कल्पा अस्येति अनेकासंख्येयकल्पं जीवितम्, तद्यदि अधितिष्ठेयुर्बुद्धा भगवन्तः एवं ते सकलं तन्माहात्म्यं ज्ञातुं वक्तुं च समर्थाः । तस्यानन्तप्रभेदत्वेनातिबहुत्वादित्यभिप्रायः । एवं च तावदिति विस्तरः । गुणाश्च ज्ञानानि च प्रभावश्चोपकारश्चेति द्वन्द्वः । अनन्ताश्च तेऽद्भुताश्चेति पुनः कर्मधारयः । एत एव महारत्नानि । तेषामाकारास्तथागताः ।

---

१. ०णामना०—का० ।
२. ०काशदूर० प्रवेशन०—का० ।
३. ०स्थिसम्पत्—का० ।
४. ०ख्येयं कल्पं—का० । ५. सम्पदिति—जा० ।

अथ च पुनर्बालाः स्वगुणदारिद्र्यहताधिमोक्षाः शृण्वन्तोऽपि तां तादृशीं गुणसमृद्धिं बुद्धं च नाद्रियन्ते, तस्य च धर्मम् ।

पण्डितास्तु पुनर्मज्जाभिरपि तं भगवन्तमभिप्रपद्यन्ते, तस्य च धर्मम् । ते हि श्रद्धामात्रकेणाप्यैकान्तिकेनाभिप्रसन्ना अनियतविपाकानां पापानां राशीनभिभूय दैवीं मानुषीं च श्रियमभिभूय निर्वाणपरायणाः संवर्तन्ते ।

अतएव तथागता अनुत्तरं पुण्यक्षेत्रमुच्यन्ते; अवन्ध्येष्टप्रकृष्टाशुस्वन्त-फलत्वात् ।

उक्तं हि भगवता—

"येऽन्यानपि जिने कारान् करिष्यन्ति विनायके ।
विचित्रं स्वर्गमागम्य ते लप्स्यन्तेऽमृतं पदम् ।।" ( ) इति ।

इमे तावदष्टादश बुद्धानामावेणिका धर्मा उच्यन्ते ।। ३४ ।।

शिष्यसाधारणा अन्ये धर्माः,

श्रावकसाधारणास्त्वन्ये गुणा बुद्धानाम् ।

केचित् पृथग्जनैः ।

के पुनस्ते इति ? यथायोगम्

अरणाप्रणिधिज्ञानप्रतिसंविद्गुणादयः ।। ३५ ।।

अथ च पुनर्बालाः पृथग्जनाः स्वगुणदारिद्र्येणानुमानभूतेन हताधिमोक्षाः हतरुचयः यावत् बुद्धं नाद्रियन्ते । बुद्धे नादरं कुर्वन्तीत्यर्थः ।

श्रद्धामात्रकेणापीति । निरविगमेनेत्यर्थः । अनियतविपाकानामिति । नियतविपाकानामलङ्घनीयत्वादित्यभिप्रायः । देवेषु भवा दैवी । अवन्ध्येष्ट-प्रकृष्टाशुस्वन्तफलत्वादिति । अवन्ध्यफलं फलदाननैयम्येनावस्थानात् । इष्टफलं दिव्यविषयफलत्वात् । प्रकृष्टफलं प्रभूतफलत्वात् । आशुफलं दृष्टधर्मादिवेदनीयफलत्वात् । स्वन्तफलं निर्वाणफलत्वात् । तद्भावात् । अनुत्तरं पुण्यक्षेत्रमुच्यते तथागत इति ।

कारानिति । उपकारान् पूजादिकान् ।। ३४ ।।

यथायोगमिति । यथासम्भवम् । केचिद् गुणाः श्रावकसाधारणाः बुद्धानां भगवतां अरणा-प्रणिधि-ज्ञानादयः । केचित् पृथग्जनसाधारणाः

अनुत्पन्नकामाप्तसवस्तुक्लेशगोचराः ॥ ३६ ॥

अनागताः कामावचराः सवस्तुकाः क्लेशाः अस्या आलम्बनम्; नापरेषां क्लेश उदपादीत्येवं प्रवृत्तत्वात् । अवस्तुकास्तु क्लेशा न शक्याः परिहर्तुम्; सर्वत्रगाणां सकलस्वभूम्यालम्बनत्वात् ॥ ३६ ॥

यथा चारणोक्ता,

तथैव प्रणिधिज्ञानम्,

तदपि हि संवृतिज्ञानं ध्यानेऽन्त्येऽकोप्यधर्मणः, मनुष्याश्रयं च ।

सर्वालम्बं तु तत्,

सर्वधर्मालम्बनं तु प्रणिधिज्ञानमित्येव विशेषः । आरूप्यास्तु न साक्षात् प्रणिधिज्ञानेन ज्ञायन्ते । किं तर्हि ? निष्यन्दचरितविशेषात्[1] । कार्षकनिदर्शनं[2] चात्रेति वैभाषिकाः । प्रणिधिपूर्वकं ज्ञानं प्रणिधिज्ञानम् । यद्धि

सवस्तुकाः क्लेशाः । के ? रागादयो भावनाप्रहातव्याः । अवस्तुकाः क्लेशाः । दर्शनप्रहातव्याः । सर्वत्रगाः । सकलस्वभूम्यालम्बनत्वात् परसन्तत्यालम्बना अपि भवन्तीति परिहर्तुमशक्याः सर्वत्रगाः ॥ ३६ ॥

"सर्वालम्बनं तु तत्" इति । सर्वमालम्बत इति सर्वालम्बनम् । सर्वो वाऽस्यालम्बन इति सर्वालम्बनम् । नारणत्वात् क्लेशमात्रालम्बनम्, किं तर्हि ? रूपाद्यालम्बनपीत्यर्थः । आरूप्यास्तु न साक्षात् प्रणिधिज्ञानेन ज्ञायन्ते । किं कारणम् ? यस्मात् प्रणिधिज्ञानं चतुर्थध्यानभूमिकम् । वक्ष्यति च—"स्वाधोभूविषया लभ्या[3]" (अभि० को० ७.४४) इति ।

प्रणिधिज्ञानं चाभिज्ञात्वाद् भवतीति । निष्यन्दचरितविशेषादिति । तत्र निष्यन्दः=मन्दमन्दता । चरितम्=आरूप्यसमापत्तिविहारः । तदेवं कार्येणास्यानुमानम्, कारणेन च कार्यस्येति परिदीपितम् । ततः प्रच्युतानां तत्समापत्तिलाभिनां च तदुभयं प्रत्यक्षम् । कार्षकनिदर्शनं चात्रेति । यथा कार्षकः फलेन बीजं प्रतिपद्यते, बीजेन वा फलमिति । यथा वा कार्षको

---

१. ०निष्पन्न०—का० ।

२. कार्षक०—का० ।

३. स्वाधो भूमिविषयानिज्ञा—जा० ।

'अविवर्त्यं ज्ञानम्' इति वर्तते । युक्तमुक्ताभिलापितायां समाधिवशि-सम्प्रख्यानम्[1], तत्र चाविवर्त्यं ज्ञानं प्रतिभानप्रतिसंवित्[2] ।। ३८ ।।

वाङ्मार्गालम्बना चासौ,

वाक्च मार्गश्च तस्याः आलम्बनम् ।

नव ज्ञानानि,

नवज्ञानस्वभावा प्रतिभानप्रतिसंविद्; अन्यत्र निरोधज्ञानात् ।

सर्वभूः ।

सर्वभूमिका चासौ कामधातौ यावत् भवाग्रे; वाङ्मार्गयोरन्यतरालम्बनात् ।

दश षड् वाऽर्थसंवित्,

अर्थप्रतिभानसंवित् सर्वधर्माश्चेदर्थः[3], दश ज्ञानानि । निर्वाणं चेदर्थः, षड् ज्ञानानि धर्मान्वयनिरोधक्षयानुत्पादसंवृतिज्ञानानि ।

युक्तमुक्ताभिलापितायामिति । युक्तमर्थसम्बन्धम्, मुक्तमशक्तम्, युक्तमुक्तमभिलपतीति युक्तमुक्ताभिलापी, तद्भावः, तस्याम् युक्तमुक्ताभिलापितायाम् । समाधौ वशी समाधिवशी, समाधिवशिनः सम्प्रख्यानम् = असम्मोपः समाधिवशिसम्प्रख्यानम्, तत्र चाविवर्तव्यं ज्ञानं प्रतिभानप्रतिसंविदिति विशेषः ।। ३८ ।।

कथं नवज्ञानस्वभावा प्रतिभानप्रतिसंवित् । या वागालम्बना सा दुःखसमुदयधर्मान्वयक्षयानुत्पादसंवृतिज्ञानस्वभावा, या मार्गालम्बना सा मार्गधर्मान्वयक्षयानुत्पादपरचित्तसंवृतिज्ञानस्वभावा—इत्यभिसमस्य नवज्ञानस्वभावा; अन्यत्र निरोधज्ञानात् ।

सर्वधर्माश्चेदर्थो दश ज्ञानानीति । न हि सोऽस्ति धर्मः, यो दशानां ज्ञानानां यथासम्भवं नालम्बनीभवति । निर्वाणं चेदर्थः, षट् ज्ञानानीति । निरोधज्ञानस्य धर्मज्ञानादिपञ्चस्वभावत्वात् ।

---

१. ०प्रख्याने —का० ।

२. प्रतिभानसंवित्—का० ।

३. ०दर्थो—का० ।

वाङ्निरुक्तिरित्येतोऽर्थः । निरुक्तिप्रतिसंविदालम्बनमुक्तम्; ऊर्ध्वं वितर्काभावात् ।

प्रज्ञप्तौ तु प्रतिसंविदामेव निर्देशः । "पदव्यञ्जने तस्यैवार्थे तस्यैवाधिवचने तत्रारक्तताया गविवर्तज्ञानं धर्मप्रतिसंविद"

नामकायादिवागालम्बनत्वादिति । न हि दुःखादिज्ञानगनात्वं दुःखैकदेशं समुदयैकदेशं वा स्वलक्षणाकारेणालम्बते, किं तर्हि ? पञ्चोपादानस्कन्धान् सामान्यलक्षणाकारैः । अतस्ते संवृतिज्ञानस्वभावे इति ॥ ३९ ॥

ऊर्ध्वं नामकायाभावादिति । आरुप्यगतौ धर्मप्रतिसंविन्नास्तीति । यत्र च नामकायाः तत्रैव पदव्यञ्जनकाया इति तुल्यवार्त्ता । नामकायाभाववचनेन पदव्यञ्जनकायाभावसिद्धिः ।

ऊर्ध्वं वितर्काभावादिति । द्वितीयध्यानादिषु । "वितर्कं विचार्य वाचं भाषते" इति सूत्रम् । नामाद्यालम्बनत्वं पुनरासां प्रतिसंविदां समापन्नस्यापि । व्युत्थितस्यापि तत्पृष्ठलाभैरविवर्त्यैर्जनैर्नामाद्यालम्बनत्वम् । भाषणं पुनस्तत्पृष्टेनैव ।

स्त्रीपुरुषाद्यधिवचन इति । आदिशब्देन कालकारकादिसंग्रहः । अधिवचनं पुनः पर्यायः । तदधिकृत्य वा वचनं तदधिवचनम् । तस्यासक्त-

इति । अत एवासां क्रमसिद्धिः । निर्वचनम्=निरुक्तिः । यथा—रूप्यते तस्माद्रूपमित्येवमादि । उत्तरोत्तरप्रतिभा प्रतिभानमित्यपरे ।

आसां च किल प्रतिसंविदां गणितं वुद्धवचनं शब्दविद्या हेतुविद्या च पूर्वप्रयोगो यथाक्रमम् । नाप्येतेष्वकृतकौशलस्ता उत्पादयितुं शक्नोतीति ।

वुद्धवचनमेव तु सर्वासां प्रयोगं वर्णयन्ति । यस्य चैका तस्यावश्यं चतस्रः प्रतिसंविदो भवन्ति ।

विकलाभिर्न तल्लाभी,

नहि विकलाभिस्ताभिः प्रतिसंवित्लाभी भवति ।

ये चैत उपदिष्टा अरणादयो गुणाः,

षडेते प्रान्तकोटिकाः ॥ ४० ॥

प्रान्तकोटिकध्यानवलेनैषां लाभः ॥ ४० ॥

तत् षड्विधम्,

तदपि प्रान्तकोटिकं चतुर्थं ध्यानं षडात्मकम् । अरणाप्रणिविज्ञानं तिस्रः प्रतिसंविदः । तदेव प्रान्तकोटिकम् । निरुक्तिप्रतिसंविदस्तद्वलेन लाभः, न तु सा चतुर्थध्यानभूमिका ।

तायामिति । तस्याविवचनस्य, तस्य पदव्यञ्जनस्य वा । अत एवासां क्रमसिद्धिरिति । यथा पदव्यञ्जनानुसारेणार्थप्रतिपत्तिः, तस्यैकद्वि वहुस्त्री-पुरुषाद्यविवचनम्, तस्यासक्तता—इत्यतः क्रमसिद्धिरिति ।

तस्माद् रूपमित्येवमादि । आदिशब्देन विजानातीति विज्ञानम्, चिनोतीति चित्तम्—इत्येवमादिसंग्रहतः । उत्तरोत्तरप्रतिभा प्रतिभानमिति वादन्यायेन ।

यथाक्रममिति । धर्मप्रतिसंविदो गणितं पूर्वप्रयोगः । अर्थप्रति-संविदो वुद्धवचनम् । निरुक्तिप्रतिसंविदः शब्दविद्या । प्रतिभानप्रति-संविदो हेतुविद्येति । वुद्धवचनमेवेति वैभाषिकाः ॥ ४० ॥

"तत्षड्विधम्" इति । किञ्चित् चतुर्थं ध्यानमरणात्मकम्, किञ्चित् प्रणिधिज्ञानात्मकम् । किञ्चित् ज्ञप्रतिसंविदात्मकम् । किञ्चित् तद्व्याकृतं केवलं प्रान्तकोटिकम् इति । तिस्रः प्रतिसंविद इति । निरुक्तिप्रतिसंविदं मुक्त्वा तत्र वितर्काभावात् । सवितर्कविचारेण तदुत्थापनम् ।

कथं तर्ह्यविशेषेणेदमुक्तम्—'षडेते प्रान्तकोटिकाः' (अभि० को० ७.४०) इति ? एते उच्यन्ते निरुक्तिप्रतिसंविदः तद्वलेन लाभो न तु सा

बुद्धान्यस्य प्रयोगजाः ॥ ४१ ॥

बुद्धादन्यस्य प्रायोगिकाः, न वैराग्यलाभिकाः । बुद्धस्य नास्ति किञ्चित् प्रायोगिकम् । तस्य सर्वधर्मेश्वरत्वादिच्छामात्रप्रतिबद्धः सर्वगुणलाभसम्मुखीभावः । इमे तावच्छावलाभादयगुणा अभिज्ञादयः पृथग्जनैरपि ॥ ४१ ॥

केयमिज्ञा नाम ?

ऋद्धि-श्रोत्र-मनः-पूर्वजन्म च्युत्युदय क्षये ।
ज्ञानसाक्षीक्रियाभिज्ञा षड्विधा

चतुर्थध्यानभूमिका । किं तर्हि ? कामधातुप्रथमध्यानभूमिकेत्यर्थः ।

"सर्वभूम्यनुलोमितम्" इति । सर्वभूम्यनुकूलितमित्यर्थः । प्रगता अन्ता कोटिरस्येति । प्रगता अन्तं प्रान्ता । प्रान्ता कोटिरस्येति प्रान्तकोटिका, चतुष्कोटिकवदिति । यथा चतुष्कोटिकः चतुःप्रकारप्रश्नस्तद्वत् ॥ ४१ ॥

ऋद्धिविषयेति विस्तरः । षडभिज्ञाः । ऋद्धिविषयज्ञानसाक्षात्क्रिया-

---

१. अन्त०—का० ।

ऋद्धिविषया[1] ज्ञानसाक्षात्क्रिया अभिज्ञा। दिव्यश्रोत्र-चेतःपर्याय-पूर्वेनिवासानुस्मृति-च्युत्युपपादास्रवक्षयज्ञानसाक्षात्क्रिया[2] अभिज्ञाः। एताः

दिव्यचेतःपर्यायपूर्वेनिवासच्युत्युपपादास्रवक्षयज्ञानसाक्षात्क्रियाभिज्ञा इति। सूत्रं चात्र—

"इह भिक्षुरनेकविधम् ऋद्धिविषयं प्रत्यनुभवति। एको भूत्वा वहुधा भवति, वहुधा भूत्वा एको भवति" इति विस्तरग्रन्थे ऋद्धिपादा इत्यत्र लिखितो द्रष्टव्यः। यावत्, "इयमुच्यते—ऋद्धिविषयज्ञानसाक्षात्क्रियाभिज्ञेति। इह भिक्षुर्दिव्येन श्रोत्रेण विशुद्धेनातिक्रान्तमानुष्यकेन उभयान् शब्दान् शृणोति—मानुषान् अमानुषानपि, ये वा दूरे ये वा अन्तिके इति इयमुच्यते—दिव्यश्रोत्र-ज्ञानसाक्षात्क्रियाभिज्ञा। इह भिक्षुर्दिव्येन चक्षुषा विशुद्धेनातिक्रान्त-मानुष्यकेन सत्त्वान् पश्यति" इति वहुः सूत्रवद् ग्रन्थः। यावद् "इयमुच्यते दिव्यचक्षुर्ज्ञानसाक्षात्क्रियाभिज्ञा। इह भिक्षुरनेकविधं पूर्वनिवासमनुस्मरति" इति सूत्रवद् ग्रन्थः। "इयमुच्यते—पूर्वनिवासानुस्मृतिज्ञानसाक्षात्क्रियाभिज्ञा। इह भिक्षुः परसत्त्वानां परपुद्गलानां वितर्कितं विचारितं[3] मनसा मानसं यथाभूतं प्रजानाति। सरागचित्तं 'सरागं चित्तम्' इति यथाभूतं प्रजा-नाति, विगतरागं 'विगतरागम्' इति यथाभूतं प्रजानाति, सद्वेषम्, विगतद्वेषम्, समोहम्, विगतमोहम्, विक्षिप्तम्, संक्षिप्तम्, लीनम्, प्रगृहीतम्, उद्धतम्, अनुद्धतम्, अव्युपशान्तम्, व्युपशान्तम्, समा-हितम्, असमाहितम्, अभावितम्, भावितम्, अविमुक्तं चित्तम् 'अविमुक्तं चित्तम्' इति यथाभूतं प्रजानाति। विमुक्तं चित्तं 'विमुक्तं चित्तम्' इति यथाभूतं प्रजानाति, इयमुच्यते—प्रत्ययज्ञानसाक्षात्क्रियाभिज्ञा। इह भिक्षुः 'इदं दुःखमार्यसत्यम्' इति यथाभूतं प्रजानाति, 'अयं दुःखसमुदयः', 'अयं दुःखनिरोधः', 'इयं दुःखनिरोधगामिनी प्रतिपद् आर्यसत्यम्' इति यथाभूतं प्रजानाति, तस्यैवं जानत एवं पश्यतः कामास्रवाच्चित्तं विमुच्यते, भवास्रवा-च्चित्तं विमुच्यते, अविद्यास्रवाच्चित्तं विमुच्यते, विमुक्तस्य 'विमुक्तोऽस्मि' इति ज्ञानदर्शनं भवति—'क्षीणा मे जातिः, यावत्, नायमस्मात् भवं प्रजानामि' इति। इयमुच्यते—आस्रवक्षयज्ञानसाक्षात्क्रियाभिज्ञा।"

ऋद्धिः=समाधिः। ऋद्धिविषयो निर्माणं गमनं च ऋद्धिविषये ज्ञानम्, तस्य साक्षात्क्रिया = सम्मुखीभावः — ऋद्धिविषयज्ञानसाक्षात्क्रियाभिज्ञा। दिव्यं श्रोत्रम्, तत्र ज्ञानम्, तस्य साक्षात्क्रिया—दिव्यश्रोत्रज्ञानसाक्षात्क्रिया।

---

१. °विषये—का०। २. °पूर्वनिवासा°त्युत्पादा°—का०।

परचित्तं हि ज्ञातुकाम आत्मनः कायचित्तयोर्निमित्तमुद्गृह्णाति—कीदृशेऽपि मे काये कीदृशं चित्तं भवति। एवं परेषामप्याभुजतश्चित्तज्ञानादभिष्पन्ना भवति। अभिनिष्पन्नायामभिज्ञायां रूपनिरपेक्षो जानाति। पूर्वनिवासं समनुस्मर्तुकामः समनन्तरनिरुद्धमनोविज्ञानो निमित्तमुद्गृह्य प्रातिलोम्येन[1] अवस्थान्तराणि मनसिकरोति। यावत् सन्धिचित्तम्। ततोऽन्तराभवस्यैकक्षणं मरणेऽपि निष्पन्नो भवति। एवं परस्यापि स्मरति। अभिनिष्पन्नायां विलङ्घ्यापि स्मरणम्। अनुभूतपूर्वस्यैव स्मरणम्।

शुद्धावासानां कथं स्मरणम्? श्रवणेनानुभूतत्वात्। आरूप्यच्युतस्येहोपपन्नस्य परसन्तत्यधिष्ठानेनोत्पादनम्। अन्येषां स्वसन्तत्यधिष्ठानेन।

ऋद्ध्यादीनां तु लघुत्वशब्दालोकमनसिकरणं प्रयोगः॥ ४३॥

ताः पुनरेताः पञ्चाभिज्ञाः—

स्वाधोभूविषयाः,

यद्भूमिका ऋद्ध्यभिज्ञा भवति तां भूमिं तया गच्छति। निर्मिणोति

परचित्तं हि ज्ञातुकाम इति विस्तरः। **आभुजत** इति। आभोगं कुर्वतः। **निमित्तमुद्गृह्य**ेति। चित्तप्रकारं परिच्छिद्येत्यर्थः। **तत्प्रातिलोम्येनेति**। तस्यैव चित्तस्य प्रतीपं **समनन्तरनिरुद्धानि अवस्थान्तराणि मनसि करोति विलङ्घ्यापि स्मरणमिति**। एकं जन्म द्वे वा विलङ्घ्यापि व्यतिक्रम्यापि स्मरणम्।

शुद्धावासानां कथं स्मरणमिति। यद्यनुभूतपूर्वस्यैव स्मरणम्, न हि शुद्धावासानामिहागमनमस्ति; अनागामित्वात् तेन नैषामिहानुभूतिः। नापि तत्र, पृथग्जनानां तत्रानुपपत्तेः? **श्रवणेनानुभूतत्वादिति**। श्रुतं हि तेन भवति—शुद्धावासा नाम देवा एवम्भूता इति। द्विविधो ह्यनुभवः—दर्शनानुभवः, स्मरणानुभवश्च। **परसन्तत्यधिष्ठानेनोत्पादनमिति**। ध्यानसंगृहीतं पूर्वनिवासानुस्मृतिज्ञानम्, तेन चारूप्यावचरं चित्तं न गृह्णाति। कथं च पुनः परसन्तत्यधिष्ठानेनोत्पादनम्? समनन्तरनिरुद्धान्मनोविज्ञानात् परकीयं निमित्तमुद्गृह्येति विस्तरः। **अन्येषामिति**। ये आरूपेभ्यो न प्रच्युताः, तेषां **स्वसन्तत्यधिष्ठानेनैवोत्पादनम्**; पूर्वनिवासानुस्मृतिज्ञानस्य सुकरत्वात्।

ऋद्ध्यादीनामिति। ऋद्धि-दिव्यश्रोत्र-दिव्यचक्षुरभिज्ञानां तिसृणां यथाक्रमं **लघुत्वमनसिकरणम्** ऋद्धेः **प्रयोगः**। शब्दमनसिकरणं दिव्यश्रोत्रस्य। आलोकमनसिकरणं दिव्यचक्षुषः॥ ४३॥

---

१. तत्समनन्तरप्राति०—का०।

वा अवराम्, नोत्तराम्। एवं दिव्यश्रोत्राभिज्ञया स्वभूमिकमेव शब्दं शृणोति अवरभूमिकं वा, नोर्ध्वभूमिकम्। चेतःपर्यायाभिज्ञया नोर्ध्वभूमिकं चित्तं जानाति। पूर्वनिवासानुस्मृत्या न स्मरति। च्युतोपपादाभिज्ञया न पश्यति।

अत एवारूप्यभूमिकं चित्तं चेतःपर्यायपूर्वनिवासाभिज्ञाभ्यां न गृह्णाति; ऊर्ध्वभूमिकत्वात्।

कथमेता लभ्यन्ते ? अनुचिताः प्रयोगतः

लभ्याः, उचितास्तु विरागतः।

जन्मान्तराभ्यस्ता अभिज्ञा वैराग्यतो लभ्यन्ते, वैशेषिक्यः प्रयोगतः। सर्वासां तु प्रयोगेणोत्पादनम्।

तृतीया त्रीण्युपस्थानानि,

चेतःपर्यायाभिज्ञा त्रीणि वेदनाचित्तधर्मस्मृत्युपस्थानानि; चित्तचैत्तालम्बनत्वात्।

आद्यं श्रोत्रर्द्धिचक्षुषि ॥ ४४ ॥

'अभिज्ञा' इति वर्तते। ऋद्धिदिव्यश्रोत्रदिव्यचक्षुरभिज्ञाः स्मृत्युपस्थानमित्यर्थः। रूपालम्बनत्वात्। ऋद्धिश्चतुर्वाह्यायतनालम्बना, अन्यत्र शब्दात्। दिव्यश्रोत्रचक्षुरभिज्ञे शब्दरूपायतनालम्बने।

कथं तर्हि "च्युत्युपपादज्ञानेनैव[1] अमी[2] वत[3] भवन्तः सत्त्वाः काय-

---

कथमेता लभ्यन्त इति। प्राप्तिमधिकृत्य प्रश्नः। सम्मुखीभावस्तु चित्तानाम्। अनुचितानां च प्रयोगत एव। अनुचिताः प्रयोगत इति। वैशेषिक्यो या अनुत्पादपूर्वाः। सर्वासां तु प्रयोगेणोत्पादनमिति। याश्च वैराग्याल्लभ्यन्ते, याश्च प्रयोगतः, तासां सर्वासाम्।

अन्यत्र शब्दादिति। उच्छेदित्वात् शब्दो न निर्मीयते। वक्ष्यति हि—"कामाप्तं निर्मितं बाह्यं चतुरायतनम्" (अभि० को० ७.४९) इति।

कथं तर्हीति विस्तरः। यदि चक्षुरभिज्ञा रूपायतनालम्बना, कथं

---

१. च्युतोपपाद०—का०। २. जानाति अमी—का०।
३. का० पुस्तके नास्ति।

तर्हि च्युत्युपपादज्ञानेन श्रमो वत नवन्तः सत्त्वाः कायदुश्चरितेन समन्वागता इत्येवमादि। न वाङ्मनस्कर्मसमन्वागमाज्ञधुविज्ञानेन गृह्यन्ते। आदि-शब्देन मिथ्यादृष्टिग्रहणम्। न तदिति। तद् वाङ्मनस्कर्मसमन्वागमादि तेन चक्षुर्ज्ञानेन न जानाति। केन तर्हि? इत्याह—अनिज्ञापरिवारज्ञानं तु तदिति। मानसं तदित्यर्थः। शेषे इति। पूर्वनिवासानुस्मृति-आस्रवक्षयाभिज्ञे। ते चतुःस्मृत्युपस्थानस्वभावे। कथम्? आस्रवक्षयाभिज्ञा चतुःस्मृत्युप-स्थानस्वभावा; दशज्ञानस्वभावत्वात्। षड्ज्ञानस्वभावत्वेऽपि कायवेदना-चित्तस्मृत्युपस्थानान्यपि अन्यगतानि भाव्यन्ते॥ ४४॥

कथं तर्हि ते चतुर्ध्यानभूमिके सिद्ध्यतः? न हि द्वितीयादिध्यान-भूमिकं चक्षुर्ज्ञानं श्रोत्रज्ञानं वास्ति; चक्षुःश्रोत्रविज्ञानसम्प्रयुक्तत्वात्। तयोश्च द्वितीयादिषु ध्यानेषु अभावात्। वक्ष्यति हि—

"कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकं च यत्।
द्वितीयादौ तदाप्तम्" (अभि० को० ८.१३) इति।

आश्रयवशेनेति विस्तरः। चक्षुःश्रोत्राश्रयवशेन तज्ज्ञानयोरपि चतुर्ध्यानभूमिकत्वम्। चक्षुःश्रोत्रे चतुर्ध्यानभूमिके व्यवस्थाप्येते। प्राधानिक एष निर्देशो बाहुलिको वेति। प्रधाने भवः प्राधानिकः। एवं बाहुलिकः। कुशला अभिज्ञा प्रधानभूता। अतस्तदपेक्ष्यनिर्देशः क्रियते—कुशला प्रज्ञा अभिज्ञेति। अथवा—बाहुल्येनाभिज्ञाः कुशलाः। अत एवं निर्देश इति। मुद्गादिभावेऽपि मापराशिव्यपदेशवत्॥

आसां चाभिज्ञानाम्—

तिस्रो विद्याः,

पूर्वनिवासच्युत्युपपादास्रवक्षयज्ञानसाक्षात्क्रियास्तिस्रः अशैक्ष्यो विद्या उच्यन्ते ।

कस्मादेता एव नान्याः ?

अविद्यायाः पूर्वान्तादौ निवर्त्तनात् ॥ ४५ ॥

एता हि पूर्वापरान्तमध्यसम्मोहं व्यावर्तयन्ति यथाक्रमम् ॥ ४५ ॥

"पूर्वान्तादौ निवर्तनात्" । यावद् यथाक्रममिति ।

भगवद्विशेषादयस्तावदाहुः—पूर्वान्तसम्मोहं पूर्वेनिवासानुस्मृत्या निवर्तयति । च्युत्युपपादाभिज्ञया मध्यसम्मोहम् । आस्रवक्षयाभिज्ञया अपरान्तसम्मोहम् । नापरमस्माद् भवं प्रजानातीति तेषां व्याख्यानकाराणामभिप्रायः । अतीतः, प्रत्युत्पन्नः, अनागतोऽध्वेति अध्वानुक्रमः । तस्मादेवमर्थगतिरिति ।

आचार्यसङ्घभद्रस्तु व्याचष्टे—पूर्वान्तादौ निवर्तनात् । पूर्वेनिवासाभिज्ञा हि पूर्वान्तसम्मोहं व्यावर्तयति । अपरान्तसम्मोहं च्युत्युपपादाभिज्ञा । मध्यसम्मोहमास्रवक्षयाभिज्ञेति । अतश्च तिसृणामेव विद्यात्वम् । पूर्वयात्मपरविपद्दर्शनात् संवेगोत्पत्तेः, परया परेषामेव । तथा संविग्नस्य भूतार्थावगमात् तृतीयेति ।

किमत्र प्रतिपत्तव्यम् ? आचार्यसङ्घभद्रव्याख्यानमेव युक्तरूपं पश्यामः ।

आचार्यस्यापि तथैवाभिप्रायो लक्ष्यते । तथाहि—'पूर्वेनिवास-च्युत्युपपाद-आस्रवक्षयज्ञानसाक्षात्क्रियास्तिस्रः' इत्युक्त्वाऽऽह—'एता हि पूर्वान्तापरान्तमध्यसम्मोहं व्यावर्तयन्ति यथाक्रमम्' इति । कथं पुनर्गम्येतेति ? तिस्र एवाभिज्ञास्तिस्रो विद्या इति । यस्मादेवमाह—"अशैक्षी पूर्वेनिवासानुस्मृतिज्ञानसाक्षात्क्रिया विद्या, अशैक्षी च्युत्युपपादज्ञानसाक्षात्क्रिया विद्या, अशैक्षी आस्रवक्षयज्ञानसाक्षात्क्रिया विद्या" इति विद्यात्रयव्यवस्थापनानुसूत्रादेव । एवं ह्याह—त्रिविदो[1] भवति त्रिविद्य इति ॥ ४५ ॥

---

१. त्रिविदो—क्वा० । त्रिविद्यो—इति वृत्तितः पाठः प्रतिभाति ।

आसां परमार्थेन

अशैक्ष्यन्त्या,

आस्रवक्षयज्ञानसाक्षात्क्रियैवाशैक्षी विद्या ।

तदाख्ये द्वे तत्सन्तानसमुद्भवात् ।

अन्ये द्वे अशैक्ष्यसन्तानसम्भूतत्वादशैक्ष्यावुच्येते । नैव तु ते शैक्ष्यौ नाशैक्ष्यौ ।

किं पुनरेते अभिज्ञे शैक्ष्यस्य नोच्येते ? यतः शैक्ष्यौ विद्ये नोच्येते ।

इष्टे शैक्षस्य नोक्ते तु विद्ये साविद्यसन्ततेः ॥ ४६ ॥

न हि साविद्यसन्ताने विद्याव्यवस्थानं युज्यते; पुनरप्यविद्याभिभवात् ॥ ४६ ॥

आसां चाभिज्ञानाम्

आद्या तृतीया षष्ठी च प्रातिहार्याणि,

ऋद्धिचेतःपर्यायास्रवक्षयाभिज्ञास्त्रीणि प्रातिहार्याणि यथाक्रमम् ऋद्ध्यादेशनानुशासन-प्रातिहार्याणि । विनेयमनसामादितोऽत्यर्थं हरणात् प्रातिहार्याणि; प्रातिशब्दयोरादिकर्मभृशार्थत्वात् । प्रतिहतमध्यस्थानां मनांस्येभिः प्रतिहरन्तीति प्रातिहार्याणि वा ।

अशैक्षी विद्ये ति । अनास्रवत्वादित्यभिप्रायः । **नैव तु**[1] **ते**[1] पूर्वेनिवासच्युत्युपपादाभिज्ञे न **शैक्ष्यौ नाशैक्ष्यौ**, सास्रवत्वात् ॥ ४६ ॥

त्रीणि प्रातिहार्याणि यथाक्रममिति । ऋद्धिविषयाभिज्ञा **ऋद्धिप्रतिहार्यम्** । चेतःपर्यायाभिज्ञा **आदेशनाप्रतिहार्यम्** । ईदृशं ते चित्तमिति । आस्रवक्षयाभिज्ञा **अनुशासनप्रातिहार्यम्** । यथाभूतोपदेश इत्यर्थः । **प्रातिशब्दयोरादिकर्मभृशार्थत्वादिति** । प्र-शब्दः आदिकर्मार्थः । इदमनेन कर्म प्रारब्धमिति । अति-शब्दश्च भृशार्थः, अतिगत इति । तदिदमुक्तं भवति— **विनेयमनसाम्** आदितः आदौ **अतिभृशं हरन्त्येभिरिति** प्रातिहार्यम् । **प्रतिहतमध्यस्थानामिति** । नैरुक्तं[2] विधिमाश्रित्योक्तम् । "वर्णागमो वर्णविपर्ययश्च" इति योज्यम् ।

१—१. नैवर्तते—जा० । २. वैयाकरणमित्यर्थः ।

एषां पुनः

शासनम् ।

अग्र्यम्,

अनुशासनं प्रातिहार्यमग्र्यम् ।

अव्यभिचारित्वाद्धितेष्टफलयोजनात् ॥ ४७ ॥

ऋद्ध्यादेशने हि विद्यया विक्रियेते । अस्ति हि च गान्धारी नाम विद्या ययाकाशेन गच्छति । ईक्षणिका च नाम विद्या यया परचित्तं जानाति । न तु यथाभूतानुशासनमन्यथा शक्यं कर्तुम्; अव्यभिचारित्वात् । प्रवान-मात्रर्जनमात्रं च ताभ्यामनुशासनप्रातिहार्येण तु हितेन इष्टेन फलेन योगो भवति, उपायोपदेशादित्येवावश्यम् ऋद्धिरित्युच्यते ॥ ४७ ॥

केयमृद्धिः ? वैभाषिकन्यायेन

ऋद्धिः समाधिः,

ऋध्यत्यनेनेति कृत्वा योजयितव्यम्

किं तेन समृध्यति ?

गमनं निर्माणं च,

ततस्तत्र

गतिस्त्रिधा ।

शरीरवाहिनी आधिमोक्षिकी, मनोजवा च तत्र गतिः ।

शास्तुर्मनोजवा,

मनस इवास्या जव इति मनोजवा गतिर्बुद्धस्यैव, नान्यस्य; सुदूरमपि देशं चित्तोत्पादकालेन गमनात् । अतएव "अचिन्त्यो बुद्धानां बुद्धविषयः" इत्युक्तं भगवता । इतरे तु गती बुद्धस्यानुक्तसिद्धे ।

अन्येषां वाहिन्यप्याधिमोक्षिकी ॥ ४८ ॥

श्रावक-प्रत्येकबुद्धानां शरीरवाहिनी च गतिः । पक्षिवत् क्रमेण शरीरवाहनात् । आधिमोक्षिकी च; दूरस्थानामाधिमोक्षेणाभ्यागमनात्[1] ।

"अव्यभिचारित्वात्" इति । कर्मेश्वरयनान्तरीयत्वादिति ॥ ४७ ॥ ऋद्धयतीति । सम्पद्यत इत्यर्थः । दूरस्थानामाधिमोक्षेणेति ।

१. °भ्यागमनात्—ग १० ।

किं खल्वभिज्ञयैव निर्माणं निर्मीयते ? नेत्युच्यते। किं तर्हि ? अभिज्ञाफलैः।

निर्माणचित्तैस्तानि चतुर्दश ॥ ४९ ॥

तानि पुनश्चर्तुदश निर्माणचित्तानि ॥ ४९ ॥

यथाक्रमं ध्यानफलं द्वे यावत् पञ्च,

प्रथमध्यानफलं द्वे कामधातुप्रथमध्यानभूमिके निर्माणचित्ते। द्वितीयध्यानफलं त्रीणि कामधातुप्रथमद्वितीयध्यानभूमिकानि। एवं तृतीयचतुर्थध्यानभूमिकानि चत्वारि पञ्च च योज्यानि।

स्वभूमिकाधरभूमिकं निर्माणचित्तं ध्यानफलं वेदितव्यम्।

नोर्ध्वजम्।

नोर्ध्वभूमिकं निर्माणचित्तमधरध्यानफलमस्ति। द्वितीयादिध्यानफलं कामावचरं निर्माणं प्रथमध्यानभमिकाद् गतितो विशिष्यते।

तल्लाभो ध्यानवत्,

तेषां च निर्माणचित्तानां ध्यानवल्लाभः।

द्वचायतनमिति। रूप-स्प्रष्टव्यायतनम्, न गन्धरसायतनम्; समन्वागमाभावादित्यभिप्रायः। न शब्दायतनम्, उच्छिद्यत्वात्। अभिघातजत्वादित्यपरे। आगन्तुकत्वादित्यभिप्रायः ॥ ४९ ॥

द्वितीयध्यानफलं त्रीणीति। अवरभूमिके च द्वे, स्वभूमिकं चेति। चत्वारि पञ्च च योज्यानीति। तृतीयध्यानभूमिकानि चत्वारि। अवरभूमिकानि त्रीणि, स्वभूमिकं चेति। चतुर्थध्यानभूमिकानि पञ्च, अवरभूमिकानि च चत्वारि, स्वभूमिकं चेति।

द्वितीयादिध्यानफलमिति विस्तरः। द्वितीयध्यानफलं निर्माणं यन्निर्मात्रा निर्मितम्। प्रथमध्यानभूमिकात् निर्माणफलात् प्रथमध्यानफलाद् गतितो विशिष्यते। तद् द्वितीयध्यानफलं निर्माणं द्वितीयां ध्यानभूमिं गच्छति। प्रथमध्यानफलं तु तां न गच्छति, किं तर्हि ? प्रथमध्यानभूमिमेवेति गमनविशेषाद् विशिष्यते।

एवं तृतीयादिध्यानफलं योज्यम्।

किं खलु निर्माणचित्तादेव स्यात् व्युत्थानम् ? नास्त्येतत् । यस्मादुत्पद्यते—

शुद्धात् तत् स्वतश्च,

शुद्धकाद्ध्यानादन्तरं निर्माणचित्तमुत्पद्यते निर्माणचित्ताद्वा, नान्यतः ।

ततोऽपि ते ॥ ५० ॥

निर्माणचित्तादपि शुद्धकं ध्यानं निर्माणचित्तं चोत्पद्यते, नान्यत् । न हि समाधिफलस्थितस्याप्रविश्य पुनः समाधिं तस्माद् व्युत्थानमस्ति ॥५०॥

सर्वस्य च निर्मितस्य

स्वभूमिकेन निर्माणम्,

नान्यभूमिकेन निर्माणचित्तेनान्यभूमिकं निर्माणं निर्मीयते ।

भाषणं त्वधरेण च ।

स्वभूमिकेन चेति च-शब्दः । कामधातुप्रथमध्यानभूमिको हि निर्मितः स्वभूमिकेनैव चित्तेन भाष्यते । ऊर्ध्वभूमिकस्तु प्रथमध्यानभूमिकेन; ऊर्ध्वं विज्ञप्तिसमुत्थापकाभावात् ।

बहूनां निर्मितानां भाषणं

निर्मात्रैव सहाशास्तुः,

ध्यानवल्लाभ[1] इति । मौलध्यानानामिव वैराग्यतो निर्माणचित्तानां लाभः ।

शुद्धकाद् ध्यानाद् अनन्तरं निर्माणचित्तमिति । निर्माणचित्तसम्मुखीभावे यदाद्यं तत् शुद्धकादुत्पद्यते । **निर्माणचित्ताद्वेति** । द्वितीयादिप्रवाहे ।

निर्माणचित्तादपि शुद्धकमिति । निर्माणचित्ताद् व्युत्थाने निर्माणचित्तं च प्रवाहे । **समाधिफलस्थितस्येति** । समाधिनिर्माणचित्तस्थितस्य ॥ ५० ॥

ऊर्ध्वभूमिकस्त्विति । द्वितीयादिध्यानभूमिकः । **प्रथमध्यानभूमिकेन** भाष्यते । **ऊर्ध्वं** द्वितीयादिषु **विज्ञप्तिसमुत्थापकस्य** सवितर्कस्य सविचारस्य चित्तस्याभावात् ।

---

१. ध्यानवान् लाभ—जा० ।

वुद्धादन्यस्य निर्माणं निर्मात्रा सह भाषते। यदा च वहवो निर्मिता भवन्ति तदा युगपद् भाषन्ते।

एकस्य भाषमाणस्य भाषन्ते सह निर्मिताः।
एकस्य तूष्णीभूतस्य सर्वे तूष्णीम्भवन्ति ते"॥ ( )

इति गाथा।

वुद्धस्य पूर्वं पश्चाद्वा यथेच्छं निर्मिता भाषन्ते।

यदा भाषणचित्तं तदा निर्माणचित्ताभावः, निर्माणचित्ताभावान्निर्मिताभाव इति कथमेनं भाषयन्ति ?

अधिष्ठायान्यवर्त्तनात् ॥ ५१ ॥

निर्माणमधिष्ठायावस्थानकामतया अन्येन चित्तेन[1] वाचं प्रवर्तयन्ति ॥ ५१ ॥

किं जीवित एवाधिष्ठानमनुवर्तते, अथ मृतश्चापि ?

मृतस्याप्यस्त्यधिष्ठानम्,

आर्यमहाकश्यपाधिष्ठानेन तदस्थिशङ्कुलावस्थानात्। तत्तु—

नास्थिरस्य,

निर्माणचित्ताभावान्निर्मिताभाव इति। निमित्ताभावे नैमित्तिकस्याप्यभाव इत्यसन्तं कथमेनं निर्मितं भाषयन्तीत्यभिप्रायः।

"अधिष्ठायान्यवर्तनात्" इति। निर्माणचित्तेन निर्मितं निर्माय ततश्चाधिष्ठायावस्थानकामतया तिष्ठत्वेतदिति। ततः उत्तरकालमन्येन विज्ञप्तिसमुत्थापकेन सवितर्कसविचारकेण चित्तेन वाचं प्रवर्तयन्ति निर्मातारः। पूर्वाभिप्रायं हि सन्ततिरनुवर्तते। पूर्वं हि तेन चेतसि व्यवस्थापितम्—निर्माणं निर्मास्यामि, तदधिष्ठास्यामि, तद् वाचयिष्यामीति ॥ ५१ ॥

अवस्थाद्वयेऽधिष्ठानसम्भवात् पृच्छति—किं जीवित एवाधिष्ठानमित्यादि।

आर्यमहाकाश्यपाधिष्ठानेनेति। आर्यमहाकाश्यपाधिमोक्षेणेत्यर्थः ॥ ५२ ॥

---

१. मनसा—पाठ।

अस्थिरस्य तु भावस्य नास्त्यधिष्ठानम्; आर्यकाश्यपेन मांसादीनामधिष्ठानात् ।

अपरे तु न ।

अपरे पुनराहुः—नास्ति मृतस्याधिष्ठानम् । अस्थिशङ्खलावस्थानं तु देवतानुभावादिति ।

किमेकेन चित्तेनैकमेव निर्मितं निर्मिणोति ?

आदावेकमनेकेन जितायां तु विपर्ययात् ॥ ५२ ॥

आदित एकं निर्मितमनेकेन निर्माणचित्तेन निर्मिणोति । जितायां त्वभिज्ञायामेकेन चित्तेनानेकं निर्मिणोति यावन्निर्मातुमिष्टं भवति ॥ ५२ ॥

अथ किं सर्वनिर्माणचित्तमव्याकृतं भवति ?

अव्याकृतं भावनाजम्,

यद्भावनाफलं तदवश्यमव्याकृतं भवति ।

त्रिविधं तूपपत्तिजम् ।

उपपत्तिप्रतिलम्भिकं तु निर्माणचित्तं कुशलाकुशलमव्याकृतं भवति देवनागपिशाचादीनाम् । तत्कृतं च स्वपरसम्बद्धं[1] निर्माणं[1] नवायतनिकं भवति; अस्वभावरूप्यायतनत्वात्, इन्द्रियाविनिर्भुक्तत्वात्[2] । न त्विन्द्रियं निर्मीयते ।

किमेषैव द्विविधर्द्धिः भावनामयी चोपपत्तिलाभिका च ?

"त्रिविधं तूपपत्तिजम्" इति । कदाचिद्धि देवादयः परानुग्रहार्थं परान् निर्मिण्वन्ति, कदाचिद् विहेठनार्थमित्यादि । तत्कृतं चेति विस्तरः । देवादिकृतं च । **स्वपरसम्बद्धं निर्माणं नवायतनिकम्** । कुतः ? **अस्वभावरूप्यायतनत्वात्** । यस्मादशब्दानि चक्षुरायतनरूपायतनादीनि तत्र सन्तीति शब्दः सन्तानाभावान्न निर्मीयते । अचित्तकत्वाच्च न मनोधर्मायतनम् । अचित्तको निर्माता इति कथं गम्यते ? शास्त्रात् । एवं हि आह—"तन्निर्मितश्चातुर्महाभूमिको वक्तव्यः ? न चातुर्महाभूमिको वक्तव्यः । आह—चातुर्महाभूमिको वक्तव्यः उपादायरूपिकः, नोपादायरूपिको वक्तव्यः । आह—उपादायरूपिको वक्तव्यः, अचित्तको वक्तव्यः । कस्य

१—१. स्वपरशरीरनिम'णं—का० ।

२. अशब्दरूप्या०—का० ।

एषा च द्विविधा

ऋद्धिर्मन्त्रौषधाभ्यां च कर्मजा चेति पञ्चधा ॥ ५३ ॥

समासतः पञ्चविधामृद्धिं वर्णयन्ति—भावनाफलम्, उपपत्तिलाभिकम्, मन्त्रजाम्, औषधजाम्, कर्मजां च । यथा मान्धातुः, अन्तराभविकानां च ॥ ५३ ॥

यदिदं दिव्यश्रोत्रमुक्तं चक्षुश्च, किमेते दिव्ये एव ? आहोस्वित् दिव्ये इव दिव्ये, यथा बोधिसत्त्वचक्रवर्तिगृहपतिरत्नानाम् ?

दिव्यश्रोत्राक्षिणी,

यस्मात् ते

रूपप्रसादौ ध्यानभूमिकौ ।

ध्यानसमापन्नस्य शब्दालोकाभोगप्रयोगेण ध्यानभूमिकानि भूतान्युपादायरूपप्रसादौ निर्वर्तेते चक्षुःश्रोत्रसामन्तके रूपशब्दयोर्दर्शनश्रवणहेतू इति ध्यानभूमिकत्वात् दिव्ये एव ते चक्षुःश्रोत्रे ।

ते च पुनः—

सभागावकले नित्यं दूरसूक्ष्मादिगोचरे ॥ ५४ ॥

चित्तवशेन वर्तन्त इति वक्तव्यम् ? आह—निर्मातुः चित्तवशेन वर्तन्ते इति । यदि तर्हि नवायतनिक निर्मीयते, इन्द्रियनिर्माणात् कथं नापूर्वसत्त्वप्रादुर्भावो भवति ? सत्त्वसङ्घ्यातानि हीन्द्रियाणि" इति । अत आह—इन्द्रियाविनिर्भूतत्वादिति । यस्माच्चक्षुरादिभिरिन्द्रियैः पञ्चभिः स्वपरशरीरसम्बद्धं निर्माणं रूप-रस-स्प्रष्टव्यस्वभावविनिर्भागेनावस्थितं भवत् नवायतनिकमित्युच्यते । न त्विन्द्रियं निर्मीयते—इत्येष सिद्धान्तः । यत् पुनस्तदेव स्वपरशरीरासम्बद्धं निर्मिणोति, तच्चतुरायतनिकमेव भवति ॥

यथा मान्धातुरन्तरानविकानां चेति । कर्मजाया ऋद्धेरेतदुदाहरणमुच्यते ॥ ५३ ॥

किमेते दिव्ये एवेति । किमयं दिव्यशब्दो मुख्यवृत्तिः, आहोस्वित् औपचारिक इत्यभिप्रायः । यदि हि 'एते दिवि भवे दिव्ये' इत्यर्थो गृह्यते, मुख्यवृत्तिरयं शब्दो भवति; अथ तु दिव्ये इवेति दिव्ये इति, औपचारिकः । यथा बोधिसत्त्व-चक्रवर्ति-गृहपतिरत्नानामिति औपचारिके दृष्टान्तं दर्शयति ।

नास्ति दिव्यं चक्षुः श्रोत्रं च तत्सभागं नित्यं विज्ञानसहितत्वात्, नापि विकलम्; काणविभ्रान्ताभावात्, रूपावचरसत्त्ववत् । दूरसूक्ष्मवृतान्यपि रूपाणि शब्दाश्च तयोर्विषयः । आह चात्र—

दूरस्थमावृतं सूक्ष्मं सर्वतश्च न पश्यति ।
मांसचक्षुर्यतो रूपमतो दिव्यं दृगिष्यते ।।

कियद् दूरं पुनर्दिव्येन चक्षुषा पश्यति ? यस्य यादृशं चक्षुर्भवति । श्रावक-प्रत्येकबुद्ध-बुद्धास्त्वनभिसंस्कारेण साहस्र-द्विसाहस्र-त्रिसाहस्रकान् लोक-धातून् यथासंख्यं पश्यन्ति । ५४ ।।

अभिसंस्कारेण तु

द्वित्रिसाहस्रकासंख्यदृशोऽर्हत्खड्गदैशिकाः ।

सर्वाभिसंस्कारेण सह श्रावकोऽपि द्विसाहस्रं लोकधातुं दिव्येन चक्षुषा पश्यति । त्रिसाहस्रं खड्गविषाणकल्पः । बुद्धस्तु भगवानसंख्येयान् लोकधातून् पश्यति यावदेवेच्छति ।

किमृद्धिरेवोपपत्तिलाभिका भवति, अथान्यदपि ?

अन्यदप्युपपत्त्याप्तम्,

दिव्यश्रोत्रादिकमपि चतुष्टयमुपपत्तिप्रतिलब्धमस्ति[1] । न तूपपत्त्याप्तं किञ्चिदभिज्ञाख्यां लभते ।

यत्तूपपत्तिप्रतिलम्भिकं दिव्यं चक्षुः,

विज्ञानसहितत्वादिति । रूपदर्शनमुखेनाभिनिहृतत्वान्नित्यं विज्ञान-सहितमिति सभागमेव । **काणविभ्रान्ताभावादिति** । काणम्=आभ्यन्तर-विकलम् । विभ्रान्तम्=केकरम्, सर्वतश्च न पश्यतीति । अर्थादुक्तं भवति= दिव्यं चक्षुः पृष्ठतोऽपि पश्यति, पार्श्वतोऽपि पश्यति; न त्वेवमदिव्यं चक्षुरिति ।। ५४ ।।

दिव्यश्रोत्रादिकमपि चतुष्टयमिति । आदि-शब्देन दिव्यं चक्षुः, पूर्व-निवासानुस्मृतिः, परचित्तज्ञानं च । एतदपि दिव्यश्रोत्रादिकं चतुष्टयम् । **उपपत्तिप्रतिलब्धमस्ति** । दिव्यं चक्षुः केषामुपपत्तिप्रतिलम्भिकम् ? कामा-वचराणां देवानाम्, अनागामिनां च रूपावचराणाम्, नारूप्यावचराणाम् । तत्र रूपाभावाद् दृष्टिः गमनं निर्माणं च नास्ति । नापि दिव्यं श्रोत्रं

---

१. ०प्रतिलम्य०—का० ।

तद् दृश्यो नान्तराभवः[1] ॥ ५५ ॥

अभिज्ञाचक्षुषैव ह्यन्तराभवो दृश्यते, नोपपत्तिप्रतिलब्धेन ॥ ५५ ॥

चेतोज्ञानं तु तत् त्रेधा,

'उपपत्त्याप्तम्' इति वर्तते । परचित्तज्ञानं तूपपत्तिप्रतिलब्धं त्रिविधं वेदितव्यं कुशलाकुशलाव्याकृतम् ।

तर्कविद्याकृतं च यत् ।

यच्चापि तार्किकं परचित्तज्ञानम्, नैमित्तिकानां यच्च विद्याकृतम्—तदपि त्रिविधं वेदितव्यम् । न यथा भावनाफलं कुशलमेव । उपपत्तिप्रतिलम्भिकाभ्यां तु परचित्तज्ञानपूर्वनिवासानुस्मृतिभ्याम् ।

जानते नारका आदौ,

यावन्न दुःखवेदनाभ्याहता भवन्ति । अन्यगतिस्था नित्यं जानते ।

नृणां नोत्पत्तिलाभिकम् ॥ ५६ ॥

मानुष्याणामेतद् यथोक्तमृद्ध्यादिकं नास्त्युपपत्तिलाभिकम्[2] ।

यत्तर्हि प्रकृतिजातिस्मरा भवन्ति ? कर्मविशेषजाऽसौ तेषाम् ।

चक्षुश्चास्ति । परचित्तज्ञानमपि नास्ति; स्वपरसन्तानपरिच्छेदाभावात् । पूर्वनिवासानुस्मृतिरपि नास्ति; कामरूपावचरसत्त्ववत् तादृशस्यात्मभावस्य असमुद्गमात् । अथवा सर्वा अपि अभिज्ञा न सन्ति; कामरूपावचरसत्त्ववत् तादृशस्यात्मभावस्यासमुद्गमात् ॥ ५५ ॥

न यथा भावनाफलं कुशलमेवेति । विपरीतदृष्टान्तः ।

अन्यगतिस्था नित्यं जानत इति । ताभ्यां परचित्तपूर्वनिवासानुस्मृतिभ्यां देवादिगतिस्था नित्यं जानते; दुःखवेदनानभ्याहतत्वात् ।

'नृणां नोत्पत्तिलाभिकम्" इति । मानुष्याणामेतद् यथोक्तम् ऋद्ध्यादिकं वैराग्यलाभिकं तर्कविद्योपधकर्मकृतं[3] चास्ति । न तूपपत्तिलाभिकमस्ति ।

समापत्तिध्यानं तु वक्तव्यम् । अत उच्यते—

समापत्तिः शुभैकाग्र्यम्,

अभेदेन कुशलचित्तैकाग्रता ध्यानम्; समाधिस्वभावत्वात् ।

पञ्चस्कन्धास्तु सानुगम् ॥ १ ॥

सपरिवारं तु पञ्चस्कन्धस्वभावं वेदितव्यम् ।

केयमेकाग्रता नाम ? एकालम्बनता ।

एवं तर्हि चित्तान्येवैकालम्बनानि समाधिः, न चैतसिकं धर्मान्तरमिति प्राप्नोति ? न चित्तान्येव समाधिः । येन तु तान्येकाग्राणि वर्तन्ते स धर्मः समाधिः । सैव चित्तैकाग्रता ।

ननु च क्षणिकत्वात् सर्वं चित्तमेकाग्रम्, द्वितीयस्य तस्मादविक्षेप इति

"शुभैकाग्र्यम्" इति । शुभानां चित्तानामैकाग्र्यम् । **अभेदेनेति** । सर्वेषामपि लक्षणानाम् एतल्लक्षणम् । अत आह—**समाधिस्वभावत्वादिति** । ध्यानानामिति वाक्यशेषः ।

अथवा अभेदेनेति समाधिमात्रग्रहणम् ।

भेदेन **"पञ्चस्कन्धास्तु सानुगम्"** इति । अविज्ञप्तिरूपमात्र-रूपस्कन्धः ।

एकालम्बनता एकालम्बनत्वं चित्तानाम् । किं पुनः कारणं चैतानामप्येकालम्बनत्वे एकालम्बनत्वं चित्तानामित्युच्यते, न पुनरेकालम्बनतां चित्तचैत्तानामित्युच्यते ? प्राधान्यात् **चित्तान्येवैकालम्बनानि समाधिरिति** । अवस्थाविशेषत्वाच्चित्तगुणभाववत्[1] । **वैभाषिक** आह—**न चित्तान्येव समाधिः । येन तु तान्येकाग्राणि वर्तन्ते** समाहितानि **स धर्मः समाधिः** । यथा **वैशेषिक-नये** शुक्लगुणयोगाच्छुक्लेन पटः, स एव गुणोऽस्य शौक्लमित्युच्यते, तद्वत् ।

ननु च क्षणिकत्वात् सर्वं चित्तमेकाग्रम् । किमिदमुच्यते—येन तु तानि एकाग्राणि वर्तन्ते स धर्मः समाधिरिति । **द्वितीयस्य तस्माद् अविक्षेप इति चेत्** । यद्येतत् स्याद्—द्वितीयस्य चित्तस्य तस्मात् समाधेरविक्षेपः । कस्मिन्ना-

---

१. गुर्ववत्—का० ।

चेत् ? सम्प्रयुक्ते समाधिवैयर्थ्यम् । यत एव च कारणात् समाधिः, स्तत एव कारणात्[1] चित्तानामेकालम्बनत्वं किं नेष्यते, महाभूमिकत्वाच्च समाधेः सर्वचित्तानामेकाग्रताप्रसङ्गः ? न; दुर्बलत्वात्समाधेः ।

चित्तान्येवैकाग्राणि समाधिः । तथा ह्यधिचित्तं शिक्षा चित्तपरिशुद्धि-प्रधानं च सूत्रे चत्वारि ध्यानान्युक्तानीत्यपरे ।

ध्यानमिति कोऽर्थः ? ध्यायन्त्यनेनेति । प्रजानन्तीत्यर्थः । समाहित-चित्तस्य यथाभूतप्रज्ञानात् । चिन्तनार्थो ह्येष धातुः । चिन्तनं च प्रज्ञेति

लम्बने न विक्षेपः ? अस्मिन्नालम्बने न विक्षेप इति । सम्प्रयुक्ते समाधि-वैयर्थ्यम् । यत् प्रथमं चित्तं समाधिसम्प्रयुक्तम्, तस्मिन् सम्प्रयुक्ते समाधि-वैयर्थ्यम् । तत्र कारित्रं समाधिर्न करोति, द्वितीये करोतीति कृत्वा । किञ्च यत एव च कारणात् समाधिरेकाग्रतालक्षणोऽभिप्रेतः । तत एव च कारणात् चित्तानामेकालम्बनत्वं किं नेष्यते । किं समाधिना अर्थान्तरभूतेनेति अभिप्रायः ।

न; दुर्बलत्वात् समाधेः । न; महाभूमिकत्वात् समाधेः सद्भावात् सर्वस्य चित्तस्यैकाग्रताप्रसङ्गः[2] । यच्चित्तं दुर्बलेन समाधिना सम्प्रयुज्यते, न तदेकाग्रं भवति । यत् पुनर्बलवता, तच्चित्तमेकाग्रमिति सत्यपि महा-भूमिकत्वे समाधेर्न सर्वचित्तानामेकाग्रताप्रसङ्गः ।

चित्तान्येवेति विस्तरः । चित्तान्येवैकाग्राणि समाधिः । नार्थान्तरभूत इति । तथा हि अधिचित्तं शिक्षेति । "अधिचित्तं शिक्षा कतमा ? चत्वारि ध्यानानि" इति सर्वम् । तथा चित्तपरिशुद्धिप्रधानं चत्वार्येव ध्यानानि इत्यु-क्तानि । लिखितमिदं सूत्रम्—"ऋद्धिपादा समाधयः" (अभि० को० ६.६९) इत्यत्र । यथा हि अधिशीलं शिक्षा शीलमेव, न तस्मादन्या । अधिप्रज्ञं च शिक्षा प्रज्ञैव, न तस्या अन्या । एवमधिचित्तं शिक्षा चित्तमेव, न तस्मादन्या । न चित्तव्यतिरिक्तसमाधिरस्तीत्यर्थः । अधिचित्तं हि शिक्षा समाधिरिष्यते । यथा चास्मिन्नेव सूत्रे शीलपरिशुद्धिप्रधानं विमुक्तिपरिशुद्धिप्रधानमित्युक्ते न शीलपरिशुद्धिः शीलादन्या । एवं दृष्टिपरिशुद्धिः, विमुक्तिपरिशुद्धिश्च । तथैव चित्तपरिशुद्धिरपि न चित्तादन्या । चित्तपरिशुद्धिर्हि चतुर्ध्यानलक्षण-समाधिरिति ।

---

१. ता० पुस्तके नास्ति । २. ...सम्बुता०—ता० ।

सिद्धान्तः । एवं तर्हि सर्वसमाधिध्यानप्रसङ्गः ? न; प्रकर्षयुक्ते तन्नामविधानाद्, भास्करवत् । कश्च प्रकर्षयुक्तः ? योऽङ्गसमायुक्तः समाधिः । स हि शमथविपश्यनाभ्यां युगनद्धवाहित्वाद् दृष्टधर्मसुखविहार उक्तः, सुखा च प्रतिपदिति । सुतरां तेन ध्यायन्ति ।

क्लिष्टस्य कथं ध्यानत्वम् ? मिथ्योपनिध्यानात् । अतिप्रसङ्गः ? न; तत्प्रतिरूप एव तत्संज्ञाविनिवेशात् पूतिवीजवत् । उक्तानि चाकुशलान्यपि[1] ध्यानानि[1] भगवता ।। १ ।।

एवं तर्हीति । यदि समाधिस्वभावानि ध्यानानि । **सर्वसमाधिध्यानप्रसङ्गः** । कुशलक्लिष्टाव्याकृतानामपि समाधीनां ध्यानप्रसङ्गः; समाधेर्महाभूमिकत्वात् । **न; प्रकर्षयुक्त** इति विस्तरः । नैतदेवम्; प्रकर्षयुक्ते समाधौ ध्यान-**नामविधानात् भास्करवत्** । तद्यथा य एव प्रकर्षेण **भासं करोति** स एव भास्करः, न खद्योतकादिः । तद्वत् । **स हीति** विस्तरः । **स ह्यङ्गसमायुक्तः समाधिः शमथविपश्यनाभ्यां** युगनद्धाभ्यामिवाश्वाभ्यां रथो वहतीति **युगनद्धवाही**, तद्भावात् दृष्टधर्मसुखविहार उक्तः सूत्रे । **सुखा च प्रतिपदिति** । अङ्गसमायुक्त एव समाधिः । सुखा च प्रतिपदित्युक्तः—इति वर्तते । **सुतरां तेन ध्यायन्ति** सुखवत् ।

क्लिष्टस्य कथं ध्यानत्वमिति । यदि कुशलाङ्गसमायुक्तः समाधिर्ध्यानम्, क्लिष्टस्यास्वादनासम्प्रयुक्तस्य कथं ध्यानत्वम् ? युक्तमिति वाक्यशेषः । "आस्वादनासम्प्रयुक्तं शुद्धकमनास्रवम्" (अभि० को० ८.६) इति वचनात् ।

मिथ्योपनिध्यानादिति । मिथ्यानितीर्णादित्यर्थः । **अतिप्रसङ्ग इति** । कामरागपर्यवस्थितेनापि चेतसा मिथ्योपनिध्यानात् तत्प्रसङ्गः । **न; तत्प्रतिरूप एवेति** विस्तरः । **नैतदेवमतिप्रसङ्ग इति** । **तत्प्रतिरूप एव हि** नातिबहुविलक्षणे क्लिष्टे ध्यानमिति **संज्ञासन्निवेशः** । **पूतिवीजवत्** । यथा किञ्चिदबीजं पाषाणादि अत्यन्ततज्जातिविलक्षणं न पूतिबीजमित्युच्यते, किं तर्हि ? बीजजातीयमेवोपहतं यद् भवति तस्मिन्नेव संज्ञासन्निवेशः—'पूतिबीजम्' इति । **उक्तानि चाकुशलान्यपि ध्यानानीति** । स कामरागपर्यवस्थितः कामरागपर्यवस्थानमन्तरीकृत्वा ध्यायति प्रध्यायतीति विस्तरः ।। १ ।।

१—१. चाकुशलानि ध्यानान्यपि—का० ।

कीदृशं पुनः कुशलमैकाग्र्यं प्रथमं ध्यानम्, कीदृशं यावच्चतुर्थम् ?

प्रथमं तावत्—

विचारप्रीतिसुखवत्,

विचारप्रीतिसुखसंयुक्तं कुशलमैकाग्र्यं तत् प्रथमं ध्यानम्। विचारवचनाद् वितर्कोऽप्युक्तो भवति; साहचर्याद् धूमाग्निवत्। न हि प्रीतिसुखवान् विचारो विना वितर्केणास्ति।

शेषं पुनर्ध्यानत्रयम्

पूर्वपूर्वाङ्गवर्जितम्।

'शुभैकाग्र्यम्' वर्तते। विचारविवर्जितं प्रीतिसुखवत् द्वितीयम्, विचारप्रीतिवर्जितं तृतीयम्, विचारप्रीतिसुखवर्जितं चतुर्थमिति।

अनेन कामरागादिपर्यवस्थानस्यापि ध्यानत्वे सति न दोष इति दर्शयति--धूमाग्निवदिति। यथा 'धूमोऽत्र' इति धूमवचनेनाग्निरप्युक्तो भवति; साहचर्यात्। न विनाग्निना धूमो भवतीति। अनेनैव चाविनाभावित्वेन धूमस्याभ्यर्हितत्वम्—यत्र हि धूमस्तत्राग्निः, न तु यत्राग्निस्तत्र धूमः। तथा हि—अयोगुडाङ्गारादिष्वग्निरेव गृह्यते, न धूमः। अस्माच्चाभ्यर्हितत्वाद् धूमस्य पूर्वनिपातः, वासुदेवार्जुनवत्। अन्यथा हि "द्वन्द्वे घि[1]" (पा० सू० २.२.३२) इत्यग्निशब्दस्य पूर्वनिपातः स्यात्। कथं पुनः साहचर्येण हि प्रीतिसुखवान् विचारो विना वितर्केण नास्ति। यथा ध्यानान्तरविचारः। न प्रीतिसुखवानिति अवितर्कः, नैवमयं विचारः। विशेषितो ह्ययं विचारः प्रीतिसुखसहगठितः "विचारप्रीतिसुखवत्" (अभि० को० ८.२) इति वक्ष्यति। वितर्कवर्जितं द्वितीयं ध्यानमिति ध्यानान्तरमपि द्वितीयं ध्यानं प्राप्नोति। किं च चत्वार्यङ्गानि प्रथमध्याननिर्देशावसानेऽनेनानुक्रमेणोक्तानि—'सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्य विहरति' इति। तत्र विचारप्रीतिसुखसमाधयः प्रथमे ध्याने भवन्ति। एभिश्चतुर्भिरङ्गैर्वितर्केण च सर्वप्रथमोक्तेन पश्चाङ्गमुच्यते। द्वितीयं पुनरुच्यते—'अवितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति' इति। चतुर्णामपां पूर्वाङ्गेन विचारलक्षणेन वर्जितमिति। तृतीयमप्येवमुच्यते—'स प्रीतेर्विरागात् उपेक्षको विहरति निष्तरेण, यावत् सुखविहारीति तृतीयं ध्यानमुपसम्पद्य विहरति'

१. द्वन्द्वेऽभि—ता०।

यथा ध्यानानि

तथारूप्याः,

केन प्रकारेण ? एतेऽपि हि द्विधा—उपपत्ति-समापत्तितः। चत्वारश्च चोपपत्तय उक्ताः। समापत्त्यारूप्यास्त्वभेदेन कुशलैकाग्रतास्वभावा इति।

अनेन प्रकारेण सपरिवाराः

चतुःस्कन्धाः,

अनुपरिवर्तकरूपाभावात्[1]।

अधोभूमिविवेकजाः ॥ २ ॥

चतुर्थध्यानविवेकजं ह्याकाशानन्त्यायतनम्, तद्विवेकजं विज्ञानानन्त्यायतनम्, तद्विवेकजमाकिञ्चन्यायतनम्, तद्विवेकजं नैवसंज्ञानासंज्ञायतनम्—इत्येवं चत्वार आरूप्याः।

कोऽयं विवेको नाम ? येन मार्गेणाधस्ताद् विमुच्यते; वैराग्यगमनात् ॥ २ ॥

इति। प्रीतिलक्षणेनापरेणाङ्गेन वर्जितमिति। चतुर्थं पुनरेवमुच्यते—'स सुखस्य च प्रहाणाद्, विस्तरेण यावत्, अदुःखासुखमुपेक्षास्मृतिपरिशुद्धिं चतुर्थं ध्यानमुपसम्पद्य विहरति' इति। सुखेनाप्यङ्गेन वर्जितं समिधिरेवात्र केवलमवशिष्यते इति। अत एव सूत्रं कृतम्—"विचारप्रीतिसुखवत्" (अभि० को० ८.२) इति ॥

एषामपि चोपपत्तय उक्ता इति। "आरूप्यधातुरस्थान उपपत्त्या चतुर्विधः" (अभि० को० ३.३) इति वचनात्।

अनुपरिवर्तकरूपाभावादिति। ध्यानानास्रवसंवराभावादित्यर्थः।

विवेक इति। विविच्यतेऽनेनेति विवेकः। **येन मार्गेणेति**। आनन्तर्यमार्गेण, विमुक्तिमार्गेणापि वा; तदेककार्यत्वात्। **वैराग्यगमनादिति**। तद्वैमुख्यगमनादित्यर्थः ॥ २ ॥

---

१. अनुपरिवर्ति०—जाc।

त एव चारूप्याः

विभूतरूपसंज्ञाख्याः सह सामन्तकैस्त्रिभिः ।

आकाशानन्त्यायतनसामन्तकं चतुर्थध्यानालम्बनत्वाद् विभूतरूपसंज्ञाख्यां न लभते । न हि तत्र रूपसंज्ञा विभूता, न विगतेत्यर्थः । यदुक्तं "चतुःस्कन्धा" (अभि० को० ८.२) इति ।

साध्यं तावदेतद्—आरूप्येषु रूपं नास्तीति । यदि हि स्यात्, कथमारूप्या उच्येरन् ? ईषद्रूपत्वाद्, आपिङ्गलवत् । कीदृशं तावदीषद्रूपं तत्रेष्यते ? यदि कायवाक्संवरमात्रम्, कथं तदभावे तत्संवरौ भविष्यतः । न चासति भूते भौतिकं युज्यते । अनास्रवसंवरवच्चेत् ? सास्रवभूतसद्भावात् ।

समापत्तावपि तत्प्रतिषेध उक्तः ।

अथ कायोऽप्यस्तीन्द्रियाण्यपि रूपीणि । कथं तदीषद्रूपा इष्यन्ते ? परिमाणाल्पत्वाच्चेत्, उदकजन्तुकेष्वप्यदृश्यारूपेषु प्रसङ्गः ? अच्छत्वाच्चेत्,

---

"विभूतरूपसंज्ञाख्याः" इति । विभूता रूपसंज्ञा अस्येति विभूतरूपसंज्ञः, विभूतरूपसंज्ञा इत्याख्या येषामिति विभूतरूपसंज्ञाख्याः ।

साध्यं तावदेतदिति । निकायान्तरीयाः । यदि हि स्यादिति । वैभाषिकाः । आपिङ्गलवदिति । यथा ईषत् पिङ्गल आपिङ्गलः, एवम् ईषद् रूपा आरूप्या इति । कथं तदभावे तत्संवरौ कायवाक्संवरौ भविष्यतः । न चासति भूते आरूप्यावचरे संवरभौतिकं आरूप्यावचरं युज्यते । अनास्रव-संवरवच्चेत् । तदेतत् स्यात् । यथा न सन्ति अनास्रवाणि भूतानि । अस्ति चानास्रवसंवरो भौतिकं रूपम् । एवमिहापि नारूप्यावचराणि भूतानि स्युः । अथवा आरूप्यावचरसंवरः स्याद् भौतिकं रूपमिति । तच्च न । सास्रवभूतसद्भावात् । सास्रवाणि भूतानि सन्ति । तान्यारूप्येषु भवेयुः । अनास्रवाणि तु भूतानि न सन्ति । अतोऽनास्रवसंवरो यत्र जातः, तत्रत्यानि सास्रवाण्युपादाय भवतीत्यकल्पनेयम्; असाम्यात् । समापत्तावपि तत्प्रतिषेधः उक्त इति । अनेनैवोपपत्तिरूपप्रतिषेधेन समापत्तावपि रूपप्रतिषेध उक्तो भवति । नात्र यत्नान्तरमनुष्ठेयम् । कस्मम् ? यदि कायवाक्संवर-मात्रम्, कथं तदभावे तत्संवरौ भविष्यति ? न चासति भूते भौतिकं युज्यते । अनास्रवसंवरवच्चेत् ? न; सास्रवभूतसद्भावादिति ।

अन्तराभवरूपावचरेष्वपि प्रसङ्गः ? यतो नाच्छतरं चेत्, भवाग्रमेवारूप्यं स्यात्; समापत्तिवत्तदुपपत्तिविशेषात् । ध्यानोपपत्तिरूपस्यापि चाधरभूमिकेन्द्रियाग्रहणात् कस्तत्र विशेषः ।

द्वयोर्धात्वोरन्वर्था संज्ञा, नारूप्यधातोरिति चेत् । काऽत्र युक्तिः ? "आयुरूष्मणोः संसृष्टवचनान्नडकलापीद्वयवन्नामरूपयोरन्यनिश्रितवचनात् विज्ञानप्रत्ययं नामरूपम्" ( ) इति वचनात् ।

ईषद्रूपा इष्यन्ते । **उदकजन्तुकेष्वपि अणुत्वाददृश्यारूपेषु प्रसङ्गः** । आरूप्यप्रसङ्ग इत्यर्थः । **अच्छत्वाच्चेत्**[1] । तत्रैतत् स्यात्—रूपस्याच्छत्वादारूप्या इति । अन्तराभवरूपावचेरष्वपि प्रसङ्गः । अन्तराभवरूपावचरा हि वज्रमयेष्वपि पर्वतेष्वच्छत्वादसज्जमाना गच्छन्ति । तेष्वारूप्यप्रसङ्गः । **समापत्तिवत् तदुपपत्तिविशेषादिति** । यथैव हि आकाशानन्त्यादिसमापत्तयो विशिष्टात्माः, एवमुपपत्तिविशेषोऽपि तासामभ्युपगन्तव्यः—अच्छाच्छतरतम इति । अथ समापत्तिवदुपपत्तिविशेषोऽच्छाच्छतरतम इति तदेवारूप्यं स्यात् । यदि चारूप्योपपत्तिरूपस्याधरभूमिकेनेन्द्रियेणाच्छतरत्वादग्रहणमित्यारूप्या उच्यन्ते । **ध्यानोपपत्तिरूपस्यापि चेति** विस्तरः । एष सम्भवो ध्यानोपपत्तिरूपस्यापि **चाधरभूमिकेनेन्द्रियेणाग्रहणम्** । कथम् ? प्रथमध्यानभूमिकेनेन्द्रियेण द्वितीयभूमिकस्याग्रहणम् । एवं; यावत्, तृतीयध्यानभूमिकेनेन्द्रियेण चतुर्थध्यानभूमिकस्य रूपस्याग्रहणम्, ऊर्ध्वभूमिकस्याच्छतरतमत्वात् । तदेवं ध्यानोपपत्तिरूपस्य चाधरभूमिकेनेन्द्रियेणाग्रहणात् । **कस्तत्र विशेषः** । आरूप्यधातौ यदच्छतरतमाभ्याम्, सामान्येऽपि त एवारूप्या इष्यन्ते, न रूपावचराः । तस्मान्न तत्र रूपम् ।

अथ मतम्—**द्वयोर्धात्वोरन्वर्था संज्ञा** । कामगुणप्रभावितः कामधातुः, रूपप्रभावितो रूपधातुरिति । **नारूप्यधातोरन्वर्था संज्ञा** । किं तर्हि ? यादृच्छिकीति । **काऽत्र युक्तिः** । द्वयोर्धात्वोरन्वर्था संज्ञा, नारूप्यधातोरिति युक्त्या प्रतिषिद्धय 'नारूप्यधातौ रूपमस्ति' इति आगमं परिगृह्याशङ्कितं वार्यते । तत्र रूपप्रसिद्धयर्थं **आयुरूष्मणोरिति** विस्तरः । **आरूप्येषु रूपास्तित्वसिद्धिरिति चेत्** इति । एतत् पदं प्रत्येकं योज्यम् । कथम् ? **आयुरूष्मणोः संसृष्टवचनात्** रूपास्तित्वसिद्धिरिति चेत्, तत्रैतत् स्यात् सूत्र उक्तम्—"यच्चायुष्मन् कौण्ठिल! आयुः, यच्चोष्मकम्, संसृष्टाविमौ धर्मौ न विसृष्टौ" ( ) इति विस्तरः । अतः तत्रायुषि सत्यूष्मणा भवितव्यम् । ऊष्मा च रूपमिति सिद्धयति । **नडकलापीद्वयवत् नामरूपयोरन्योन्यनिश्रितवचनात्** ।

---

१. अच्छताच्चेत्—जा० ।

अन्यत्र रूपाद् यावत् संस्कारेभ्यो विज्ञानस्यागतिगतिप्रतिषेधाच्चारूप्येषु रूपास्तित्वसिद्धिरिति चेत् ? न; सम्प्रधार्यं तावदेतत्—यदिदमायुरूष्मणोः संसृष्टत्वमुक्तम्, किमिदं कामावचरमायुः सन्धायोक्तम्, आहोस्वित् सर्वमिति ?

यच्च नामरूपयोरन्योन्याश्रितत्वमुक्तं किमिदं कामरूपावचरं नाम सन्धायोक्तम्, आहोस्वित् सर्वमिति ? यच्च विज्ञानप्रत्ययं नामरूपमुक्तम्,

---

आरूप्येषु रूपास्तित्वसिद्धिरिति चेत् ? सूत्रे उक्तम्—"तद्यथा आयुष्मन सारिपुत्र ! द्वे नडकलाप्यावाकाशे उच्छ्रिते स्याताम्। ते अन्योन्यनिश्रिते, अन्योन्यं निश्रित्य तिष्ठेयाताम्। तत्र कश्चिदेकमपनयेत्, द्वितीया निपतेत्। द्वितीयामपनयेत्, एका निपतेत्। एवमायुष्मन् सारिपुत्र ! नामं च रूपं चान्योन्यनिश्रितम्, अन्योन्यं निश्रित्य तिष्ठति" इति विस्तरः।

विज्ञानप्रत्ययं नामरूपमिति वचनात्। तस्मादारूप्येषु रूपास्तित्वसिद्धिरिति चेत् ? प्रतीत्यसमुत्पादसूत्रे उक्तम्—"आरूप्यप्रसिद्धिक्षणे विज्ञानप्रत्ययं नामरूपम्" इति वचनात्। तस्मात् आरूप्येषु रूपमस्तीति सिद्धचति।

अन्यत्र रूपादिति विस्तरः। सूत्र उक्तम्—"रूपोपगं भिक्षवो विज्ञानं तिष्ठति। इति रूपालम्बनरूपप्रतिष्ठितम्। यः कश्चित् भिक्षव एवं वदेत्—अहमन्यत्र रूपाद् वेदनायाः संज्ञायाः संस्कारेभ्यो विज्ञानस्यागतिं गतिं वा वदामीति, तस्य तद् वाग्वस्त्वेव स्यात्" इति। अस्मामपि चागमात् आरूप्येषु रूपमस्तीति सिद्धचति एवं चेत्; तन्न; सम्प्रधार्यत्वात्।

आहोस्वित् सर्वमिति। कामरूपारूप्यावचरम्। अयमत्राभिप्रायार्थः—कामरूपावचरमेवायुः सन्धायैवमुक्तम्। तथा ह्युक्तम्—

"आयुरुष्मा च विज्ञानं यदा कायं जहत्यमी।
अपविद्धस्तदा शेते यथा काष्ठमचेतनः॥" ( ) इति।

किमत्र सर्वविज्ञानं[1] नामरूपस्य प्रत्ययमुक्तम्, आहोस्वित् सर्वं नामरूपं विज्ञान-प्रत्ययमिति ? यच्चान्यत्र रूपादिभ्यो विज्ञानस्यागतिगतिप्रतिषेधः ।

किमत्र सर्वैरेतैर्विना[2] तत्प्रतिषेधः, आहोस्वित् एकेनापीति ? अविशेप-वचनान्न सम्प्रधार्यमिति चेत्, अतिप्रसङ्गः । वाह्यस्यापि ह्यूष्मण आयुषा विनाभावो न प्राप्नोति । वाह्यस्यापि च रूपस्य विज्ञानाश्रितत्वम्[3];

नामरूपमित्येवं षष्ठीवहुव्रीहिसमासे । किमत्र सर्वविज्ञानं कामावचर-संस्कारप्रत्ययं, यावत्, आरूप्यसंस्कारप्रत्ययं नामरूपस्य प्रत्ययः । आहोस्वित् सर्वं नामरूपं विज्ञानप्रत्ययमिति । वयं ब्रूमः—विज्ञानप्रत्ययं नामरूपमित्येवं सर्वस्य नामरूपस्य विज्ञानं प्रत्यय इत्यवधार्यते । न तु सर्वं विज्ञानं नाम-रूपस्य प्रत्यय इत्यवधार्यते । किञ्चिद् विज्ञानं नाम्न एव प्रत्ययो यदा-रूप्यावचरसंस्कारप्रत्ययम् । तदिदमुक्तं भवति—प्रत्यय एव विज्ञानमस्य नामरूपस्य, न त्वस्यैव समुदितस्य नामरूपस्य प्रत्यय इति । सम्भवं प्रत्येवमुच्यते । तथा हि—उपपादुकानां विज्ञानप्रत्ययं षडायतनमेव भवति, न नामरूपम् । अनिष्पन्नषडायतनावस्था हि पञ्चस्कन्धाः 'नामरूपम्' इत्याख्या-यन्ते । सूत्रं च एतमेवार्थं द्योतयति—"विज्ञानं चेदानन्द, मातुः कुक्षिं नावक्रमेत्. अपि तु तन्नामरूपं कललत्वाय सम्मूर्छेत् ?. न भदन्त । विज्ञानं चेदानन्दावक्राम्य क्षिप्रमेवापक्रामेद्, अपि तु तन्नामरूपमित्यत्वाय प्रज्ञायेत ? नो भदन्त । विज्ञानं चेदानन्द, दहरस्य कुमारस्य कुमारिकाया वा उच्छि-द्येत, विनश्येत्, न भवेद्, अपि तु तन्नामरूपं वृद्धिं विपुलतामापद्येत ? नो भदन्त । तदनेनापि पर्यायेण वेदितव्यम् यद् विज्ञानस्य प्रत्ययं नामरूपम् नामरूपप्रत्ययं च विज्ञानम्" ( ) इति विस्तरः ।

किमत्र सर्वैरेतैः रूपादिभिर्विना तत्प्रतिषेध आगतिगतिप्रतिषेधः । तत्र पूर्वस्माल्लोकात् अन्तराभवसन्तत्या इहोपपत्तिः=आगतिः । अन्तरा-भवसन्तत्या पुनरस्माल्लोकात् परलोक उपपत्तिः=गतिः । आहोस्विदेकेनापि रूपादीनाम् अन्यतममेव । वयं ब्रूमः—सर्वैर्विना तत्प्रतिषेध इति । अविशेष-वचनान्न सम्प्रधार्यमिति चेत् । स्यादेषा बुद्धिः—अविशेषेणेदं सूत्रवचनम्—"यच्चायुष्मन् महाकौष्ठिल; आयुरिति विस्तरेण, यावत् रूपोपगं विज्ञानं तिष्ठति" इति । अनेन सूत्रवचनेन विशेषितं कामावचरं रूपावचरं वा आयुः सन्धायोक्तम्, यावत् सर्वैरेव तैर्विना रूपादिभिस्तत् प्रतिषेध इति ? अत्रोच्यते—अतिप्रसङ्गः; वाह्यस्यापि हि ऊष्मणः आयुषा विनाभावो न

---

१. सर्वं विज्ञानम्—का० । २. सर्वैरेव तै०—का० । ३. नानाश्रितत्वम्—का० ।

अविशेषवचनात् । चतुर्विज्ञानस्थितिवच्चाहारचतुष्कवचनाद् रूपारूप्य-धात्वोरपि कवडीकाराहारप्रसङ्गः ।

"अतिक्रम्य देवान् कवडीकराहारभक्षान्" इति वचनात्, प्रीत्याहारवचनाच्चाप्रसङ्ग इति चेत् ?

आरूप्येष्वपि रूपस्याप्रसङ्गः । "रूपाणां निःसरणमारूप्याः", "ये ते शान्ता विमोक्षा अतिक्रम्य रूपाण्यारूप्याः", "अरूपिणः सन्ति सत्त्वाः", "सर्वशो रूपसंज्ञानां समतिक्रमात्" ( ) इति वचनात् । सति हि रूपे स्वं

किमत्र सर्वविज्ञानं[1] नामरूपस्य प्रत्ययमुक्तम्, आहोस्वित् सर्वं नामरूपं विज्ञान-प्रत्ययमिति ? यच्चान्यत्र रूपादिभ्यो विज्ञानस्यागतिगतिप्रतिषेधः ।

किमत्र सर्वैरेतैर्विना[2] तत्प्रतिषेधः, आहोस्वित् एकेनापीति ? अविशेप-वचनान्न सम्प्रधार्यमिति चेत्, अतिप्रसङ्गः । वाह्यस्यापि ह्यूष्मण आयुपा विनाभावो न प्राप्नोति । वाह्यस्यापि च रूपस्य विज्ञानाश्रितत्वम्[3];

नामरूपमित्येवं षष्ठीवहुव्रीहिसमासे । किमत्र सर्वविज्ञानं कामावचर-संस्कारप्रत्ययं, यावत्, आरूप्यसंस्कारप्रत्ययं नामरूपस्य प्रत्ययः । आहोस्वित् सर्वं नामरूपं विज्ञानप्रत्ययमिति । वयं ब्रूमः—विज्ञानप्रत्ययं नामरूपमित्येवं सर्वस्य नामरूपस्य विज्ञानं प्रत्यय इत्यवधार्यते । न तु सर्वं विज्ञानं नाम-रूपस्य प्रत्यय इत्यवधार्यते । किञ्चिद् विज्ञानं नाम्न एव प्रत्ययो यदा-रूप्यावचरसंस्कारप्रत्ययम् । तदिदमुक्तं भवति—प्रत्यय एव विज्ञानमस्य नामरूपस्य, न त्वस्यैव समुदितस्य नामरूपस्य प्रत्यय इति । सम्भवं प्रत्येवमुच्यते । तथा हि—उपपादुकानां विज्ञानप्रत्ययं षडायतनमेव भवति, न नामरूपम् । अनिष्पन्नषडायतनावस्था हि पञ्चस्कन्धाः 'नामरूपम्' इत्याख्या-यन्ते । सूत्रं च एतमेवार्थं द्योतयति—"विज्ञानं चेदानन्द, मातुः कुक्षिं नावक्रमेत्. अपि तु तन्नामरूपं कललत्वाय सम्मूर्छेत् ?. न भदन्त । विज्ञानं चेदानन्दावक्राम्य क्षिप्रमेवापक्रामेद्, अपि तु तन्नामरूपमित्थत्वाय प्रज्ञायेत ? नो भदन्त । विज्ञानं चेदानन्द, दहरस्य कुमारस्य कुमारिकाया वा उच्छि-द्येत, विनश्येत्. न भवेद्, अपि तु तन्नामरूपं वृद्धिं विपुलतामापद्येत ? नो भदन्त । तदनेनापि पर्यायेण वेदितव्यम् यद् विज्ञानस्य प्रत्ययं नामरूपम् नामरूपप्रत्ययं च विज्ञानम्" ( ) इति विस्तरः ।

किमत्र सर्वैरेतैः रूपादिभिर्विना तत्प्रतिषेध आगतिगतिप्रतिषेधः । तत्र पूर्वस्माल्लोकात् अन्तराभवसन्तत्या इहोपपत्तिः=आगतिः । अन्तरा-भवसन्तत्या पुनरस्माल्लोकात् परलोक उपपत्तिः=गतिः । आहोस्विदेकेनापि रूपादीनाम् अन्यतममेव । वयं ब्रूमः—सर्वैर्विना तत्प्रतिषेध इति । अविशेष-वचनान्न सम्प्रधार्यमिति चेत् । स्यादेषा बुद्धिः—अविशेषेणेदं सूत्रवचनम्—"यच्चायुष्मन् महाकौष्ठिल; आयुरिति विस्तरेण, यावत् रूपोपगं विज्ञानं तिष्ठति" इति । अनेन सूत्रवचनेन विशेषितं कामावचरं रूपावचरं वा आयुः सन्धायोक्तम्, यावत् सर्वैरेव तैर्विना रूपादिभिस्तत् प्रतिषेध इति ? अत्रोच्यते—अतिप्रसङ्गः; वाह्यस्यापि हि ऊष्मणः आयुषा विनाभावो न

---

१. सर्वं विज्ञानम्—का० । २. सर्वैरेव तै०—का० । ३. नानाश्रितत्वम्—का० ।

अविशेषवचनात् । चतुर्विज्ञानस्थितिवच्चाहारचतुष्कवचनाद् रूपारूप्यधात्वोरपि कवडीकाराहारप्रसङ्गः ।

"अतिक्रम्य देवान् कवडीकराहारभक्षान्" इति वचनात्, प्रीत्याहारवचनाच्चाप्रसङ्ग इति चेत् ?

आरूप्येष्वपि रूपस्याप्रसङ्गः । "रूपाणां निःसरणमारूप्याः", "ये ते शान्ता विमोक्षा अतिक्रम्य रूपाण्यारूप्याः", "अरूपिणः सन्ति सत्त्वाः", "सर्वशो रूपसंज्ञानां समतिक्रमात्" ( ) इति वचनात् । सति हि रूपे स्वं

रूपमवश्यं सञ्जानीरन्निति । औदारिकमधोभूमिकं रूपमभिसन्धायोक्तमिति चेत् ? कवडीकाराहारेऽपि तुल्यम् । ध्यानानामपि चाधोभूमिनिःसरणत्वादा-रूप्यत्वप्रसङ्गः[1] ।

वेदनादिनिःसरणं च किं नोक्तम्[2] ? अधोभूमिकवेदनानिःसरणात् । रूपजातिं तु कृत्स्नामतिक्रान्ताः, न वेदनादिजातिम् । अतो रूपाणां निःसरणमुक्तम्[3], न[4] वेदनादिनिःसरणम्[4] ।

स्वं रूपमवश्यं सञ्जानीरन्निति । 'सर्वशो रूपसंज्ञानां समतिक्रमत्वाद्' इति वचनं नोक्तं स्यात् । उक्तं तु, अतोऽपि न तत्र रूपमस्ति । औदारिकमिति विस्तरः । तत्रैतत् स्यात्—औदारिकमधोभूमिकं रूपमभिसन्धायोक्तम्—ये ते शान्ता विमोक्षा इति विस्तरेण । अत्र ब्रूमः—कवडीकाराहारेऽपि तुल्यम् । कथम् ? 'अतिक्रम्य देवान् कवडीकाराहारभक्षान्' इति औदारिक-मधोभूमिकं कवडीकाराहारमभिसन्धायोक्तम्, न रूपावचरं कवडीकाराहारं सूक्ष्ममिति । यदि च अधोभूम्यौदारिकरूपनिःसरणादारूप्या इत्युच्यन्ते, **ध्यानानामपि चाधोभूमिनिःसरणत्वादारूप्यत्वप्रसङ्गः** । कथम् ? कामाव-चरौदारिकरूपनिःसरणं प्रथमं ध्यानम् । एवमुत्तरोत्तरौदारिकरूपनिःसरणम्, यावत्, चतुर्थंध्यानमित्यारूप्यत्वप्रसङ्गः ।

वेदनादिनिःसरणं च किं नोक्तम् । यदि अधोभूमिकौदारिकनिःसर-णात् सत्यपि स्वभूमिकरूपे आरूप्या इत्युच्यन्ते, वेदनादिनिःसरणात् आरूप्या अवेदनाः—इति किं नोच्यन्ते सत्यामपि स्वभूमिवेदनायाम् । आदिशब्देन, यावद्, अविज्ञानाः—इति किं नोच्यन्ते सत्यपि स्वभूमिविज्ञाने इति । किं कारणम् ? **अधोभूमिकवेदनादिनिःसरणात्** । अधोभूम्यौदारिक-वेदनादिनिःसरणादित्यर्थः । **रूपजातिं तु कृत्स्नामतिक्रान्ता** । या काचिद् रूपजातिः औदारिकी वा सूक्ष्मा वा, आध्यात्मिकी वा वाह्या वा, तां सर्वमतिक्रान्ता आरूप्याः समापत्त्युपपत्तौ । **न वेदनादिजातिम्** । न वेदनां सर्वमतिक्रान्ता आरूप्याः समापत्त्युपपत्तौ; अदुःखासुखवेदनास्तित्वात् । आदि-शब्देन, यावद् विज्ञानं वक्तव्यम् । **अतो रूपाणां निःसरणमुक्तम्, न वेदनादिनिःसरणम्** । तस्मादेवंवादिनामस्माकं न भवत्ययं प्रसङ्गः—अधोभूमिकवेदनादिनिःसरणात् वेदनादिनिःसरणं च किं नोक्तमिति ।

---

१. ०दारूप्यप्र०—का० । २. नोक्ता—का० ।

३. ०मुक्ताः—का० । ४-४. का० प्रस्तके नास्ति ।

भवेन भवस्यानिःसरणवचनं तु तेनैव तस्यानिःसरणाद्, आस्रवानत्यन्तनिःसरणाच्च[1]। ध्यानेषु चोक्तं भगवता—"यत्तत्र भवति रूपगतं वा यावद्विज्ञानगतं वा" इति। आरूप्येषु तूक्तम्—"यत्तत्र भवति वेदनागतं वा यावद्विज्ञानगतं वा" ( ) इति। सत्यां तेषु रूपजातौ कस्माद्रूपगतं वेति नावक्ष्यत्। तस्मात्

नारूप्ये रूपसद्भावः,

कथमिदानीमनल्पकल्पोच्छिन्नाद् रूपात् पुनरपि रूपोत्पत्तिस्ततः प्रच्यतानाम् ?

रूपोत्पत्तिस्तु चित्ततः ॥ ३ ॥

रूपस्य चित्तादेवोत्पत्तिस्तद्विपाकहेतुपरिभाविताल्लब्धवृत्तितः। कथमनाश्रित्य रूपं चित्तं वर्तते ? कस्मान्न वर्तितव्यम् ? इहैवमदर्शनात्। कवडीकारान्तरेणाऽपि विना रूपधातौ न वर्तितव्यम्। किं कारणम् ? इहैवमदर्शनात्। उक्तं[2] यथा वर्तते ॥ ३ ॥

गतमेतत् ॥

इदं वक्तव्यम्—किमेषामाकाशानन्त्यायतनादीनामाकाशादय एवालम्बनं यत एवं समाख्यायते ? न हि। कथं तर्हि ? त्रयस्तावत्

आह—यदि रूपाणां निःसरणमारूप्याः, यत्तर्ह्युक्तं सूत्रे—"नाहं भवेन भवस्य निःसरणं वदामि" इति, तत् कथं रूपभवस्यारूप्यभवेन निःसरणम् ? **भवेन भवस्यानिःसरणवचनं तु तेनैव तस्यानिःसरणात्**। तेनैव भवेन तस्यैव भवस्यानिःसरणादेवमुक्तम्। **आस्रवानत्यन्तनिःसरणाच्च**। आस्रवनिःसरणम्। न हि रूपभवेन कामभवस्य निःसरणमिति। आरूप्यभवस्यापि तेन निःसरणं भवति। न चात्यन्तनिःसरणं कामभवात् तेन भवति; पुनरागमनात्। तथा आरूप्यभवेन रूपभवस्य निःसरणम्, न कामभवस्य। न चात्यन्तनिःसरणं रूपभवानामारूप्यभवेन।

उक्तं यथा वर्तत इति। "निकायं जीवितं चात्र निश्रिता चित्तसन्ततिः" (अभि० को० ३.३) इत्यादि ॥ ३ ॥

त्रय इति पुल्लिङ्गनिर्देशः। 'आरूप्याः' इत्यभिसम्बन्धनात्।

---

१. असर्वान०—का०। २. उक्तं च पूर्व—का०।

आकाशानन्त्यविज्ञानानन्त्याकिञ्चन्यसंज्ञकाः ।

तथाप्रयोगात्,

अनन्तमाकाशम्, अनन्तं विज्ञानम्, नास्ति किञ्चिदित्येव मनसिकुर्वाणास्तेषु प्रयुज्यन्ते यथासंख्यम् । अत एषामेताः संज्ञा इति ।

मान्द्यात्तु नसंज्ञानाप्यसंज्ञकः ॥ ४ ॥

मृदुत्वात्तु संज्ञाया नैवसंज्ञानासंज्ञायतनमुक्तम् । न हि सा पट्वी संज्ञा, न च पुननैंव संज्ञेति ।

"यद्यपि तत्राप्येवं प्रयुज्यन्ते संज्ञारोगः संज्ञागण्डः संज्ञाशल्यः असंज्ञकः[1] सम्मोहम् एतच्छान्तमेतत् प्रणीतं यदुत नैवसंज्ञानासंज्ञायतनम्" इति । कस्मात्तु तैस्तदेवं गृह्यत इत्यवश्यमिदं वक्तव्यं जायते । मृदुत्वात् संज्ञानामित्येतदेवोक्तम् ॥ ४ ॥

"**तथाप्रयोगात्**" इति । प्रयोगकाले आकाशादीन्यालम्बनानि भवन्ति । अन्यदा तु अन्येऽपि धर्मा यथासम्भवमालम्बनानीति दर्शयति ।

"**मान्द्यात्तु नसंज्ञा-नाप्यसंज्ञकः**" इति । चतुर्थ आरूप्यः कस्मान्न संज्ञीत्युच्यते, नाप्यसंज्ञ इति ? **मान्द्यात्** । तु-शब्देन तस्याकारोऽन्तर्नीतरूपो वेदितव्यः । येन हि कारणेन स चतुर्थ आरूप्यो **नैवसंज्ञानासंज्ञायतनमित्युच्यते,** तदेव 'कारणम्' इत्युच्यते । मान्द्यादिति । प्रयोगस्तु अस्यैवं सूचितो भवति; अन्वर्थसंज्ञाकरणात् ।

अत एवाह—**यद्यपि तत्राप्येवं प्रयुज्यत** इत्यादि । **संज्ञागन्धः** गन्धवत् गन्धः । एवं यावच्छल्यः । **असंज्ञकः सम्मोहमिति** । संज्ञाया अभावो हि सम्मोहकारणम् इत्यर्थः । शीयते इति संज्ञासमुच्छेदादित्यभिप्रायः । **एतच्छान्तमेतत् प्रणीतम्** । किं तत् ? इत्याह—**यदुत नैवसंज्ञानासंज्ञायतनमिति** । संज्ञामान्द्यमभिप्रीयते । अत्र प्रश्नयितव्यम्—**कस्मात् तु तैरेवं गृह्यत** इति । तैरिति तत्समापत्तिभिः, तदिति नैवसंज्ञानासंज्ञायतनम्, एवं गृह्यत इति नैवसंज्ञानासंज्ञायतनेति गृह्यत इत्यर्थः । तदेवं परिप्रश्ने निगृहीतस्यावश्यमिदं[2] वक्तव्यं जायते—**मृदुत्वात् संज्ञानां नैवसंज्ञानासंज्ञायतनमुच्यते इति । एतदेवोक्तम् ॥ ४ ॥**

१—१. आसंज्ञिकसम्मोहः—का० ।

२. विगृहीत०—जा० ।

इति मौलं समापत्तिद्रव्यमष्टविधम्,

इत्येतान्यष्टौ मौलानि समापत्तिद्रव्याणि यदुत चत्वारि ध्यानानि, चत्वार आरूप्या इति ।

तेषां पुनः

त्रिधा ।

सप्त,

भवाग्रादन्यानि सप्त त्रिविधानि ।

आस्वादनवच्छुद्धानास्रवाणि,

आस्वादनासम्प्रयुक्तानि शुद्धकान्यनास्रवाणि च ।

अष्टमं द्विधा ॥ ५ ॥

भवाग्रमास्वादनासम्प्रयुक्तं शुद्धकं च । अनास्रवं नास्ति ॥ ५ ॥

तत्र पुनः

आस्वादनासम्प्रयुक्तं सतृष्णम्,

तृष्णा ह्यास्वादना ।

लौकिकं शुभम् ।

शुद्धकम्,

लौकिकं कुशलं समापत्तिद्रव्यं शुद्धकमुच्यतेऽलोभादि शुद्धधर्मयोगात् ।

किं पुनस्तेनास्वादनासम्प्रयुक्तेनास्वाद्यते ?

तत् तदास्वाद्यम्,

तच्छुद्धकं समापत्तिद्रव्यं तेनास्वाद्यते समनन्तरातीतम् । यदास्वादयति तस्माद् व्युत्थितो येनास्वादयति तत्समापन्नः ।

समापत्तिद्रव्याणि मौलानीति । शास्त्रान्तेषां नोपन्यस्यन्त इत्यभिप्रायः ।

कथं सप्त त्रिविधानीति ? आह—"आस्वादनवत् शुद्धानास्रवाणि" इति ।

अनास्रवं नास्तीति । संज्ञामात्र्यात् ॥ ५ ॥

लोकोत्तरमनास्रवम् ॥ ६ ॥

यल्लोकोत्तरं समापत्तिद्रव्यं तदनास्रवम् । एषां च समापत्तिद्रव्याणां ध्यानान्येव भवन्ति, नारूप्याः ॥ ६ ॥

तत्र

पञ्चाद्ये,

प्रथमे भागे पञ्चाङ्गानि ।

तर्कचारौ च प्रीतिसौख्यसमाधयः ।

वितर्कः, विचारः, प्रीतिः, सुखम्, चित्तैकाग्रता च—इत्येतानि पञ्चाङ्गानि । समाधिः किलाङ्गं ध्यानं च । शेषाण्यङ्गानीति । यथा तु चतुरङ्गसेना[1], एवं पञ्चाङ्गध्यानम्[2] ।

प्रीत्यादयः प्रसादश्च द्वितीयेऽङ्गचतुष्टयम् ॥ ७ ॥

द्वितीये ध्याने चत्वार्यङ्गानि—अध्यात्मसम्प्रसादः, प्रीतिः, सुखम्, चित्तैकाग्रता च ॥ ७ ॥

तृतीये पञ्च तूपेक्षा स्मृतिः प्रज्ञा सुखं स्थितिः ।

तृतीये तु ध्याने पञ्चाङ्गानि—उपेक्षा, स्मृतिः, सम्प्रज्ञानम्, सुखम्,

---

यदास्वादयति तस्माद् व्युत्थित इति । शुद्धकात् । **येनास्वादयति तत्समापन्न** इति । आस्वादनासम्प्रयुक्तम् ॥ ६ ॥

यथा तु[3] चतुरङ्गसेना । नाङ्गेभ्योऽर्थान्तिरभूता । **एवं पञ्चाङ्गध्यानं** नार्थान्तिरमिति स्वमतं दर्शयति । **प्रीत्यादय** इति । पूर्वोक्ताः प्रीति-सुख-चित्तैकाग्रताः ।

अध्यात्मसम्प्रसादश्चेति । चतुरङ्गं द्वितीयम् ॥ ७ ॥

"तृतीये पञ्च तूपेक्षा" इति । संस्कारोपेक्षात्र गृह्यते । या प्रीतिरनाभोगलक्षणा । **स्मृतिः** उपेक्षानिमित्तस्यासम्प्रमोषः । स्मृत्यसम्प्रमोषे

---

१. चतुरङ्गा सेना—का० । २. पञ्चाङ्गं ध्यानम्—कां० ।

३. यथान्त—जा० ।

कस्मात् तृतीये ध्याने सुखं द्रव्यान्तरमुच्यते ? यस्मात्तद् वेदनासुखम् । ध्यानयोस्तु

प्रस्रब्धिसुखमाद्ययोः ।

प्रथमद्वितीययोस्तु ध्यानयोः प्रस्रब्धिसुखमित्युक्तम् ।

इह प्रस्रब्धिसुखं तत्र वेदनासुखमिति कुत एतत् ? द्वयोर्ध्यानिसमापत्त्योः सुखेन्द्रियायोगात् ! न हि तत्तयोः कायिकं युज्यते; समापन्नस्य विज्ञानकायाभावात् । नापि चैतसिकम्; प्रीतिवचनात् । प्रीतिर्हि सौमनस्यम् । न सुखसौमनस्ययौगपद्यमस्ति । न चापि तयोः पर्यायेण ध्याने वृत्तिर्युक्ता; पञ्चाङ्गवचनादिति ।

चतुर्थी—उक्तनिर्मुक्ता धर्माः । यान्यङ्गानि द्वितीये ध्याने, तृतीयेऽपि तानि । चतुष्कोटिकम् । प्रथमा कोटिः— अध्यात्मसम्प्रसाद-प्रीति-सुखानि । द्वितीया—उपेक्षा-स्मृति-सम्प्रज्ञानसुखानि । तृतीया —समाधिः । चतुर्थी उक्तनिर्मुक्ता धर्माः । यान्यङ्गानि द्वितीये ध्याने, चतुर्थेऽपि वा तानि । चतुष्कोटिकम् । प्रथमा कोटिः—अध्यात्मसम्प्रसादप्रीतिसुखानि । द्वितीया—तदङ्गानि, समाधिं हित्वा । तृतीया—समाधिः । चतुर्थी—उक्तनिर्मुक्ता धर्माः । यान्यङ्गानि तृतीये ध्याने, चतुर्थेऽपि तानि । चत्ष्कोटिकम् । प्रथमा कोटिः—समाधिवर्ज्यानि तदङ्गानि । द्वितीयापि—एवम् । तृतीया-समाधिः । चतुर्थी—उक्तनिर्मुक्ता धर्माः । एतच्च तदेकावचरं नाम ।

कस्मात् तृतीये ध्याने सुखं द्रव्यान्तरमुच्यते इति । कथमुच्यते—तान्येतानि अष्टादशध्यानाङ्गानि भवन्तीति विस्तरेणोक्त्वा पुनराह—नामत एवम् । "द्रव्यतो दश चैकं च" (अभि० को० ८·६) द्रव्यत एतान्येकादश भवन्ति । प्रथमध्यानिकानि पञ्च, द्वितीयेऽध्यात्मसम्प्रसादो वर्धते, तृतीये उपेक्षास्मृतिसम्प्रज्ञानसुखानीति वचनात् ।

सुखेन्द्रियायोगादिति ।। सुखेन्द्रियासम्भवात् । नास्त्येव चैतसिकं सुखेन्द्रियं त्रिष्वपि हि ध्यानेषु, किं तर्हि ? कायिकमेव सुखमङ्गव्यवस्थापितम्; समाहितावस्थान्तरालसमुदाचारात् । दार्ष्टान्तिकानां किलैष पक्षः । तेषां हि न द्विभूमिकमेव सुखेन्द्रियं कामप्रथमध्यानभूमिकमिति, किं तर्हि ? चतुर्भूमिकमपि सुखेन्द्रियं भवति । कामावचरम्, यावत्, तृतीयध्यान भूमिकमिति । अत एव च **विभाषायां** भदन्तेन **सौत्रान्तिकेनोक्तम्**—

'आभिधार्मिकाणाम् अरघट्टेनेव चक्षुर्विज्ञानादिकमधस्तादूर्ध्वं कृष्यते'

अपरे पुनराहुः—नास्त्येव चैतसिकं सुखेन्द्रियं त्रिष्वपि हि ध्यानेषु। किं[1] तर्हि[1] ? कायिकमेव सुखमङ्ग[2] व्यवस्थापितमिति।

यत्तर्हि सूत्र उक्तम्—"सुखेन्द्रियं कतमम् ? यत् सुखवेदनीयेन स्पर्शेन स्पृष्टस्योत्पद्यते कायिकं चैतसिकं सातं वेदितं वेदनागतम्—इदमुच्यते सुखेन्द्रियम्" इति ? केनापि अध्यारोपित एष पाठः। सर्वनिकायान्तरेषु कायिकमित्येव पाठात्। "सुखं च कायेन प्रतिसंवेदयते" इति स्वशब्देन वचनाच्च।

मनःकायेनेति[3] चेत्, एवमुक्त्वा को गुणः ? चतुर्थे ध्याने प्रस्रब्धिभूयस्त्वेऽपि सुखावचनाच्च। सुखवेदनानुकूला प्रस्रब्धिः सुखमिति चेत्, तृतीये प्रस्रब्धिसुखावचनं कस्मात् ! उपेक्षोपहतत्वादिति चेत् ? न;

इति। तदेवमस्येष्टं भवति—चक्षुर्विज्ञानादिकद्वितीयादिध्यानभूमिकमपि भवतीति।

अध्यारोपित एष पाठ इति। योऽयं चैतसिक इति पाठः। **सुखं च कायेन प्रतिसंवेदयत इति स्व-शब्देन वचनाच्चेति**। तृतीयध्याननिर्देशे ऽवमुक्तम्—'स प्रीतेर्विरागाद् उपेक्षको विहरति स्मृतिमान् सम्प्रजानमानः, सुखं च कायेन प्रतिसंवेदयते। यत्तदार्या आचक्षते—उपेक्षकः स्मृतिमान् सुखविहारी तृतीयं ध्यानमुपसम्पद्य विहरति' इति। यदि हि तच्चैतसिकं स्यात्, कथं तत् कायेन प्रतिसंवेदयते। **मनःकायेनेति**। मनःसमुदायेनैवमुक्त्वा। **को गुण** इति। सुखं च मनसा प्रतिसंवेदयति. सुखं च कायेन प्रतिसंवेदयते—इत्येवं वा वक्तव्यं स्यादित्यभिप्रायः। **चतुर्थे ध्याने प्रश्रब्धिभूयस्त्वेऽपि सुखावचनाच्चेति**। चतुर्थे ध्याने प्रश्रब्धिसुखं भूयो भवति, बहुतरं भवति। ध्यानान्तरेभ्यश्च चतुर्थस्य प्रश्रब्धतरत्वात्। तद्भूयस्त्वेऽपि सुखस्यावचनम्। चतुर्थे ध्याने सुखं नोच्यते; तस्य सुखस्यावचनात्। वेदनासुखमेव तत् तृतीये ध्याने गम्यते, न चतुर्थे सुखा वेदनास्तीति तत्र नोच्यत इत्यभिप्रायः। **सुखवेदनानुकूला प्रश्रब्धिः सुखमिति चेत्**। स्यान्मतम्—प्रथमद्वितीययोर्ध्यानयोः सुखवेदनानुकूला प्रश्रब्धिः, तद्द्वयोः सुखमित्युक्त्वा, चतुर्थे ध्याने प्रश्रब्धिः सुखवेदनानुकूला न भवतीति नोक्ता। यद्येवं **तृतीये प्रश्रब्धिसुखावचनं कस्मात्**। तृतीयध्यानप्रश्रब्धिरपि सुखवेदनानुकूला भवति। तत्र प्रश्रब्धिसुखं कस्मान्नोक्तम्। वेदनासुखमेव

उपेक्षयैव तद्वृद्धेः[1]। पूर्विकाभ्यां तद्विशेषात्। "यस्मिन् समये आर्यश्रावकः प्रविवेकजां प्रीतिं कायेन साक्षात्कृत्योपसम्पद्य विहरति" ( ) इत्यत्र सूत्रे प्रस्रब्धिसुखयोः पृथग्वचनान्न प्रस्रब्धिरेव सुखम्।

समापन्नस्य कथं कायविज्ञानमिति चेत्? समाधिविशेषजेन प्रस्रब्धिनाम्ना[2] सुखवेदनीयेन वायुना कायस्फरणात्। वहिर्विक्षेपात् समाधिभ्रंश इति चेत्? न; समाधिजस्यान्तःकायसम्भूतस्य कायसुखस्य समाध्यनुकूलत्वात्। कायविज्ञानकाले व्युत्थितः स्यादिति चेत्? न; अतएव।

हि तत्र भवद्भिर्व्यवस्थापितम्। न प्रश्रब्धिसुखम्; द्विसुखापाठात्। **उपेक्षोपहतत्वादिति चेत्।** स्यान्मतम्—तृतीये ध्याने उपेक्षा कर्मण्यतालक्षणा भवति, तयोपहता प्रश्रब्धिरिति नोच्यते इति? न; **उपेक्षयैव तद्वृद्धेः।** नैतदेवम्; उपक्षयैव तु तत्र तृतीये ध्याने प्रश्रब्धिसुखवृद्धेः। न ह्यपघातहेतुनैव वृद्धिर्युज्यत इति। कथमुपेक्षयैव तद्वृद्धिः? अतो ब्रवीति—**पूर्विकाभ्यां तद्विशेषादिति।** पूर्विकाभ्यामिति प्रथमद्वितीयध्यानप्रश्रब्धिभ्याम्। तृतीयध्यानप्रश्रब्धिर्विशिष्टा; पूर्वकाभ्यां[3] ध्यानाभ्यां तृतीयस्य विशिष्टत्वात्। **यस्मिन् समये** इति विस्तरः। **यस्मिन् समये आर्यश्रावकः प्रविवेकजां प्रीतिं कायेन साक्षात्कृत्वोपसम्पद्य विहरति, पञ्चास्य धर्मा तस्मिन् समये प्रहीयन्ते। पञ्च धर्मा भावनापरिपूरिं गच्छन्ति—अध्यात्मसम्प्रसादः, प्रीतिः, प्रश्रब्धिः, सुखम्, समाधिश्चेति।** प्रश्रब्धिसुखयोरनन्यत्वे कथमेषां पञ्चत्वं स्यात्! अर्थान्तरत्वे च सति कायिकमेव सुखं त्रिष्वपि ध्यानेषु इति सिद्धं भवति।

समापन्नस्य कथं कायविज्ञानमिति? अत्रोच्यते—**समाधिविशेषजेन प्रश्रब्धिनाम्ना सुखवेदनीयेन** सुखवेदनानुकूलेन **वायुना कायस्फरणात्** कायव्यापनात्। किम्? कायविज्ञानं भवत्येवेति। **वहिर्विक्षेपात् समाधिभ्रंश इति चेत्।** यदि मन्येत—कायविज्ञानोत्पत्त्या वहिर्विक्षेपात् वाह्यविषयविक्षेपात् समाधिभ्रंश इति? न; **समाधिजस्येति।** नैतदेवं भविष्यति। कस्मात्? **समाधिजस्यान्तःकायसम्भूतस्य** अवहिर्जभूतस्येत्यर्थः। कायसुखस्य कायविज्ञानसम्प्रयुक्तस्य वेदितसुखस्य **समाध्यनुकूलत्वान्नास्मात् समाधिभ्रंश** इत्यर्थः। **न; अतएवेति।** न **कायविज्ञानकाले व्युत्थितः स्यात्।** अत एव। कारणात्। समाध्यनुकूलत्वादित्यर्थः। तत्सम्मुखी-

---

१. तद्वृद्धिः—का०। २- संज्ञकेन—का०।

३. पूर्विकाभ्यां—जा०।

कामावचरेण कायविज्ञानेन[1] रूपावचरस्प्रष्टव्यविज्ञानानुत्पत्तिरिति चेत् ? न; प्रश्नव्धिविज्ञानस्योत्पत्तेः ।

अनास्रवे अपि स्प्रष्टव्यकायविज्ञाने स्याताम् । मा भूत् किञ्चिदङ्गं सास्रवं किञ्चिदनास्रवमिति चेत् ? कायिकप्रश्नव्धिसम्बोध्यङ्गवचनात्[2] । इष्टे बोध्यङ्गानुकूलत्वादिति चेत् ? अनास्रवत्वमप्येवम् ।

"सास्रवा धर्माः कतमे ? चक्षुर्यावदेव स्प्रष्टव्यम्" इत्यस्य सूत्रस्य विरोधादिति चेत् ? न; अन्यस्प्रष्टव्यकायविज्ञानाभिसन्धिवचनात् । न

भावान्तरं हि पुनरुपतिष्ठते समाधिः—इत्यभिप्रायः । कामावचरेण कायविज्ञानेन रूपावचरस्य स्प्रष्टव्यस्याग्रहणात् रूपावचरमेतत् कायविज्ञानम्, न कामावचरम् । अत एव तत्सम्प्रयोगि सुखं ध्यानाङ्गं न सिद्ध्यति । प्रश्नव्धिज्ञानस्योत्पत्तेरिति । रूपावचरस्य कामावचरेण कायविज्ञानेन कायेन्द्रियेण समाधिबलाधानात् । तद्धि कायेन्द्रियं समाहितस्य तामवस्थां गतम् यदूर्ध्वभूमिकस्य कायविज्ञानस्याश्रयो भवतीति ।

अनास्रवे अपीति । स्प्रष्टव्यं च प्रश्नव्धिलक्षणं तदालम्बनं च कायविज्ञानं स्प्रष्टव्यकायविज्ञाने अनास्रवे अपि स्याताम् । किं कारणम् ? इत्याह—मा भूत् किञ्चिदङ्गं सास्रवं किञ्चिदनास्रवमिति चेत् । यद्येवं मन्येत । कायिकप्रश्नव्धिसम्बोध्यङ्गवचनादिष्टेः । "यापि कायप्रश्नव्धिः तदपि प्रश्नव्धिसम्बोध्यङ्गमभिज्ञायै सम्बोधये निर्वाणाय संवर्तते । यापि चित्तप्रश्नव्धिः, यावदेव स्प्रष्टव्यानि सम्बोध्यङ्गमभिज्ञायै सम्बोधये निर्वाणाय संवर्तते"—इति वचनात् । बोध्यङ्गवचनादिष्टे स्प्रष्टव्यकायविज्ञाने अनास्रवे इति । बोध्यङ्गानुकूलत्वादिति चेत् । अथैवं परिह्रियेत—यस्मात् कायिकी प्रश्नव्धिर्बोध्यङ्गानुकूला, तस्माद् बोध्यङ्गमित्युपचर्यते, न तु बोध्यङ्गमिति । अनास्रवत्वमप्येवम् । अनास्रवत्वानुकूलत्वात् ते स्प्रष्टव्य-कायविज्ञाने अनास्रवे इत्युपचर्येते । न त्वनास्रवे एवेति । एवमनयोरनास्रवत्वम् ।

सास्रवा धर्मा इति विस्तरः । "सास्रवा धर्माः कतमे ? यावदेव चक्षुः, यावन्त्येव रूपाणि, यावदेव चक्षुर्विज्ञानम्, यावत् यावानेव कायः, यावन्त्येव स्प्रष्टव्यानि, यावदेव कायविज्ञानम्" ( ) इति । अस्य सूत्रस्य विरोध इति एवं चेन् मन्येत । तन्न; अन्यस्प्रष्टव्यकायविज्ञानाभि-

---

१. कायेन्द्रियेण—का० ।

२. ०बोध्यङ्ग०—का० ।

चानास्रवे किञ्चिदङ्गं सास्रवं किञ्चिदनास्रवं स्यादिति चेत् ? अयौगपद्यात् को दोषः ? सुखप्रीत्यसमवधानान्न पञ्चाङ्गं स्यादिति चेत्, न; सम्भवं प्रत्युपदेशाद् वितर्कविचारवत् । साध्यमिति चेत् ? सिद्धम्; वितर्कविचारयो-विरोधात्,[1] दोषावचनाच्च ।

तस्माद्यान्येव प्रथमध्याने पञ्चाङ्गानि, तेषां द्वित्रिचतुरङ्गापकर्षेण द्वितीयादिध्यानव्यवस्थानम् । अत एव च प्रथमे ध्याने पञ्चानामङ्गत्वमुक्तम्; तदपकर्षेणोत्तरध्यानव्यवस्थापनात् । न तु संज्ञादीनामङ्गत्वमुक्तम् ।

सन्धिवचनात् । तत् प्रश्रब्धिव्यतिरिक्तानां कायविज्ञानव्यतिरिक्तानां च कायविज्ञानामभिसन्धिवचनात् । **न चानास्रव** इति विस्तरः । नन्वनास्रवेऽनास्रवव्यवस्थाने **किञ्चिदङ्गं सास्रवं किञ्चिदनास्रवं स्यादिति** । यद्येष दोष इति मन्येत, तत्स्प्रष्टव्यकायविज्ञानस्य सास्रवत्वात्, तदितरस्यानास्रवत्वात् । अत्रोच्यते—**अयौगपद्यात् को दोष** इति । यदा सास्रवमङ्गं समुदाचरति, न तदानास्रवं समुदाचरति; यदानास्रवमङ्गम्, न तदा सास्रवमित्यदोषः । **सुखप्रीत्यसमवधानात्** । सुखस्य कायिकस्य प्रीतेश्च मानस्याः असमवधानात् अयौगपद्यात् । **न पञ्चाङ्गं** प्रथमं ध्यानं **चेत्** । यदप्येवं मन्येत, **न** स दोषः । कस्मात् ? **सम्भवं प्रत्युपदेशात् वितर्कविचारवत्** । यथा सवितर्कं सविचारं प्रथमं ध्यानमिति पर्यायेण वितर्कविचारौ भवतः, एवं सुखप्रीती अपि सम्भवं प्रति उपदेशात् अदोष एष इति । **साध्यमिति चेत्** । वितर्कविचारौ पर्यायेण भवतः इति साध्यमिति । आह—**सिद्धम्** । कथम् ? इत्याह—**वितर्कविचारयोर्विरोधादिति** । यद्यौदारिकता चित्तस्य, सूक्ष्मता नास्ति; यदि सूक्ष्मता, औदारिकता नास्तीति विरोधात् वितर्कविचारयोरयौगपद्यम् । **दोषावचनाच्चेति** । आपेक्षिकी च औदारिकसूक्ष्मता, भूमिप्रकारभेदादिति आभवाग्राद् वितर्कविचारौ स्यातामित्यादि । केषाञ्चित् पाठो भवति—**दोषवचनाच्चेति** । असमवधानेन च न कश्चिद् दोष उच्यत इत्यर्थः ।

द्वि-त्रि-चतुरङ्गापकर्षेणेति । द्व्यङ्गापकर्षेण द्वितीयध्यानव्यवस्थानम् । तत्र वितर्कविचारयोरभावात् । त्र्यङ्गापकर्षेण तृतीयध्यानव्यवस्थानम् । तत्र प्रीतिरपि नास्तीति । चतुरङ्गापकर्षेण चतुर्थध्यानव्यवस्थानम् । तत्र सुखमपि नास्तीति । **न तु संज्ञादीनामङ्गत्वमुक्तमिति** । न हि संज्ञादीनां ध्यानान्तरेऽपकर्षोऽस्तीति ।

---

१. चित्तस्यौदारिकसूक्ष्मतयो०—का० ।

किमर्थं[1] पञ्चानामेवाङ्गत्वमुक्तम् । उपकारत्वादिति[2] चेत् ? न; वितर्कविचाराभ्यां स्मृतिप्रज्ञयोरुपकारकतरत्वात् । अस्त्येष एकेषां वादः । नैव तु पूर्वाचार्या एवं निदिशन्ति स्म यावन्तः प्रज्ञान्तम् ।

तस्माद्विचार्यमेतत्—अध्यात्मसम्प्रसादो नाम क एष धर्मः ? वितर्क-विचारक्षोभविरहात् प्रशान्तवाहिता सन्ततेरध्यात्मसम्प्रसादः । सोर्मिकेव हि नदी वितर्कविचारक्षोभिता सन्ततिरप्रसन्ना वर्तते इति । न तर्हि स द्रव्यान्तर-मिति कथं द्रव्यत एकादशाङ्गानि भवन्ति ?

किमर्थं पञ्चानामेवाङ्गत्वमिति । यद्ययमर्थो नाभिप्रेत इति । यद्युपकारत्वात् पञ्चानामेवाङ्गत्वम्, तन्न; वितर्कविचाराभ्यां स्मृतिप्रज्ञयोरुपकारत्वात् । न हि तथा वितर्कविचारावुपकारौ यथा स्मृतिप्रज्ञे इष्टे । सूपस्थितस्मृतेर्यथाभूतं प्रजानतो लयौद्धत्याद्यभावतः ।

तस्माद् विचार्यमेतदिति । योगाचारभूमिदर्शनेन विचार्यमेतदिति । तत्र कौतूहलं पातयत्याचार्यः । अयं चात्रार्थसंक्षेपो द्रष्टव्यः । किं पुनरधि-कृत्य वितर्कादय एवाङ्गत्वेन व्यवस्थापिताः षट्स्वन्येषु धर्मेषु ? तावद्भिः प्रतिपक्षानुशंसतदुभयाङ्गपरिसमाप्तेः । आरूप्येष्वङ्गव्यवस्थानं नास्ति; शमथैकरसतामुपादाय । तदुक्तम्—प्रतिपक्षाङ्गमुपादाय, अनुशंसाङ्गमुपादाय, तदुभयसन्निश्रयाङ्गं चोपादाय । प्रथमे तावद् ध्याने वितर्को विचारश्च प्रतिपक्षाङ्गम्; ताभ्यां कामव्यापादविहिंसावितर्कप्रहाणात् । प्रीतिः सुखं चानुशंसाङ्गम्; वितर्कविचाराभ्यां प्रतिपक्षिते विपक्षे तद्विवेकजप्रीतिसुख-लाभात् । चित्तैकाग्रता तदुभयसन्निश्रयाङ्गम्; सन्निश्रयबलेन वितर्कादि-प्रवृत्तेरिति । तथा द्वितीये ध्यानेऽध्यात्मसम्प्रसादः प्रतिपक्षाङ्गम्; तेन वितर्कविचारप्रतिपक्षणात् । प्रीति-सुखे चित्तैकाग्रता च शेषे अङ्गे पूर्ववत् । तृतीये ध्याने उपेक्षास्मृतिसम्प्रजन्यं च प्रतिपक्षाङ्गः; तैः प्रीतिप्रतिपक्षणात् । सुखं चित्तैकाग्रता च शेषे अङ्गे यथाक्रमं पूर्ववत् । चतुर्थे ध्याने उपेक्षा-परिशुद्धिः स्मृतिपरिशुद्धिश्च प्रतिपक्षाङ्गम् । ताभ्यां ध्यानेषु सुखप्रति-पक्षणात् : अदुःखासुखा वेदना अनुशंसाङ्गम्, चित्तैकाग्रता तदुभयसन्नि-श्रयाङ्गमिति ।

तस्मात् तर्हि

श्रद्धाप्रसादः

तस्य हि द्वितीयध्यानलाभात् समाहितभूमिनिःसरणे सम्प्रत्यय उत्पद्यते। सोऽत्राध्यात्मसम्प्रसाद इति। नैव हि वितर्कविचारसमाधयो नाप्यध्यात्मसम्प्रसादो द्रव्यान्तराणीत्यपरे।

कथमसति द्रव्यान्तरत्वे चैतसिकत्वं सिध्यति? अवस्थाविशेषोऽपि[1] हि नाम चेतसश्चैतसिको भवति। न त्वेष शास्त्रसिद्धान्तः। यदुक्तम्—"प्रीतिर्हि सौमनस्यम्" इति।

कथमिदं गम्यते? किमन्यत् भवतु? यथेच्छन्ति निकायान्तरीयाः—धर्मान्तरमेव चैतसिकं प्रीतिः, सौमनस्यं तु त्रिष्वपि ध्यानेषु सुखमिति? न वै सुखं ध्यानेषु सौमनस्यं युज्यते।

प्रीतिस्तु सौमनस्यं द्विधागमात् ॥ ९ ॥

उक्तं हि भगवता अविपरीतकसूत्रे तृतीयं ध्यानमुक्त्वा "अत्रास्योत्पन्नं सौमनस्येन्द्रियमपरिशेषं निरुध्यते" इति। "चतुर्थे च ध्याने सुखेन्द्रियं निरुध्यते" इत्युक्तम्। पुनश्चोक्तम्—"सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्वमेव च सौमनस्यदौर्मनस्ययोरस्तङ्गमात्" इति। अतोऽपि न तृतीये

"श्रद्धाप्रसादः" इति। श्रद्धैव प्रसादः श्रद्धाप्रसादः।

कथमसति द्रव्यान्तरत्वे चैतसिकत्वमिति। वितर्कादीनाम्। अवस्थाविशेषोऽपि हि नाम चेतसश्चैतसिको भवति। चेतसि भवत्वात्। पर्येषकमनोजल्पावस्था=वितर्कः। प्रत्यवेक्षकमनोजल्पावस्था=विचारः। वाक्समुत्थापिकावस्था चित्तस्य वितर्कः, तदन्यावस्था विचार इति भगवद्विशेषः। अविक्षिप्तावस्था समाधिः। प्रशान्तवाहितावस्था चित्तस्याध्यात्मसम्प्रसादः।

न वै सुखं ध्यानेषु सौमनस्यं युज्यते इति। तुल्यसुखवेदनास्वाभाव्ये मानसत्वेऽपि सति। कस्मात् सौमनस्यं सुखमिति नोच्यते? अस्ति कारणम्। इयं हि प्रीतिरनुपशान्ता, तया हि तत् समाहितमपि चित्तं क्षिप्यत इव उन्नम्यत इव सामोदं सहासं विप्लुतमिव व्यवस्थाप्यते। तद्

---

१. ०विशेषो-का०।

ध्याने सौमनस्येन्द्रियमस्ति । तस्मात् प्रीतिरेव सौमनस्यं न सुखम् ॥ ९ ॥

किं पुनः क्लिष्टेष्वपि ध्यानेषु यथाविहितान्यङ्गानि भवन्ति ? न हि । किं तेषु न विद्यते ?

क्लिष्टेष्वसत्प्रीतिसुखं प्रसादः सम्प्रधीः स्मृतिः ।
उपेक्षास्मृतिशुद्धिश्च,

प्रथमे ध्याने विवेकजं प्रीतिसुखं नास्ति; क्लेशाविवित्तत्वात् । द्वितीये ध्यानेऽध्यात्मसम्प्रसादो नास्ति, क्लेशाविलत्वात् । तृतीये स्मृतिसम्प्रजन्यं नास्ति; क्लिष्टसुखसम्भ्रमितत्वात् । चतुर्थे उपेक्षास्मृतिपरिशुद्धिर्नास्ति; क्लेशमलिनत्वात् । एवं तावत् **केचिदाहुः** ।

केचित् प्रस्रब्ध्युपेक्षणे ॥ १० ॥

केचित् पुनः—प्रथमद्वितीययोः क्लिष्टयोः प्रस्रब्धिर्नास्ति । तृतीय-चतुर्थयोरुपेक्षा नास्ति; कुशलमहाभूमिकत्वादनयोरिति । त्रीणि च ध्यानानि

यदोपशान्तं भवति, तदा भूम्यन्तरप्राप्ता तज्जातीयैव वेदना सुख-मित्युच्यते ॥ ९ ॥

क्लेशाविवित्तत्वादिति । तद्भूमिकैः क्लेशैरविवित्तत्वादित्यर्थः । **क्लेशाविलत्वादिति** । क्लेशैरप्रसन्नत्वादित्यर्थः । **क्लिष्टसुखसम्भ्रमितत्वा-दिति** । क्लिष्टेन सुखेन सम्भ्रमितत्वात् स्मृतिः सम्प्रजन्यं च भवतः । **क्लेशमलिनत्वादिति** । तद्भूमिकैः क्लेशैर्मलिनत्वात् । **उपेक्षायाः स्मृतेश्च परिशुद्धिर्नास्ति** ।

कुशलमहाभूमिकत्वादनयोरिति । प्रश्रब्ध्युपेक्षे कुशलमहाभूमिके पठिते ।

श्रद्धाऽप्रमादः प्रश्रब्धिरुपेक्षा ह्रीरपत्रपा ।
मूलद्वयमहिंसा च वीर्यं च कुशले सदा ॥ (अभि० २.२५)

इति वचनात् ।

किं पुनरेते पूर्वस्मिन् पक्षे क्लिष्टेष्वपि ध्यानेषु भवतः ? न च भवत इत्याह । कस्मादेतन्नोक्तम् ? अनुक्तसिद्धत्वात् ।

सेञ्जितानि उक्तानि भगवता; सापक्षालत्वात् ॥ १० ॥

अष्टापक्षालमुक्तत्वादानिञ्जं तु चतुर्थकम् ।

के पुनस्तेऽपक्षालाः ?

वितर्कचारौ श्वासौ च सुखादि च चतुष्टयम् ॥ ११ ॥

वितर्कविचारौ सुखदुःखे सौमनस्यदौर्मनस्ये श्वासप्रश्वासाश्च—एषामष्टानामेकोऽप्यपक्षालश्चतुर्थे नास्ति, अतस्तदानेञ्ज्यमुक्तम् ।

वितर्कविचारप्रीतिसुखैरकम्पनीयत्वादानेञ्ज्यं चतुर्थं ध्यानम्; सूत्रे निवातप्रदीपनिदर्शनादित्यपरे[1] ॥ ११ ॥

द्वयोर्ध्यानयोः सौमनस्यमुक्तम्; प्रीतिवचनात् । तृतीये सुखम्, चतुर्थे उपेक्षा । तत् किं या ध्यानसमापत्तिषु वेदनास्ता एव ध्यानोपपत्तिषु ? नेत्याह । किं तर्हि ?

सौमनस्यसुखोपेक्षा उपेक्षासुमनस्कते ।
सुखोपेक्षे उपेक्षा प्रविदो ध्यानोपपत्तिषु ॥ १२ ॥

प्रथमध्यानोत्पत्तौ तिस्रो वेदनाः—सुखं त्रिविज्ञानकायिकम्, सौमनस्यं मनोभूमिकम्, उपेक्षा चतुर्विज्ञानकायिकी । द्वितीयध्यानोपपत्तौ द्वे वेदने—सौमनस्योपेक्षे मनोभूमिके । सुखं नास्ति; अस्य विज्ञानकायाभावात् । तृतीयध्यानोपपत्तौ द्वे वेदने—सुखोपेक्षे मनोभूमिके । चतुर्थध्यानोपपत्तावुपेक्षैव ॥ १२ ॥

कुशलमहाभूमिकयोः प्रश्रब्ध्युपेक्षयोरपरिग्रहाद् भवत एव ते इत्यपरे ॥ १० ॥

"श्वासौ" इति । आश्वासप्रश्वासौ । द्वित्वप्रदर्शनार्थं चात्र द्विवचननिर्देशः । **वितर्कविचारप्रीतिसुखैरकम्पनीयत्वादिति** । यथा पूर्वकानि त्रीणि ध्यानानि वितर्कादिभिः कम्प्यन्ते[2]; प्रथमं ध्यानं वितर्कविचाराभ्यां कम्प्यते, द्वितीयं प्रीत्या, तृतीयं सुखेन; नैवमेभिश्चतुर्थं कम्प्यते ।

यथा निवाते दीपो न कम्प्यते वायुना तद्वदित्युक्तं सूत्रे इत्यपर आहुः । अष्टापक्षालमुक्तत्वात् ॥ ११ ॥

---

१. निर्वात—का० । २. कम्प्यते—जा० ।

यदि द्वितीयादिषु ध्यानेषु त्रयो विज्ञानकाया न संविद्यन्ते वितर्क-विचारौ च, कथं ते पश्यन्ति ? यावत् स्पृशन्ति । कथं चाविज्ञप्तिं समुत्थापयन्ति ? न वै तेषूपपन्नानां चक्षुर्विज्ञानादयो न सन्ति । न तु स्वभूमिकाः । किं तर्हि ?

कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकं च यत् ।
द्वितीयादौ तदाद्याप्तम्,

प्रथमध्यानभूमिकं चक्षुःश्रोत्रकायविज्ञानं विज्ञप्तिसमुत्थापकं च द्वितीयादिषु च ध्यानेषु सम्मुखीकुर्वन्ति । निर्माणचित्तवद् येन ते पश्यन्ति यावद्विज्ञप्तिं समुत्थापयन्ति ।

अक्लिष्टाव्याकृतं च तत् ॥ १३ ॥

अनिवृताव्याकृतं च तत् प्रथमध्यानभूमिकं विज्ञानं वेदितव्यं यत्ते सम्मुखीकुर्वन्ति । न क्लिष्टं वीतरागत्वात्, न कुशलं हीनत्वादिति ॥ १३ ॥

अवसितं ध्यानकार्यम् ॥

अथ शुद्धकादीनां ध्यानारूप्याणां कथं लाभः ?

अतद्वान् लभते शुद्धं वैराग्येणोपपत्तितः ।

असमन्वागतस्तेन शुद्धकं ध्यानमारूप्यं वा प्रतिलभते; अधोभूमि-

"आद्याप्तम्" इति । आद्यध्यानसंगृहीतम् ।

निर्माणचित्तवदिति । यथावरभूमिकं निर्माणचित्तं तद्भूमिकं निर्माणं निर्मातुकामा निर्मातारः सम्मुखीकुर्वन्ति, तद्वत् ।

न कुशलं हीनत्वादिति । तद्धि प्रथमध्यानभूमिकं कुशलं द्वितीय-ध्यानभूमिकान् निहीनं निकृष्टम्, अतो न सम्मुखीकुर्वन्ति । प्रयोजनेन हि ते प्रथमध्यानभूमिकं सम्मुखीकुर्वन्ति, न बहुमानेन । सविपाकं तत् कुशलम् । न च तद्विपाकेन तेऽर्थिन इति कुशलचित्तसम्मुखीकरणे यत्नं न कुर्वन्ति ॥ १२-१३ ॥

"वैराग्येणोपपत्तितः" इति । वैराग्येणोपपत्तितो वेति वाशब्दो लुप्त-निर्देशः । अधोभूमिवैराग्याद् वा । असमन्वागतस्तेन शुद्धकं वा प्रतिलभते

वैराग्याद्वा । अधोभूम्युपपत्तितो वा; अन्यत्र भवाग्रात् । न हि तस्योपपत्तितो लाभः ।

अतद्वानिति किमर्थं समन्वागतः ? शुद्धकेन प्रयोगतो[1] निर्वेधभागीयं शुद्धकं प्रतिलभते । परिहाणितोऽपि[2] हानभागीयम् ।

अत एवोच्यते—"स्याच्छुद्धकं ध्यानं वैराग्येण प्रतिलभेत, वैराग्येण विजह्यात् । एवं परिहाण्या चोपपत्त्या च ।

आह[3]—स्याद्धानभागीयं प्रथमं ध्यानम् । तद्धि कामवैराग्येण लभ्यते । ब्रह्मलोकवैराग्येण त्यज्यते । ब्रह्मलोकवैराग्यपरिहाण्या लभते[4] । काम-धातुवैराग्यप्रहाण्या[5] त्यज्यते । उपरिष्टाद् ब्रह्मलोक उपपद्यमानो[6] लभते ।

ध्यानम्, आरूप्य वा । कामवैराग्यात् प्रथमं शुद्धकं प्रतिलभते त्रिप्रकारम्, अन्यत्र निर्वेधभागीयात् । एवं यावत् आकिञ्चन्यायतनवैराग्याद् भवाग्रं प्रतिलभते । अधोभूम्युपपत्तितो वेति । उपरिष्टात् अधरायां भूमौ उपपद्यमानस्तल्लभते । अन्यत्र भवाग्रादिति । तस्याधोभूमिवैराग्यादेव लाभः ।

प्रयोगतो निर्वेधभागीयमिति । तस्य वैराग्योपपत्तिकृतः स लाभो न भवति । परिहाणितोऽपि हानभागीयमिति । स्थितिभागीयात् परिहीय-माणो हानभागीयं लभते ।

अत एवोच्यत इति । यस्मात् परिहीणोऽपि हानभागीयं लभते । एवं परिहाण्या चोपपत्त्यापि योज्यम् । कथम् ? स्याच्छुद्धकं परिहाण्या लभेत, परिहाण्या विजह्यात् । स्याच्छुद्धकं ध्यानमुपपत्त्या लभेत, उपपत्त्या विजह्यादिति । आह—स्यात् । कथम् ? इत्याह—हानभागीयं प्रथमं ध्यान-मिति । ब्रह्मलोकः प्रथमं ध्यानं त्रिभूमिकम्; 'विशेषेण ब्रह्मलोके उपपद्य-मानत्वाद्' इति वचनात् । ब्रह्मलोकवैराग्येण त्यज्यत इति । यस्मात् प्रथमध्यानवैराग्येण हानभागीयं ध्यानं क्लेशानुगुण्यात् तद्भूमिकक्लेशमिव त्यजति, अतो ब्रह्मलोकवैराग्येण त्यज्यते—इत्युच्यते । एवं प्रथमस्य प्रश्नस्य विवर्जनम् ।

ब्रह्मलोकवैराग्यपरिहाण्या लभते । यदि ब्रह्मलोकवैराग्यपरिहाण्या परिहीयते, पुनस्तद्धानभागीयं प्रतिलभते; तद्भूमिकक्लेशवत् । कामधातु-

---

१ प्रयोगतोऽपि—का० । २ परिहाणितो वा—का० ।
३. का० पुस्तके नास्ति । ४. लभ्यते—का० ।
५. कामवैराग्य०—का० । ६. उत्पद्य०—का० ।

तस्मात्[1] कामधातावुपपद्यमानो विजहाति" इति ।

अनास्रवं तु वैराग्यात्,

'अतद्वान् लभते' इति वर्तते । तद्वांस्तु क्षयज्ञानतोऽप्यशैक्षं लभते । इन्द्रियसञ्चारतोऽपि शैक्षाशैक्षम् । ननु च नियमावक्रान्तितोऽप्यनास्रवं प्रथमतो लभते ? नावश्यम्; आनुपूर्विकेणालाभात् । यथा त्ववश्यं लभते तथोक्तम ।

क्लिष्टं हान्युपपत्तितः ॥ १४ ॥

'अतद्वान् लभते' इत्येवानुवर्तते । परिहाणितो यदि तद्वैराग्यात् परिहीयते । उपपत्तितो यद्युपरिभूमेरवरायामुपपद्यते ॥ १४ ॥

कतमस्मात् समापत्तिद्रव्यादनन्तरं कत्युपपद्यन्ते ? अनास्रवप्रथमध्यानान्तरं षडुत्पद्यन्ते—स्वभूमिके शुद्धानास्रवे[2] द्वितीयतृतीयध्यानभूमिके च । आकिञ्चन्यायतनानन्तरं सप्त—स्वभूमिके शुद्धकानास्रवे, विज्ञानाकाशानन्त्यायतनभूमिके च । भवाग्रं शुद्धकमेव; अनास्रवाभावात् । द्वितीयध्यानान्तर-

---

वैराग्यपरिहाण्या त्यज्यते । यदा कामधातुवैराग्यात् परिहीयते, तदा शुद्धकं त्यज्यते । **उपरिष्टाद् ब्रह्मलोक उपपद्यमानो लभत** इति । द्वितीयादिभ्यो ब्रह्मलोक उपपद्यमानो हानभागीयं तद्भूमिकक्लेशवदेव लभते । **तस्मात् कामधातावुपपद्यमानो विजहातीति** । तस्माद् ब्रह्मलोकात् कामधातावुपपद्यमानो विजहाति ।

इन्द्रियसञ्चारतोऽपि शैक्षाशैक्षमिति । श्रद्धाविमुक्तो दृष्टिप्राप्तायां शैक्षं लभते । समयविमुक्तोऽप्यकोप्यप्रतिवेधे अशैक्षं लभते ।

नावश्यम्, आनुपूर्विकेणालाभादिति[3] । यद्यानुपूर्विकोऽनागम्यसन्निश्रयेण नियाममवक्रामति, न लभते ॥ १४ ॥

स्वभूमिके शुद्धानास्रवे इति । व्युत्थानकाले, प्रवाहे च । **द्वितीयतृतीयध्यानभूमिके चेति** । मिश्रकामिश्रकानुलोमसमापत्तौ व्युत्क्रान्तकासमापत्तौ च । **सप्तस्वभूमिके शुद्धकानास्रवे** इति । पूर्ववत् विज्ञानाकाशानन्त्यायतनभूमिके च । तथैव प्रतिलोमसमापत्तौ । **भवाग्रं शुद्धकमेव, अनास्रवाभावादिति** । मान्द्यादनास्रवं नास्तीत्युक्तम् । अनुलोमसमापत्तौ तु

---

१. तस्मात् पुनः—का० । २. शुद्धका०—का० ।

३. ०केनानामा०—जा० ।

मष्टौ—स्वभूमिके शुद्धकानास्रवे तृतीयचतुर्थप्रथमध्यानभूमिके च । विज्ञानानन्त्यायतनान्तरं नव—स्वभूमिके द्वे, आकाशानन्त्यायतनचतुर्थध्यानभूमिकानि चत्वारि, आकिञ्चन्यायतनभवाग्रभूमिकानि त्रीणीति ।

एवमन्यध्यानारूप्यादनन्तरं[1] दश द्रव्याणि योज्यानि ।

एष तु संक्षेपः—

तृतीयाद् यावदूर्ध्वाधोऽनास्रवानन्तरं शुभम् ।

उत्पद्यते,

शुभग्रहणेन शुद्धमनास्रवं च गृह्यते कुशलत्वात् । अनास्रवस्य समापत्तिद्रव्यस्यानन्तरं स्वभूमिके च शुद्धानास्रवे उत्पद्येते । ऊर्ध्वाधोभूमिके च तृतीयाद् यावत् । व्युत्क्रान्तकसमापत्तारो हि तृतीयात् परेण लङ्घयितुं नोत्सहन्ते । अन्वयज्ञानान्तरं चारूप्यान् समापद्यन्ते, न धर्मज्ञानानन्तरम्; तस्याधराश्रयालम्बनत्वादिति ।

व्युत्थानकाले तद् भवति । **तृतीयचतुर्थप्रथमध्यानभूमिके चेति** । अमिश्रकमिश्रकानुलोमप्रतिलोमव्युत्क्रान्तसमापत्तिकालेषु ।

आकाशानन्त्यायनचतुर्थध्यानभूमिकानि चत्वारीति । तेष्वेव कालेषु । **त्रीणीति** । अनास्रवाभावात् । **एवमन्यध्यानारूप्यादनन्तरं दश द्रव्याणि योज्यानीति** । तदयथा तृतीयध्यानादनन्तरं दश—स्वभूमिके द्वे शुद्धकानास्रवे, चतुर्थध्यानाकाशान्त्यायतनभूमिकानि चत्वारि, तथैव च प्रथमद्वितीयध्यानभूमिकानि चत्वारीति । चतुर्थध्यानादनन्तरं दश—स्वभूमिके द्वे शुद्धकानास्रवे, आकाशविज्ञानानन्त्यायतनभूमिकानि चत्वारि, द्वितीयतृतीयध्यानभूमिकानि चत्वारीति । आकाशानन्त्यायतनादनन्तरं दश—स्वभूमिके द्वे, विज्ञानाकिञ्चन्यायतनभूमिकानि चत्वारि, तृतीयचतुर्थध्यानभूमिकानि चत्वार्युत्पद्यन्ते—इत्येवं दश भवन्ति ।

अन्वयज्ञानानन्तरं चेति विस्तरः । इदं व्युत्पाद्यते, ऊर्ध्वाधरभूम्यालम्बनत्वाद्धचानानामस्ति प्रसङ्ग इति कृत्वा । **तस्याधराश्रयालम्बनत्वादिति** । यस्मात् तद्धर्मज्ञानम् अधराश्रयकामधात्वाश्रयमधरालम्बनं कामदुःखादया-

---

१. ०रूप्यानन्तरं—का० ।

यथा चानास्रवादनन्तरमुक्तं वेदितव्यम्,

तथा शुद्धात् क्लिष्टं चापि स्वभूमिकम् ॥ १५ ॥

स्वभूमिकं क्लिष्टमधिकं शुद्धकादनन्तरमुत्पद्यते । शेषं यथैवानास्रवात् । अनास्रवस्य हि समनन्तरं क्लिष्टोत्पत्तिर्नास्तीति ॥ १५ ॥

क्लिष्टात् स्वं शुद्धकं क्लिष्टम्,

क्लिष्टात् समापत्तिद्रव्यादनन्तरं स्वभूमिके शुद्धकक्लिष्टे उत्पद्येते ।

एवं चाधरशुद्धकम् ।

क्लेशोत्पीडितो ह्यवरमपि समापत्तिं शुद्धकं बहु मन्यते । यदि क्लिष्टं परिच्छिद्याधः सञ्चरति । कुशलात् सञ्चरितो भवति न क्लिष्टात् । अथापरिच्छिद्य कथं सञ्चरति ? पूर्वविधात् । पूर्वं हि स एवंकामो भवति—वरमधस्तात् शुद्धकं नोपरिष्टात् क्लिष्टमिति । पूर्वाभिप्रायं च सन्ततिरनुवर्तते सत्त्वानाम्, प्रणिधाय सुप्तस्याभिप्रेतकालप्रबोधवत् । अनास्रवं तु क्लिष्टादनन्तरं सर्वथा नोत्पद्यते । समापत्तिकालं प्रत्येतदुक्तम् । शुद्धकात् क्लिष्टाच्च समनन्तरं स्वभूमिकमेव क्लिष्टमुत्पद्यते, नान्यभूमिकमिति ।

च्युतौ तु शुद्धकात् क्षिप्तं सर्वम्,

लम्बनम् । तस्यावराश्रयत्वालम्बनत्वान्न धर्मज्ञानानन्तरमारूप्यान् समापद्यन्ते ।

शेषं[1] **यथैवानास्रवादिति** । स्वभूमिके च शुद्धानास्रवे उत्पद्येते; ऊर्ध्वादधोभूमिके च, यावत् तृतीयादिति ॥ १५ ॥

प्रणिधायेति विस्तरः । यदि कश्चिदेवं बुद्धिमुत्पाद्य 'अर्धरात्रे चन्द्रोदये चन्द्रास्तमये वा मया प्रबोद्धव्यम्' इति स्वपेद् स पूर्वाभिप्रायानुवर्तनात् सन्ततेः, तस्मिन्नेव काले प्रबुद्धयते । यथाऽस्यैवं प्रणिधाय सुप्तस्य तस्याभिप्रेते काले प्रबोधो भवति । तद्वदेतत् । सर्वथा नोत्पद्यत इति । नापि स्वभूमिकम्, नाप्यवरभूमिकमुत्पद्यते-इत्यर्थः । समापत्तिकालं प्रत्येतदित्युक्तमिति । शुद्धकात् क्लिष्टाच्च समनन्तरं स्वभूमिकमेव क्लिष्टमुत्पद्यते, नान्यभूमिकमिति । कथम् ? तथा शुद्धात् क्लिष्टं वापि स्वभूमिकम्, क्लिष्टात् स्वं शुद्धं क्लिष्टमित्येवम् ।

---

१. शेषान्—जा० ।

च्युतिकाले तु उपपत्तिलाभिकाच्छुद्धकादनन्तरं सर्वभूमिकं क्लिष्ट-मुत्पद्यते ।

क्लिष्टात्तु नोत्तरम् ॥ १६ ॥

क्लिष्टात्तु ध्यानारूप्यादनन्तरं च्युतिकाले स्वाधरभूमिकं क्लिष्ट-मुत्पद्यते । नोर्ध्वभूमिकम् ॥ १६ ॥

न च सर्वस्माच्छुद्धकादनास्रवं समापत्तिद्रव्यमुत्पद्यते । किं तर्हि ?

चतुर्धा शुद्धकं हानभागीयादि,

हानभागीयम्, विशेषभागीयम्, स्थितिभागीयम्, निर्वेधभागीयमिति चतुर्विधं शुद्धकम् । भवाग्रं तु त्रिविधम्; अन्यत्र विशेषभागीयात् ।

किमस्य लक्षणम् ?

यथाक्रमम् ।

क्लेशोत्पत्तिस्वभूम्यूर्ध्वानास्रवानुगुणं हि तत् ॥ १७ ॥

क्लेशोत्पत्त्यनुगुणं हानभागीयम्, स्वभूम्यनुगुणं स्थितिभागीयम्, ऊर्ध्व-भूम्यनुगुणं विशेषभागीयम्, अनास्रवानुगुणं निर्वेधभागीयम् । तस्मादनास्रव-मुत्पद्यते ॥ १७ ॥

च्युतिकाले तु । मरणभवे । **उपपत्तिलाभिकाच्छुद्धादिति** विस्तरः । उपपत्तिध्यानेषु यदुपपत्तिलाभिकं कुशलं समाहितम्, तदपि शुद्धकं ध्यानमित्युच्यते । अत इदमुच्यते—च्युतिकाले त्विति विस्तरेण । किं कारणम् ? असमाहितत्वान्मरणभवस्य । न हि तदानीं शुद्धकं समापत्ति-ध्यानमस्तीति ।

अथ **सर्वभूमिकं क्लिष्टमुत्पद्यत** इति । स्वभूमिकाधरोर्ध्वभूमिकं प्रतिसन्धिचित्तं क्लिष्टमसमाहितमुत्पद्यते—इत्यर्थः ।

नोर्ध्वभूमिकमिति । क्लिष्टसद्भावे सति तत्रोपपत्त्यसम्भवात् ॥ १६ ॥

अन्यत्र विशेषभागीयादिति । इत ऊर्ध्वभूम्यभावात् ।

तस्मादनास्रवमुत्पद्यत इति । निर्वेधभागीयात् ॥ १७ ॥

अथैषां चतुर्णां कति कस्मादनन्तरमुत्पद्यन्ते ?

द्वे त्रीणि त्रीणि चैकं च हानभागाद्यनन्तरम् ।

हानभागीयं हानभाक् । तस्मादनन्तरं द्वे उत्पद्येते—हानि-स्थिति-भागीये । स्थितिभागीयादनन्तरं त्रीणि, अन्यत्र निर्वेधभागीयात् । विशेष-भागीयादनन्तरं त्रीणि, अन्यत्र हानभागीयात् । निर्वेधभागीयादनन्तरं तदेवैकमिति ।

कथं व्युत्क्रान्तकसमापत्तिरुत्पद्यते ?

गत्वागम्य द्विधा भूमीरष्टाकृष्टैकलङ्घिताः ॥ १८ ॥

व्युत्क्रान्तकसमापत्तिर्विसभागतृतीयगा ।

गत्वेति । अनुलोमं समापद्य । आगम्येति । प्रतिलोमं समापद्य । द्विधेति । सास्रवानास्रवा भूमीः । अष्टाविति । व्यानारूप्यसमापत्तीः । आकृष्टा[1] इति । अनुक्रमेण । एकलङ्घिता इति । एकामेकामुत्क्रम्य । सास्रवा अष्टौ भूमीरनुलोमप्रतिलोमसमापत्तितो निर्जित्य अनास्रवाश्च सप्त । पश्चात सास्रवात् प्रथमाद्ध्यानात् सास्रवं तृतीयं समापद्यते, तस्मा-दाकाशानन्त्यायतनम्, तस्मादाकिञ्चन्यायतनम् । एवं पुनः प्रतिलोमं निर्जित्य अनास्रवा अप्येकलङ्घिता अनुलोमप्रतिलोमं च समापद्यन्ते । अयं प्रयोगो व्युत्क्रान्तकसमापत्तेः ।

यदा तु प्रथमात् सास्रवात् तृतीयमनास्रवं ध्यानं समापद्यते, तस्मात् सास्रवमाकाशानन्त्यायतनम्, तस्मादनास्रवमाकिञ्चन्यायतनम् । एवं पुनः प्रतिलोमम् । तदा विसभागतृतीयद्रव्यगमनादभिनिष्पन्ना भवति । अति-विप्रकृष्टत्वान्न चतुर्थी समापद्यते । तां च त्रिषु द्वीपेषु असमयविमुक्त

हानस्थितिभागीये इति । हानभागीयं प्रवाहकाले, स्थितिभागीयं विशेषगमनकाले । अन्यत्र हानभागीयादिति । विशेषभागीयाद्धीयमानस्य स्थितिभागीयापरित्यागे तस्यैवोत्पत्तियोगात् । तदेवैकमिति । तदेव निर्वेध-भागीयं प्रवाहयोगेन ।

आकृष्टा इत्यनुक्रमेणेति । अनुलोमानुक्रमेण, प्रतिलोमानुक्रमेण च ।

---

१. निकृष्टा-का० ।

एवार्हन्नुत्पादयति; निःक्लेशत्वात्, समाधिवशित्वाच्च। दृष्टिप्राप्तस्य यद्यपि तीक्ष्णेन्द्रियत्वात् समाधौ वशित्वम्, न तु निःक्लेशः। समयविमुक्तो यद्यपि निःक्लेशः, न त्वस्य समाधौ वशित्वमिति।

केनाश्रयेण कति ध्यानारूप्याः सम्मुखीक्रियन्ते ?

स्वाधोभूम्याश्रया एव,

ध्यानाश्रया एव।

ध्यानारूप्याः,

भवाग्रं भवाग्रे च सम्मुखीक्रियते, अधश्च यावत् कामधातौ। शेषाणि स्वस्यां भूमावधश्चेति।

किं कारणमूर्ध्वोपपन्नो नाधरां समापत्तिं सम्मुखीकरोति ? यस्मात्तस्य

वृथाऽधरम् ॥ १९ ॥

नहि तस्याधरेण समापत्तिद्रव्येण किञ्चित् प्रयोजनं विधीयते; निहीनत्वात् ॥ १९ ॥

उत्सर्गं कृत्वाऽपवादं करोति—

आर्याकिञ्चन्यसाम्मुख्यात् भवाग्रे त्वास्रवक्षयः।

भवाग्रे तूपपन्नस्यानास्रवाकिञ्चन्यायतनसम्मुखीभावादास्रवक्षयो भवति।

कथं तत्रोपपन्नस्य तत्सम्मुखीभावः ? स्वस्याभावात्, तस्य चाभ्यासात्।

विधीयत इति। क्रियत इत्यर्थः। स्थाप्यत इति वा। किं कारणम् ? निहीनत्वात् ॥ १८-१९ ॥

"आर्याकिञ्चन्यसाम्मुख्यात्" इति। आर्यम् अनास्रवम्। अनास्रवस्य आकिञ्चन्यायतनस्य साम्मुख्यात् सम्मुखीभावात्।

भवाग्रे जातस्यास्रवप्रहाणं भवति। तु-शब्दोऽपवादार्थं द्योतयति।

स्वस्याभावादिति। भावाग्रिकस्यानास्रवस्य मार्गस्याभावादित्यर्थः। तस्य चाभ्यासादिति। तस्य आकिञ्चन्यायतनस्य अनास्रवस्याभ्यासात्, निकृष्टत्वात्।

अथैषां ध्यानारूप्याणां किमालम्बनम् ?

सतृष्णाः स्वभवालम्बाः,

आस्वादनासम्प्रयुक्ताः स्वभूमिकं भवमालम्बन्ते । भवग्रहणेन सास्रवं वस्तु गृह्यते । नाधरमालम्बन्ते; वीतरागत्वात् । नोत्तरम्; तृष्णापरिच्छिन्नत्वात् भूमीनाम् । नानास्रवम्; कुशलत्वप्रसङ्गादिति ।

ध्यानं सद्विषयं शुभम् ॥ २० ॥

कुशलं ध्यानं शुभकमनास्रवं च । तत् सर्वालम्बनं यत्किञ्चिदस्ति संस्कृतमसंस्कृतं वा ॥ २० ॥

न मौलाः कुशलारूप्याः सास्रवाधरगोचराः ।

मौलानां कुशलारूप्याणामधोभूमिकं सास्रवं वस्तु नालम्बनम्, स्वोर्ध्वभूम्यालम्बनत्वात् । अनास्रवं त्वालम्बनम् । सर्वान्वयज्ञानपक्षो[1] न धर्म-

---

तृष्णापरिच्छिन्नत्वाद् भूमीनामिति । या यस्यां भूमौ, तस्यामेव भूमावनुशयनात्, तया सा भूमिः परिच्छिन्ना भवति । अन्यथा हि तस्योत्तरत्वमेव न सिद्धयेत्, एकभूमिस्थानान्तरत्वात् । अथ एवौत्तराधर्येऽपि स्थानान्तराणां त्रयाणां त्रयाणाम्, अष्टानां चैकभूमिता सिद्धयति; तृष्णाव्यतिहारयोगात् । **नानास्रवं कुशलत्वप्रसङ्गादिति ।** तत्प्रार्थना हि कुशलो धर्मच्छन्द इति ॥ २० ॥

"न मौलाः कुशलारूप्याः सास्रवाधरगोचराः" इति । मौलग्रहणं सामन्तकनिरासार्थम् । आरूप्यसामन्तकानि ह्यधरां सास्रवां भूमिमालम्बन्ते[2] । कुशलग्रहणम् आस्वादनासम्प्रयुक्तनिरासार्थम् । उभयकुशलग्रहणार्थं च । यदि हि 'आरूप्या' इत्येवोच्येत, आस्वादनासम्प्रयुक्ता मौला आरूप्या न सास्रवाधरगोचरा इति सम्भाव्येरन् । अनास्रवा एवारूप्या एवमिति गृह्येरन् । आरूप्यग्रहणं ध्याननिरासार्थम् । ध्यानानि हि मौलान्यपि सास्रवाधरवस्त्वालम्बनानि भवन्ति; समन्तालोचनत्वाद् ध्यानानाम् ।

सास्रवग्रहणं अनास्रवनिवृत्त्यर्थम् । अनास्रवा हि अधरा धर्मा मौलानां कुशलानामारूप्याणामालम्बनानि सम्भवन्ति । अधरग्रहणमूर्ध्वविशेषणार्थम् । ऊर्ध्वभूमिकसास्रवालम्बनसम्भवात् । अनास्रवं त्वालम्बन-

---

१. °पक्षो—का० । २. °मालम्बते—ज्ञा० ।

ज्ञानपक्षः, नाधोभूमिनिरोधः । सामन्तकानन्तर्यमार्गाणां त्वधरा भूमिरालम्बनम् ।

एषां च पुनस्त्रिविधानां ध्यानानां रूप्यारूप्याणाम्

अनास्रवेण हीयन्ते क्लेशाः,

न शुद्धकेन । कुत एव क्लिष्टेन ! वीतरागत्वान्नाधः । तस्यैव तदप्रतिपक्षत्वान्न स्वभूमौ । विशिष्टतरत्वान्नोर्ध्वमिति ।

सामन्तकेन च ॥ २१ ॥

ध्यानारूप्यसामन्तकेन च क्लेशाः प्रहीयन्ते । शुद्धकेनापि; अधो-

---

मित्युद्ग्राह्य दर्शयति—**सर्वान्वयज्ञानपक्ष** इति । सर्वं इति नवभूमिक इन्द्रियगोत्रादिभेदभिन्नोऽपि गृह्यते । अन्वयज्ञानपक्ष इति पक्षग्रहणेन दुःखान्वयज्ञानक्षान्तय तत्सहभुवश्च गृह्यन्ते । **न धर्मज्ञानपक्ष** इति । कामदुःखाद्यालम्बत्वेन विप्रकृष्टत्वात् । **नाधोभूमिनिरोधः** । अधोभूमिग्रहणप्रसङ्गादिति । व्याख्यातमेतत् पुरस्तात् ॥

"**अनास्रवेण हीयन्ते क्लेशाः**" इति । ध्यानारूप्याणां योऽनास्रवः सम्भवति, तेन यथासम्भवं क्लेशाः प्रहीयन्ते । कतमेनानास्रवेण ? मौलेन । वक्ष्यति हि—**सामन्तकेन चेति** । (अभि० को० ८.२१) । अपवादकरूपेण सामन्तकरूपेण शुद्धकेन क्लेशाः प्रहीयन्ते—इत्यधिकृतम् । **कुत एव क्लिष्टनेति** । क्लिष्टेन क्लेशग्रहणं नैव सम्भवतीत्यभिप्रायः । किं कारणं शुद्धकेन क्लेशाः न प्रहीयन्ते इति ? आह—**वीतरागत्वान्नाध इति** विस्तरः । अधरभूमिवीतरागत्वान्न शुद्धकेनाधरभूमिकाः प्रहीयन्ते, कुत एव क्लिष्टेन ! **तस्यैव तदप्रतिपक्षत्वान्न स्वभूमौ** । तस्यैव प्रथमध्यानस्य, यावत्, नवसञ्ज्ञानासञ्ज्ञायतनस्य । तदप्रतिपक्षत्वात्—तस्याप्रतिपक्षः तदप्रतिपक्षः, तदभावस्तस्मात् तदप्रतिप्रक्षत्वान्न स्वभूमौ क्लेशाः प्रहीयन्ते । न हि भवेन भवस्य निःसरणमस्ति । **विशिष्टतरत्वान्नोर्ध्वमिति** । नोर्ध्वभूमिका क्लेशाः अधरभूमिकेन शुद्धकेन प्रहीयन्ते; विशिष्टतरत्वात् क्लेशानाम् । न च न्यूनमाश्रित्य विशिष्टानां प्रहाणं युज्यते इति अनेन शुद्धकेनापि क्लेशा न प्रहीयन्ते, कुत एव क्लिष्टेनेति सिद्धमेतत् । **शुद्धकेनापीति** । अपिशब्दात् अनास्रवेणापीति । सम्भवतस्त्वेतदुक्तम् । अत एवोच्यते—**अधोभूमिप्रतिपक्षत्वादिति** । कामावचरा हि क्लेशाः प्रथमध्यानसामन्तकेन

भूमिप्रतिपक्षत्वात् ।। २१ ।।

कति पुनः सामन्तकानि ?

अष्टौ सामन्तकान्येषाम्,

एकैकस्यैकैकं येन तत्प्रवेशः ।

किं तान्यपि त्रिविधानि, तथैव च तेषु वेदना ? नेत्युच्यते ।

शुद्धादुःखासुखानि हि ।

शुद्धकानि च तान्युपेक्षेन्द्रियसम्प्रयुक्तानि च यत्नवाह्यत्वाद्, अधोभूम्युद्वेगानपगमात्, वैराग्यपथत्वाच्च नास्वादनासम्प्रयुक्तानि ।

आर्यं चाद्यम्,

आद्यं सामन्तकमनागम्यं तच्छुद्धकं चानास्रवं च । यद्यपि सामन्तकचित्तेन प्रहीयन्ते । प्रथमध्यानभूमिका द्वितीयध्यानसामन्तकेन । एवं यावत आकिञ्चन्यायतनभूमिका नैवसंज्ञानासंज्ञायतनसामन्तकेनेति ।। २१ ।।

येन तत्प्रवेश इति । येन सामन्तकेन तेषां मौलानां ध्यानारूप्याणां प्रवेशः । **किं तान्यपि त्रिविधानीति** । आस्वादनासम्प्रयुक्तादिभेदात् । **तथैव च तेषु वेदनेति** । प्रथमयोर्ध्वयोः प्रीतिः, तृतीये सुखम्, चतुर्थे उपेक्षेत्युक्तम्, किमेवं सामन्तकेषु ।

उपेक्षेन्द्रियसम्प्रयुक्तानि च यत्नवाह्यत्वादिति । अनभिसंस्कारवाही मार्गः प्रीतिसुखाभ्यां सम्प्रयुज्यते । तानि च सामन्तकानि यत्नवाह्यानि साभिसंस्कारवाह्यानीति अत उपेक्षेन्द्रियसम्प्रयुक्तानि । पुनरधोभूम्युद्वेगानपगमात् प्रीतिसुखयोरयोग इति । अतोऽपि उपेक्षेन्द्रियसम्प्रयुक्तानि । **वैराग्यपथत्वाच्च नास्वादनासम्प्रयुक्तानीति** । यदि ह्यास्वादनासम्प्रयुक्तानि स्युः, वैराग्यमार्गो न स्यात् । न हि तृष्णासम्प्रयुक्तो मार्गः क्लेशप्रहाणाय भवति ।

अथवा अयमभिसम्बन्धः—उपेक्षेन्द्रियसम्प्रयुक्तानि च यत्नवाह्यत्वात् । अधोभूम्युद्वेगानपगमाद् वैराग्यपथत्वाच्चेति ह्याभ्यां कारणाभ्यां नास्वादनासम्प्रयुक्तानीति । पूर्ववत् वक्तव्यं शेषम् ।

यद्यपि सामन्तकचित्तेन सन्धिबन्ध[illegible]नि । अष्टास्वपि ध्याना-

सप्तसामन्तवर्जिताः ।

सप्त सामन्तकानि हित्वान्यास्वेकादशसु भूमिषु । कामधात्वनागम्यध्यानान्तरध्यानारूप्येषु ।

पुनश्चतस्रः समाधिभावना उच्यन्ते । "अस्ति समाधिभावना आसेविता भाविता बहुलीकृता दृष्टधर्मसुखविहाराय संवर्तते" इति विस्तरः । तत्र—

समाधिभावना ध्यानं शुभमाद्यं सुखाय हि ॥ २७ ॥

कुशलं प्रथमं शुद्धकमनास्रवं दृष्टधर्मसुखविहाराय समाधिभावना । तदादिकत्वादन्यान्यपि[1] ज्ञेयानि । नावश्यं सम्परायसुखविहाराय; अपरि-

---

आसङ्गास्पदभूतेभ्योऽशैक्षेभ्यः शून्यतादिसमाधिभ्यो वैमुख्यार्थमपरसमाधीन् समापद्यन्ते ।

विस्तर इति । "अस्ति समाधिभावना आसेविता भाविता बहुलीकृता दिव्यचक्षुरभिज्ञाज्ञानदर्शनाय संवर्तते । अस्ति समाधिभावना आसेविता भाविता बहुलीकृता प्रज्ञाप्रभेदाय संवर्तते । अस्ति समाधिभावना आसेविता भाविता बहुलीकृता आस्रवक्षयाय संवर्तते" ( ) इति सूत्रम् । तत्रासेविता निषेवणभावनया, भाविता विपक्षप्रहाणतया, बहुलीकृता विपक्षदूरीकरणतया ।

आह— दिव्यचक्षुरभिज्ञाज्ञानदर्शनाय संवर्तते' इति उक्तम्, न च दिव्यचक्षुरभिज्ञासमाधिभावना ? अत्रोच्यते—अयं फले हेतूपचारः । यस्य हेतोः समाधिभावनाया दिव्यचक्षुरभिज्ञाफलम्, तत्र फले हेतूपचारः । ज्ञानदर्शनाय समाविभावनेति ।

येषां पुनरयं पक्षः—"षड्विधा मुक्तिमार्गधीः" (अभि० को० ७.४२) इति, ध्यानसंगृहीत एव मानसो[2] विमुक्तिमार्गः षडभिज्ञा इति । तेषामप्येवैतत्; तेषां विमुक्तिमार्गिणां समाहितत्वात् । पूर्वक एव तु पक्षः अभिधर्मकोशचिन्तकानामित्यवगन्तव्यम् । दिव्यचक्षुःश्रोत्रविज्ञानयोः अभिज्ञात्वेनाभीष्टत्वात्, तदादिकत्वात् ।

अन्योऽन्यान्यपीति । उदाहरणत्वरूपोक्तत्वात् । नावश्यं सम्परायसुखविहारायेति । सम्परायः=अनागतं जन्म, तत्र सुखविहारः । तस्मै नावश्यमेतद् भवति । कस्माद् ? इत्याह—परिहीणानां प्रथमध्यानात् ।

---

१. अन्योऽन्योऽपि—जा० । २. मानसा—जा० ।

हीणोर्ध्वोपपन्नपरिनिवृतानां च[1] तदभावात् ॥ २७ ॥

दर्शनायाक्ष्यभिज्ञेष्टा,

दिव्यचक्षुरभिज्ञा ज्ञानदर्शनाय समाधिभावना ।

धीभेदाय प्रयोगजाः ।

प्रयोगजाः सर्वे गुणास्त्रैधातुका अनास्रवाः प्रज्ञाप्रभेदाय समाधिभावना ।

वज्रोपमोऽन्त्ये यो ध्याने सास्रवक्षमभावना ॥ २८ ॥

यश्चतुर्थध्याने वज्रोपमः समाधिः स आस्रवक्षयाय समाधिभावना । आत्मोपनायिका[2] किलैषा भगवतो धर्मोपदेशना[3] । अतश्चतुर्थ[4] एवाह ॥ २८ ॥

कृतः समाधीनां कालगतो निर्देशः ॥

ऊर्ध्वोपपन्नानां द्वितीयादिषु । परिनिर्वृतानां च सम्परायसुखविहारस्याभावात् ॥ २७ ॥

ज्ञानदर्शनायेति । ज्ञानाय, दर्शनाय चेति समासः । तत्र ज्ञानं मनोविज्ञानसम्प्रयुक्ता प्रज्ञा । "अमी भवन्तः सत्त्वाः कायदुश्चरितेन समन्वागताः" इत्येवमादि विकल्पाद् । दर्शनं चक्षुर्विज्ञानसम्प्रयुक्ता प्रज्ञा अविकल्पिका ।

त्रैधातुका अनास्रवा इति । त्रैधातुका अशुभानापानस्मृत्यरूपाप्रणिधिज्ञानप्रतिसंविदभिज्ञाविमोक्षाभिभ्वायतनादयः । अनास्रवाः विमोक्षमुखव्युत्क्रान्तक्रममापन्नास्रवक्षयाभिज्ञादयः । अत्र तु समाधिसम्प्रयोगात् प्रायोगिकानां गुणानां समाधिभावनेत्युपचारः । प्रज्ञाप्रभेदायेति । प्रज्ञाविशेषकर्षाय । आत्मोपनायिका किलैषा भगवतो धर्मोपदेशनेति । आत्मन उपनायिका, आत्मनो देशिकेत्यर्थः । श्रोत्रियसत्त्वो हि कर्मान्तप्रत्यवेक्षणाय चक्षुषा सत्त्वान् च्युत्युपपत्तिसङ्कटस्थान् अभिवीक्ष्य तत्परित्राणाय मध्यमे यामे ध्यानविमोक्षसमापत्तीः सम्मुखीकृतवान् । तस्य प्रायोगिका गुणाः प्रज्ञाप्रभेदाय जायन्ते । ततः तृतीये यामे चतुर्थं ध्यानं निःसृत्य नियामसमाक्रम्य यावद् वज्रोपमेन समाधिना सर्वसंयोजनप्रहाणं कृतवानिति ।

---

१. का० पुस्तके नास्ति । ३. धर्मदेशना—का० ।
२. ०पनायिकी—का० । ४. ०श्चतुर्थे—का० ।

इदानीं समाधिसन्निश्रितानां गुणानां निर्देशकाल इति व्याख्यायन्ते—

अप्रमाणानि चत्वारि,

मैत्री, करुणा, मुदिता, उपेक्षा च; अप्रमाणसत्त्वालम्बनत्वात् ।

किमर्थं चत्वार्येव ?

व्यापादादिविपक्षतः ।

व्यापदविहिंसाऽरतिकामरागव्यापादबहुलानां तत्प्रहाणाय चत्वारि यथासंख्यम् ।

अशुभोपेक्षयोः कामरागप्रतिपक्षत्वे को विशेषः ? वर्णरागस्याशुभा मैथुनरागस्योपेक्षेति **वैभाषिकाः** ।

एवं तु युज्यते—मैथुनरागस्याशुभा, मातापितृपुत्रज्ञातिरागस्योपेक्षेति ।

तत्र

मैत्र्यद्वेषः,

अद्वेषस्वभावा मैत्री ।

अपि करुणा,

करुणाप्येवम् ।

मुदिता सुमनस्कता ॥ २९ ॥

सौमनस्यस्वभावा मुदिता ॥ २९ ॥

यस्माच्चैवमात्मोपनायिका धर्मदेशना, अतश्चतुर्थ एव । "वज्रोप्रमोऽन्त्ये यो ध्याने" इति ॥ २८ ॥

अप्रमाणसत्त्वालम्बनादिति । अप्रमाणसंज्ञाकरणे कारणमेतत् ।

यथासंख्यमिति । **व्यापादबहुलानां** तत्प्रहाणाय मैत्री । **विहिंसा-बहुलानां** तत्प्रहाणाय करुणा । **अरतिबहुलानां** तत्प्रहाणाय मुदिता । **कामरागव्यापादबहुलानां** तत्प्रहाणायोपेक्षेति । **कामरागप्रतिपक्षत्वे को विशेष** इति । कामरागबहुलान्[1] प्रति चिन्ता । **मातापितृपुत्रज्ञातिराग-स्योपेक्षेति** । यथैवासम्बद्धाः पुरुषाः, एवमेवैते इत्युपेक्षेत्यभिप्रायः ॥ २९ ॥

---

१. ०बहुलात्—जा० ।

अन्यानि त्रीणि अप्रमाणानि षट्सु भूमिषु, अनागम्ये ध्यानान्तरे ध्यग्नेषु च; सप्रयोगमौलग्रहणात्।

केचित् तु पञ्चसु।

केचित् पुनः अनागम्यं हित्वा पञ्चस्वेतानीच्छन्ति।

दशस्वित्यपरे। कामधातुं सामन्तकानि च प्रक्षिप्य समाहितासमाहित-मौलप्रयोगग्रहणात्।

यदुक्तम् –"व्यापादादिविपक्षतः" (अभि० को० ८.२६) इति, किमप्रमाणैरपि क्लेशप्रहाणं भवति ?

न तैः प्रहाणम्,

मौलध्यानभूमिकत्वात्, अधिमुक्तिमनस्कारत्वात्, सत्त्वालम्बनत्वाच्च।

तत्प्रयोगेण तु व्यापादादिविष्कम्भणात् तत्प्रतिपक्षत्वमुक्तम्। प्रहीण-दूरीकरणाच्च[1]। कामधात्वनागम्यभूमिकानि हि मैत्र्यादीनि मौलाप्रमाण-

---

समाहितासमाहितमौलप्रयोगग्रहणादिति। षट्-पञ्च-दशभूमिकत्वात् त्रयाणामपि कारणमुच्यते सम्भवतः। तत्रासमाहितः कामधातुः। प्रयोगाः सामन्तकानीति सम्भवतो योज्यम्। षड्भूमिकव्यवस्थाने अनागम्यसामन्त-कमपीष्यते। सामन्तकान्यपि प्रयोगभूतानि गृह्यन्ते। किमङ्ग मौलानीति।

मौलध्यानभूमिकत्वादिति। मौल-शुद्धक-ध्यानभूमिकत्वादित्यर्थः। न हि शुद्धकैर्मौलध्यानैः क्लेशाः प्रहीयन्ते—इत्युक्तं प्राक्। अधिमुक्ति-मनस्कारत्वान्न तैः क्लेशाः प्रहीयन्ते। तत्त्वमनस्कारेण हि क्लेशप्रहाणम्। सत्त्वालम्बनत्वाच्च न तैः प्रहाणम्। धर्मसामान्यलक्षणमनस्कारेण हि क्लेशप्रहाणमिति सिद्धान्तः।

कथं तर्हि ? इत्याह—तत्प्रयोगेण त्विति विस्तरः। मैत्र्यादिप्रयोगेण व्यापादादिविष्कम्भनात् तत्प्रतिपक्षत्वमुक्तमिति। व्यापादादिप्रतिपक्षत्व-मुक्तम्। विष्कम्भणप्रहाणानि तानीत्यर्थः। प्रहीणदूरीकरणाच्चेति। यस्मादानन्तर्यमार्गलौकिकैः लोकोत्तरैर्वा मार्गैः व्यापादादयः क्लेशोपक्लेशाः दूरीक्रियन्ते, अतस्तत्प्रतिपक्षत्वमुक्तम्। कथम् ? इति दर्शयति—कामधातु-भूमिकानि अनागम्यभूमिकानि च मैत्र्यादीनि यौनि मौलाप्रमाणसदृशानि

---

१. प्रहाण०—का०।

भिप्रायात् । आशयस्याविपरीतत्वाद् वा ; अधिमुक्तिसंज्ञानात् ।

अथ वा क एवं विपरीतत्वे दोषः ? अकुशलत्वमिति चेत्, न; कुशलमूलत्वात्, व्यापादादिप्रतिपक्षत्वाच्च ।

उक्त एषामाकारः ।।

कामसत्त्वास्तु गोचरः ।। ३० ।।

कामावचराः सत्त्वा एषामालम्बनम्; तदालम्बनानां व्यापादादीनां प्रतिपक्षत्वात् ।

यत्तूक्तम्—एकां दिशमधिमुच्येतेति ? तद्भाजनेन भाजनगतं दर्शितम् ।। ३० ।।

कतिभूमिकान्येतानि ?

ध्यानयोर्मुदिता,

प्रथमद्वितीयध्यानयोर्मुदिता; सौमनस्यत्वात् ।

अन्यानि षट्सु,

न विपरीतत्वमित्यभिप्रायः । आशयस्याविपरीतत्वाद्वेति । अस्य कुशला धर्माः सुखिता वत सत्त्वा इत्येते चित्तचैत्ताः सपरिवाराः । अस्याशयस्याविपरीतत्वान्न विपरीतत्वं भवति ।

कथं पुनरस्याशयस्याविपरीतत्वादिति ? आह ? **अधिमुक्तिसंज्ञानादिति** । अधिमुक्तेः संज्ञानम् अधिमुक्तिसंज्ञानं तस्मात् । यस्मात् तामधिमुक्तिं तथैव सञ्जानीते । आधिमोक्षकोऽयं मनस्कार इति परिच्छिनत्ति । **अकुशलत्वमिति** । विपरीतग्रहणतः । न; कुशलत्वात् । नैतदेवम्; कस्मात् ? कुशलमूलत्वात् । कथं पुनः कुशलमूलम् ? इत्याह—**व्यापादादिप्रतिपक्षत्वादिति** । अद्वेषस्वभावत्वात् मैत्री व्यापादप्रतिपक्षः । दुःखापनयनाकारत्वाच्च करुणा दुःखोपसंहाराकाराया विहिंसायाः प्रतिपक्षो भवति । मुदिता च अरतेः प्रतिपक्षः; सौमनस्यरूपत्वात् । उपेक्षा च माध्यस्थ्यात् कामरागव्यापादयोः प्रतिपक्ष इति ।

तदालम्बनानामिति । कामावचरसत्त्वालम्बनानामित्यर्थः ।

तद्भाजनेन भाजनगतं दर्शितमिति । स्थानेन स्थानीयसत्त्वलोको । दर्शित इत्यर्थः ।। ३० ।।

अन्यानि त्रीणि अप्रमाणानि षट्सु भूमिषु, अनागम्ये ध्यानान्तरे ध्यग्नेषु च; सप्रयोगमौलग्रहणात् ।

केचित् तु पञ्चसु ।

केचित् पुनः अनागम्यं हित्वा पञ्चस्वेतानीच्छन्ति ।

दशस्वित्यपरे । कामधातुं सामन्तकानि च प्रक्षिप्य समाहितासमाहित-मौलप्रयोगग्रहणात् ।

यदुक्तम् – "व्यापादादिविपक्षतः" (अभि० को० ८.२६) इति, किमप्रमाणैरपि क्लेशप्रहाणं भवति ?

न तैः प्रहाणम्,

मौलध्यानभूमिकत्वात्, अधिमुक्तिमनस्कारत्वात्, सत्त्वालम्बनत्वाच्च ।

तत्प्रयोगेण तु व्यापादादिविष्कम्भणात् तत्प्रतिपक्षत्वमुक्तम् । प्रहीण-दूरीकरणाच्च[1] । कामधात्वनागम्यभूमिकानि हि मैत्र्यादीनि मौलाप्रमाण-

---

समाहितासमाहितमौलप्रयोगग्रहणादिति । षट्-पञ्च-दशभूमिकत्वात् त्रयाणामपि कारणमुच्यते सम्भवतः । तत्रासमाहितः कामधातुः । प्रयोगाः सामन्तकानीति सम्भवतो योज्यम् । षड्भूमिकव्यवस्थाने अनागम्यसामन्त-कमपीष्यते । सामन्तकान्यपि प्रयोगभूतानि गृह्यन्ते । किमङ्ग मौलानीति ।

मौलध्यानभूमिकत्वादिति । मौल-शुद्धक-ध्यानभूमिकत्वादित्यर्थः । न हि शुद्धकैर्मौलैर्ध्यानैः क्लेशाः प्रहीयन्ते—इत्युक्तं प्राक् । **अधिमुक्ति-मनस्कारत्वान्न तैः** क्लेशाः प्रहीयन्ते । तत्त्वमनस्कारेण हि क्लेशप्रहाणम् । **सत्त्वालम्बनत्वाच्च न तैः** प्रहाणम् । धर्मसामान्यलक्षणमनस्कारेण हि क्लेशप्रहाणमिति सिद्धान्तः ।

कथं तर्हि ? इत्याह—तत्प्रयोगेण त्विति विस्तरः । मैत्र्यादिप्रयोगेण **व्यापादादिविष्कम्भनात् तत्प्रतिपक्षत्वमुक्तमिति** । व्यापादादिप्रतिपक्षत्व-मुक्तम् । विष्कम्भणप्रहाणानि तानीत्यर्थः । **प्रहीणदूरीकरणाच्चेति** । यस्मादानन्तर्यमार्गैर्लौकिकैः लोकोत्तरैर्वा मार्गैः व्यापादादयः क्लेशोपक्लेशाः दूरीक्रियन्ते, अतस्तत्प्रतिपक्षत्वमुक्तम् । कथम् ? इति दर्शयति—कामधातु-भूमिकानि अनागम्यभूमिकानि च मैत्र्यादीनि त्रीणि मौलाप्रमाणसदृशानि

---

१. प्रहाण०—का० ।

सदृशानि संविद्यन्ते। तैस्तान् विष्कम्भ्य प्रहाणमार्गैः प्रजहाति। ततो वीतरागावस्थायां मौलाप्रमाणलाभात्। बलवत्प्रत्ययलाभेऽपि तैरनाधृष्यो भवति।

कथं पुनरादिकर्मिको मैत्र्यां प्रयुज्यते? यथा सुखितमात्मानं मन्यते परान् वा शृणोति बुद्धबोधिसत्त्वार्यश्रावकांस्तथा सत्त्वानां तत्सुखमधिमुच्यते एवं सुखिता वत सन्तु इति। न चेच्छक्नोति क्लेशस्योद्भूतवृत्तित्वात् स मित्रपक्षं त्रिधा भित्त्वाऽधिमात्रे तत्सुखमधिमुच्यते। ततो मध्ये मृदौ च। तेषु चेत् समां मैत्री लभते तत उदासीनपक्षे। ततः शत्रुपक्षं त्रिधा भित्त्वा मृदौ तत् सुखमधिमुच्यते। ततो मध्येऽधिमात्रे च। ततश्चेदधिमात्र इव मित्रपक्षे सुखाधिमोक्षो न व्यावर्तते। ततः क्रमेण ग्रामराष्ट्रसुखाधिमोक्षो यावदेकां दिशं यावत् सर्वं लोकं मैत्र्या स्फरति। यस्तु सर्वगुणग्राही स मैत्रीं क्षिप्रमुत्पादयति। शक्यं हि समुच्छिन्नकुशलमूलेऽपि गुणग्राहिणा भवितुम्, प्रत्येकबुद्धे च दोषग्राहिणा; पूर्वपुण्यापुण्यफलसंदर्शनात्[1]।

एवं करुणायां मुदितायां च प्रयुज्यते। अमी सत्त्वा बहुविधव्यसनौघनिमग्ना अप्येव दुःखाद्विमुच्येरन्, अप्येवाभिप्रमोदेरन्[2] इत्यधिमुच्यमान उपेक्षां तूदासीनपक्षादारभते।

एतानि चाप्रमाणानि

नृष्वेव जन्यन्ते,

संविद्यन्ते; प्रयोगालम्बनाकारस्वभावसादृश्यान् मौलैः सदृशानि भवन्ति। तैरप्रमाणैः त्रिभिस्तान् क्लेशान् विष्कम्भ्य प्रहाणमार्गैः आनन्तर्यमार्गैः प्रजहाति। बलवत्प्रत्ययलाभेऽपीति। व्यापादादिप्रत्ययलाभेऽपि बलवति सति तैः क्लेशैरनाधृष्यो भवति। सम्मुखीभावातः।

अधिमात्र इति। मित्रपक्षे। परममित्रे हि सुकरा मैत्री। स्फरतीति। व्याप्नोति। पूर्वपुण्यापुण्यफलसन्दर्शनादिति। पूर्वपुण्यफलसन्दर्शनात् समुच्छिन्नकुशलमूलेऽपि पुद्गले शक्यं गुणग्रहणेनानेन भवितुं 'पुण्यमनेन कृतमासीद् येनास्य रूपादिसम्पद्' इति। प्रत्येकबुद्धे च दोषग्राहिणः 'नूनमनेन अपुण्यं कृतमासीद् येनास्यैवं रूपादिवैकल्यम्' इति।

अप्येव दुःखाद् विमुच्येरन् इत्यविमुच्यमानः करुणायां प्रयुज्यते। अप्येवाभिप्रमोदेरन्निति अविमुच्यमानो मुदितायां प्रयुज्यते।

---

१. पूर्वं—का०। २. ०वातिप्रमो०—का०।

मनुष्येषूत्पद्यन्ते, नान्यत्र ।

किं पुनर्यं एकेनाप्रमाणेन समन्वागतः सोऽवश्यं सर्वैः ? किन्तु

व्यन्वितो ध्रुवम् ॥ ३१ ॥

तृतीयचतुर्थध्यानोपपन्नो मुदितया न समन्वागतो भवति । त्रिभिस्त्वप्रमाणलाभी नित्यं समन्वागतो भवति ॥ ३१ ॥

अष्टौ विमोक्षाः,

'रूपी रूपाणि पश्यति' इति प्रथमो विमोक्षः । 'अध्यात्मरूपसंज्ञी वहिर्धा रूपाणि पश्यति' इति द्वितीयः । 'शुभं विमोक्षं कायेन साक्षात्कृत्वोपसम्पद्य विहरति' इति तृतीयः । चत्वार आरूप्याः । संज्ञावेदितनिरोधश्चाष्टमः ।

तेषाम्

प्रथमावशुभा,

मुदितया न समन्वागत इति । तृतीयचतुर्थयोः सौमनस्याभावात् ॥ ३१ ॥

"अष्टौ विमोक्षाः" इति । यथासूत्रम् । "अष्टौ विमोक्षाः । कतमेऽष्टौ ? 'रूपी रूपाणि पश्यति' इत्ययं प्रथमो विमोक्षः । 'अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति' इत्ययं द्वितीयो विमोक्षः । 'शुभं विमोक्षं कायेन साक्षात् कृत्वोपसम्पदय विहरति' इत्ययं तृतीयो विमोक्षः । 'सर्वशो रूपसंज्ञानां समतिक्रमात्, प्रतिघसंज्ञानामस्तङ्गमात्, नानात्वसंज्ञानाममनसिकारात् 'अनन्तमाकाशम्, अनन्तमाकाशम्' इत्याकाशानन्त्यायतनमुपसम्पदय विहरति, तद्यथा--देवा आकाशानन्त्यायतनोपगाः—अयं चतुर्थो विमोक्षः । पुनरपरं सर्वशः आकाशानन्त्यायतनं समतिक्रम्य 'अनन्तं विज्ञानम्, अनन्तं विज्ञानम्' इति विज्ञानानन्त्यायतनमुपसम्पद्य विहरति, तद्यथा—देवा विज्ञानानन्त्यायतनोपगाः—अयं पञ्चमो विमोक्षः । पुनरपरं सर्वशो विज्ञानानन्त्यायतनं समतिक्रम्य 'नास्ति किञ्चिद्' इत्याकिञ्चन्यायतनमुपसम्पदय विहरति, तद्यथा—देवा आकिञ्चन्यायतनोपगाः—अयं षष्ठो विमोक्षः । पुनरपरं सर्वशः आकिञ्चन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसम्पदय विहरति, तद्यथा—देवा नैवसंज्ञानासंज्ञायतनोपगाः—अयं सप्तमो विमोक्षः । पुनरपरं सर्वशो नैवसंज्ञानासंज्ञायतनं समतिक्रम्य संज्ञावेदितनिरोधकायेन साक्षात्कृत्वोपसम्पदय विहरति—अयमष्टमो विमोक्षः" ( ) इति ।

रूपी रूपाणीति । स्वात्मनि रूपाणि विमाय बहिरपि न्यानि

प्रथमौ द्वौ विमोक्षावशुभास्वभावौ; विनीलकाद्यालम्बनत्वात्[1] । अत एतयोरशुभावन्नयो वेदितव्यः । एतौ च

ध्यानयोर्द्वयोः ।

प्रथमद्वितीययोर्ध्यानयोः, नान्यस्यां भूमौ । कामावचरप्रथमध्यानभूमिकयोर्वर्णरागयोः प्रतिपक्षेण यथासंख्यम् ।

तृतीयोऽन्त्ये,

शुभो विमोक्षश्चतुर्थध्याने ।

स चालोभः,

सोऽप्यलोभस्वभावो न त्वशुभास्वभावः; शुभाकारत्वात् । सपरिवारास्त्वेते पञ्चस्कन्धस्वभावाः । आरूप्यविमोक्षास्तु

शुभारूप्याः समाहिताः ॥ ३२ ॥

कुशलाः समाहिता एव चारूप्यविमोक्षाख्यां लभन्ते, न क्लिष्टा नाप्यसमाहिताः; तद्यथा मरणभवे ।

पश्यति; विनीलकाद्यालम्वनत्वात् । **अशुभावन्नयो वेदितव्य** इति । अधिरागस्य वर्णरागादिप्रतिपक्षमारभ्य सम्भवतो विस्तरेण योज्यम् ।

"अलोभा दशभूः कामदृश्यालम्वा नृजा शुभा" (अभि० को० ५.१२) इति ।

यथासंख्यमिति । **कामावचरस्य वर्णरागस्य प्रतिपक्षेण** प्रथमध्यानभूमिको विमोक्षः । **प्रथमध्यानभूमिकस्यापि वर्णरागप्रतिपक्षेण** द्वितीयध्यानभूमिको विमोक्षः । एतौ च द्वौ पुनर्दूरीभावप्रतिपक्षौ वेदितव्यौ ।

आह—द्वितीयादिध्यानेषु वर्णरागो नास्तीति कथं गम्यते ? चक्षुर्विज्ञानाभावात् । यो हि यस्माद् विषयाद् विरक्तः, नियतमसौ तद्ग्राहकादपि विज्ञानाद् विरक्तः, द्वितीयादिषु च ध्यानेषु चक्षुर्विज्ञानादि नास्ति, इत्यतो वर्णवीतरागास्ते—इति सिद्धम् ।

"शुभारूप्याः" इति । शुद्धकानास्रवाः ।

---

१. ०द्याकारत्वात्—का० ।

अन्यदाप्यसमाहिताः सन्तीत्यपरे । सामन्तकविमुक्तिमार्गा[1] अपि विमोक्षाख्यां लभन्ते, नानन्तर्यमार्गः; अधरालम्बनत्वात् । वैमुख्यार्थो हि विमोक्षार्थ इति ।। ३२ ।।

निरोधस्तु समापत्तिः,

संज्ञावेदितनिरोधस्तु अष्टमो विमोक्षो निरोधसमापत्तिः । सा च पूर्वं निर्दिष्टा । संज्ञावेदितवैमुख्यात्, सर्वसंस्कृताद्वा ।

समापत्त्यावरणविमोक्षणाद्विमोक्ष इत्यपरे ।

तां तु समापद्यन्ते

सूक्ष्मसूक्ष्मादनन्तरम् ।

भवाग्रं हि संज्ञा सूक्ष्मं तत् पुनः सूक्ष्मतरं कृत्वा निरोधं समापद्यन्ते ।

समापन्नानां तु

स्वशुद्धकाधरार्येण व्युत्थानं चेतसा ततः ।। ३३ ।।

भावाग्रिकेण वा शुद्धकेन चेतसा ततो व्युत्थानं भवत्याकिञ्चन्यायतन-भूमिकेन वा सास्रवेण । तदेवं तस्याः सास्रवं समापत्तिचित्तं भवति, सास्रवानान्तर्यं तु व्युत्थानचित्तमिति ।। ३३ ।।

अन्यदाप्यसमाहिताः सन्तीति । आरूप्येषु विपाकजान् चित्तचैत्तान् अभिसन्धायोच्यते । पूर्वस्मिंस्तु पक्षे मरणभवावस्थायामेवासमाहिता आरूप्या इति दर्शयति । सामन्तकविमुक्तिमार्गा अपि विमोक्षाख्यां लभन्त इति । किमङ्ग पुनरित्यपि-शब्दार्थः । नानन्तर्यमार्गे इति विस्तरः । यस्माद् अधरभूमिवैमुख्याद् विमोक्षा इत्युच्यन्ते, तस्माद् आनन्तर्यमार्गा न विमोक्षाख्यां लभन्ते; अधरालम्बनत्वात् । विमुक्तिमार्गास्तु लभन्ते; ऊर्ध्वालम्बनत्वात् ।। ३२ ।।

"निरोधस्तु समापत्तिः" । अष्टम इति वाक्यशेषः । संज्ञावेदित-वैमुख्यादिति । संज्ञावैमुख्यात्, वेदितवैमुख्याच्च विमोक्षः । सर्वसंस्कृताद्वा । वैमुख्याद् विमोक्षः ।

समापत्त्यावरणविमोक्षणाद् विमोक्ष इति । समापत्त्यावरणविमोक्ष-वैमुख्यात् विमोक्ष इति । तत्र समापत्त्यावरणम्—यस्मिन्नावरणे सिताक्षमण्यता विषाक्षणलीतरागा अपि सन्तः प्रथममपि नीलं ध्यानं नोत्पादयन्ति ।। ३३ ।।

१. °विमुक्ति०—क्ष० ।

एषां च विमोक्षाणाम्—

कामाप्तदृश्यविषयाः प्रथमाः,

कामावचरमेषां रूपायतनमालम्बनममनोज्ञं मनोज्ञं च यथायोगम् ।

ये त्वरूपिणः ।

तेऽन्वयज्ञानपक्षोर्ध्वस्वभूदुःखादिगोचराः ॥ ३४ ॥

आरूप्यविमोक्षाणां स्वभूमिकोर्ध्वभूमिकं दुःखं तद्धेतुनिरोधौ चालम्बनं सर्वश्चान्वयज्ञानपक्षो मार्गः । अप्रतिसंख्यानिरोधश्चेति वक्तव्यमाकाशं चैकस्येति । कस्मान्न तृतीये ध्याने विमोक्षः । द्वितीयध्यानभूमिकवर्णरागाभावात्, सुखमण्डेञ्जितत्वाच्च ।

यथायोगमिति । द्वयोर्विनीलकाद्यमनोज्ञं रूपमालम्बनम् । तृतीयस्य मनोज्ञमालम्बनमिति ।

तद्धेतुनिरोधौ चेति । तस्य दुःखस्य समुदय-निरोधौ । **सर्वश्चान्वयज्ञानपक्ष** इति । ऊर्ध्वधिः स्वभूमिक इत्यर्थः । **अप्रतिसंख्यानिरोधश्चेति** । अप्रतिसंख्यानिरोधश्चारूप्यविमोक्षाणामालम्बनमिति वक्तव्यम् ।

"ये त्वरूपिणः ।

तेऽन्वयज्ञानपक्षोर्ध्वस्वभूदुःखादिगोचराः" ॥ इति अत्र वचनात् ।

आह—कतमः पुनरप्रतिसंख्यानिरोधस्तेषामालम्बनम् ? अत्रोच्यते—अशैक्षस्यानिमित्तस्य समाधेरप्रतिसंख्यानिरोधमालम्बते । एते हि आरूप्या विमोक्षा अनिमित्तानिमित्तसमाधिस्वभावाः सम्भवन्ति । ते च सप्त सामन्तकानि हित्वा अन्यास्वेकादशसु भूमिषु कामाधातावनागम्ये ध्यानान्तरेषु ध्यानारूप्येषु चाप्टास्विति । सोपसंख्यानं शास्त्रमिति शास्त्रलक्षणं दर्शितं भवति । **आकाशं चैकस्येति** । वक्तव्यम्—आकाशानन्त्यायतनविमोक्षस्यालम्बनम् । **द्वितीयध्यानभूमिक-वर्णरागाभावादिति** । द्वितीयध्यानभूमिकस्य वर्णरागप्रतिपक्षयितव्यस्याभावादित्यर्थः । तदभावः कायिकविज्ञानाभावात् । **सुखमण्डेञ्जितत्वाच्च** । सुखस्य मण्डः । सर्वसुखस्योपरिस्थसुखमित्यर्थः । तेनेञ्जितत्वात् कम्पितत्वात् । न तृतीये ध्याने विमोक्षो व्यवस्थाप्यते ।

कस्माच्छुभं[1] विमोक्षमुत्पादयति ? अशुभया लीनां सन्ततिं प्रमोदयितुं जिज्ञासनार्थं वा । कच्चिदशुभाविमोक्षौ निष्पन्नाविति ।

एवं च पुनस्तौ निष्पन्नौ भवतो यदि शुभतोऽपि मनसि कुर्वतः क्लेशो नोत्पद्यत इति । द्वाभ्यां हि कारणाभ्यां योगिनो विमोक्षादीनुत्पादयन्ति—क्लेशदूरीकरणार्थम्, समापत्तिवशित्वार्थं च । अरणादिगुणाभिनिर्हाराय आर्यायाश्च ऋद्धेः । सा पुनर्यया वस्तुपरिणामाधिष्ठानायुरुत्सर्गादीनि क्रियन्ते ।

कस्मात् तृतीयाष्टमयोरेव साक्षात्करणमुक्तम्, नान्येषाम् ? प्रधानत्वाद्, धातुभूमिपर्यन्तावस्थितत्वाच्च ॥ ३४ ॥

यदि तृतीयध्यानभूमिको वर्णरागो नास्ति, कस्मात् शुभं विमोक्षमुत्पादयतीति । अत आह—अशुभया लीनां सन्ततिं प्रमोदयितुं जिज्ञासनार्थं वेति । विमोक्षादीनामिति । आदि-शब्देनाभिभ्वायतनाद्युपग्रहः । क्लेशदूरीकरणार्थम् । विमोक्षादीनां दूरीभावप्रतिपक्षत्वात् । समापत्तिवशित्वार्थं च । तच्च समापत्तिवशित्वमरणादिगुणाभिनिर्हाराय भवति । आर्यायाश्च ऋद्धेः । किम् ? अभिनिर्हारायेति प्रकृतम् । सा पुनर्यया वस्तुपरिणामाधिष्ठान-आयुरुत्सर्गादीनीति । तत्र वस्तुपरिणामम्—यद्वस्तु यथाविमुच्यते तथैव तद्भवति, यथा—सुवर्णस्य मृत्करणम् । तथाविमोमोक्षादधिष्ठानम्—स्थिरस्य वस्तुनः । इमं तु कालमवतिष्ठामीति, तथा आयुषा उत्सर्गः । आदिशब्देन मुमेरोः परमाणौ प्रवेश इत्येवमन्यच्च सूत्रे द्रष्टव्यम् ।

कस्मात् तृतीयाष्टमयोरेव साक्षात्करणमुक्तम्, नान्येषामिति । कस्मात् तृतीयस्य साक्षात्करणमुक्तम्—शुभं विमोक्षं कायेन साक्षात्कृत्वोपसम्पद्य विहरतीति । अष्टमस्यापि संज्ञावेदितनिरोधं कायेन साक्षात्कृत्वोपसम्पद्य विहरतीति । अत्र साक्षात्कृत्वेति, प्रत्यक्षीकृत्येत्यर्थः । उपसम्पद्य विहरतीति, तां समापद्य समापत्तिं विहरतीत्यर्थः ।

अत्रोच्यते—प्रथमद्वितीयाभ्यां विमोक्षाभ्यां तृतीयस्य विमोक्षस्य प्राधान्यात् । रूपिविमोक्षावरणसाकल्यप्रहाणादाश्रयपरिवृत्तितस्तृतीयस्य साक्षात्करणमुक्तम् । एवं अष्टमस्यापि प्राधान्यात् । आरूप्यविमोक्षावरणसाकल्यप्रहाणादाश्रयपरिवृत्तेः साक्षात्करणमुक्तम् । धातुभूमिपर्यन्तावस्थितत्वाच्चेति । चतुर्थं ध्यानं स्वधातुभूमिपर्यन्तावस्थितम् । भवाग्रमपि आरूप्यधातुभूमिपर्यन्तावस्थितम् ॥ ३४ ॥

---

१. कस्मा०—का० ।

अभिभ्वायतनान्यष्टौ,

अध्यात्मं रूपसंज्ञी वहिर्धा रूपाणि पश्यति परीत्तानि सुवर्णानि दुर्वर्णानि, तानि खलु रूपाण्यभिभूय जानात्यभिभूय पश्यतीत्येवंसंज्ञी भवति—इदं प्रथममभिभ्वायतनम्। एवमधिमात्राणि। अध्यात्ममरूपसंज्ञ्येवमेव। इत्येतानि चत्वारि।

अध्यात्ममरूपसंज्ञ्येव पुनर्नीलपीतलोहितावदातानि पश्यतीत्यष्टौ भवन्ति।

तेषाम्

एवमधिमात्राणीति। "अध्यात्मं रूपसंज्ञी वहिर्धा रूपाणि पश्यति अधिमात्राणि सुवर्णदुर्वर्णानि"—इति विस्तरः। यावत्, "इदं द्वितीयमभिभ्वायतनम्"। **अध्यात्ममरूपसंज्ञी एवमेवेति**। कथम्? "अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति परित्तानि सुवर्णदुर्वर्णानि" इति पूर्ववत्, यावत्, "इदं द्वितीयमभिभ्वायतनम्"। तथा "अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति अधिमात्राणि सुवर्णदुर्वर्णानि" इति पूर्ववत्, यावत्, "इदं तृतीयमभिभ्वायतनम्"। तथा अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति अधिमात्राणि सुवर्णदुर्वर्णानि" इति पूर्ववत्, यावत् "इदं चतुर्थमभिभ्वायतनम्"। **इत्येतानि चत्वारीति**। **अरूपसंज्ञी एव पुनर्नील-पीत-लोहितावदातानि पश्यतीति**। कथम्? "अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति नीलानि नीलवर्णानि नीलनिदर्शनानि नीलनिर्भासानि। तद्यथा—उमकापुष्पं सम्पन्नं वाराणसेयं वा वस्त्रं नीलं नीलवर्णं नीलनिदर्शनं नीलनिर्भासं तानि खलु रूपाण्यभिभूय जानाति, अभिभूय पश्यति, एवंसंज्ञी च भवति—इदं पञ्चममभिभ्वायतनम्। अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति पीतानि पीतवर्णानि, पीतनिदर्शनानि पीतनिर्भासानि। तद्यथा—कर्णिकार-पुष्पं सम्पन्नं वाराणसेयं वा वस्त्रं पीतमिति विस्तरः—इदं पष्ठमभिभ्वायतनम्। अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति लोहितानि लोहितवर्णानि लोहितनिदर्शनानि लोहितनिर्भासानि, तद्यथा बन्धूक-पुष्पं सम्पन्नं वा वाराणसेयं वस्त्रं लोहितमिति विस्तरः—इदं सप्तममभिभ्वायतनम्। अध्यात्ममरूपसंज्ञी वहिर्धा रूपाणि पश्यति अवदातानि अवदातवर्णानि अवदातनिदर्शनानि अवदातनिर्भासानि, तद्यथा—उशनस्तारकासम्पन्नं वा वाराणसेयं वस्त्रमवदातमिति विस्तरः—इदमष्टममभिभ्वायतनमिति। मूर्धकानि चत्वारि, इमानि चत्वारीत्यष्टौ भवन्ति।

द्वयमाद्यविमोक्षवत् ।

यथा प्रथमो विमोक्षः, एवं द्वे अभिभ्वायतने प्रथमद्वितीये ।

द्वे द्वितीयवत्,

यथा द्वितीयो विमोक्ष एवं द्वे अभिभ्वायतने तृतीयचतुर्थे ।

अन्यानि पुनः शुभविमोक्षवत् ॥ ३५ ॥

यथा शुभो विमोक्ष एवमन्यानि चत्वारि ।

अयं तु विशेषः—तैर्विमोक्षमात्रम्[1], एभिस्त्वालम्बनाभिभवनम्;

"**द्वयमाद्यविमोक्षवत्**" इति । यथा रूपी रूपाणि पश्यतीति प्रथमो विमोक्षः, आत्मगतं रूपं पश्यन् वहिर्गतं रूपं पश्यति—एवमाद्ये अभिभ्वायतने । तयोर्ह्येकमात्मगतं रूपं पश्यन् वहिर्गतं पश्यति । तथा ह्येतत् पठ्यते—"अध्यात्मं रूपसंज्ञी वहिर्वा रूपाणि पश्यति परित्तानि" इति विस्तरः । द्वितीयमपि तथैव । अयं तु विशेषः—वहिर्वा रूपाणि पश्यति अधिमात्राणि । किञ्च—यथा प्रथमो विमोक्षः प्रथमध्यानभूमिकः कामावचर-वर्णरागप्रतिपक्षः कामावचररूपायतनालम्बनश्च, तथेमे प्रथमे अभिभ्वायतने वेदितव्ये ।

"**द्वे द्वितीयवत्**" इति । यथा अध्यात्ममरूपसंज्ञी वहिर्वा रूपाणि पश्यतीत्येवंलक्षणो द्वितीयो विमोक्षः । एवंलक्षणे तृतीयचतुर्थे[2] अभिभ्वायतने । ते अपि ह्येवं पठ्येते—"अध्यात्ममरूपसंज्ञी वहिर्वा रूपाणि पश्यति परित्तानि" इति तृतीयः पठ्यते । 'अध्यात्ममरूपसंज्ञी वहिर्वा रूपाणि पश्यत्यधिमात्राणि" इति चतुर्थः पठ्यते । किञ्च—यथा द्वितीयो विमोक्षो द्वितीयध्यानभूमिकः प्रथमध्यानभूमिकवर्णरागप्रतिपक्षः कामावचर-रूपालम्बनश्च, तथा तृतीयं चतुर्थं चाभिभ्वायतनम् ।

"**अन्यानि पुनः शुभविमोक्षवत्**" इति । यथा शुभो विमोक्षः चतुर्थ-ध्यानभूमिकः कामावचरमनोज्ञरूपायतनालम्बनश्च, तथा नीलपीत-लोहितावदातानिभ्वायतनानि । केवलं त्विह वर्णचतुष्टयं विभज्य गृह्यते । शुभस्य च विमोक्षस्यालोभः स्वभावः । एवमेषामपि । यथायं शुभो विमोक्षः सपरिवारग्रहणात् पञ्चस्कन्धस्वभावः, तथैव तान्यपीति अव-

---

१. तैर्मुख०—ज्ञा० । २. एवं तृतीय०—ज्ञा० ।

यथेष्टमधिमोक्षात्[1], क्लेशानुत्पादाच्च ॥ ३५ ॥

दश कृत्स्नानि,

दश कृत्स्नायतनानि निरन्तरकृत्स्नस्फरणात् । पृथिव्यप्तेजोवायु-नीलपीतलोहितावदातकृत्स्नानि । आकाशविज्ञानानन्त्यायतनकृत्स्ने च । तेषाम्

अलोभोऽष्टौ[2],

प्रथमान्यष्टावलोभस्वभावानि ।

ध्यानेऽन्त्ये,

चतुर्थ एव ध्याने ।

गोचरः पुनः ।

कामाः,

कामावचररूपायतनमेषामालम्बनम् ।

गन्तव्यम् । तैर्विमोक्षमात्रमिति । नालम्बनाभिभवनम् । कथं चाभि-भ्वायतनैरालम्बनाभिभ्वायतनमिति ? अत आह—**यथेष्टमधिमोक्षादिति** । यथेष्टं तैर्नीलपीताद्यधिमोक्षात् क्षणेन नीलम्, क्षणेन पीतमित्यादि । अमनोज्ञस्य वा विनीलकादेर्मनोज्ञाधिमोक्षात् । **क्लेशानुत्पादाच्चेति** । शुभतोऽपि च सांक्लेशिकं वस्त्वाकारयतः क्लेशानुत्पत्तेस्तैरभिभ्वायतनैरा-लम्बनाभिभवनं भवति ॥ ३५ ॥

निरन्तर कृत्स्नस्फरणादिति । निरन्तरं कृत्स्नानां पृथिव्यादीनां स्फरणाद् व्यापनात् । तस्मात् कृत्स्नायतनानीत्युच्यन्ते **कामावचरं रूपायतनमिति** ।

"पृथिवी वर्णसंस्थानमुच्यते लोकसंज्ञया ।
आपस्तेजश्च वायुश्च धातुरेव तथापि च ॥" (अभि० का० १.१३)

इति वचनात् ।

---

१. यथेच्छ०—का० ।

२. अलोभोऽष्टौ—का० ।

वायौ[1] स्प्रष्टव्यायतनमित्येके ।

द्वे शुद्धकारूप्ये,

द्वे पश्चिमे कृत्स्ने शुद्धकारूप्यस्वभावे ।

स्वचतुःस्कन्धगोचरे ॥ ३६ ॥

स्वभूमिकाश्चत्वारः स्कन्धा अनयोरालम्बनम् । विमोक्षप्रावेशिकान्यभिभ्वायतनानि, अभिभ्वायतनप्रावेशिकानि कृत्स्नायतनानि; उत्तरोत्तरविशिष्टत्वात् । सर्वाणि चैतानि विमोक्षादीनि पृथग्जनार्यसान्तानिकानि, स्थापयित्वा निरोधविमोक्षम् ॥ ३६ ॥

निरोध उक्तः,

निरोधविमोक्षः पूर्वमेवोक्तः सर्वैः प्रकारैः ।

वैराग्यप्रयोगाप्तं तु शेषितम् ।

निरोधादन्यानि विमोक्षादीनि वैराग्यलाभिकानि प्रायोगिकाणि च; उचितानुचितत्वात् ।

त्रिधात्वाश्रयसारूप्यसंज्ञं शेषं मनुष्यजम् ॥ ३७ ॥

वायौ स्प्रष्टव्यायतनमित्येक इति । ये वायौ रूपायतनं नेच्छन्ति, ते आहुः—वायौ स्प्रष्टव्यायतनमालम्बनमिति ।

विमोक्षप्रावेशिकानीति । प्रवेशा एव प्रावेशिकानि—इति स्वार्थवृद्धिविधानात् । प्रवेशे भवानि वा । उत्तरोत्तरविशिष्टत्वादिति । यस्माद् विमोक्षेभ्य उत्तराणि अभिभ्वायतनानि विशिष्टानि, अभिभ्वायतनेभ्य उत्तराणि कृत्स्नायतनानि विशिष्टानीति, तदुक्तं भवति—विमोक्षान् उत्पाद्य अभिभ्वायतनानि उत्पादयति । अभिभ्वायतनान्युत्पाद्य कृत्स्नायतनान्युत्पादयतीति । स्थापयित्वा निरोधविमोक्षमिति । तस्यैकान्तेनार्यसान्तानिकत्वात् ॥ ३६ ॥

उचितानुचितत्वादिति । उचितानि वैराग्यलाभिकानि । अनुचितानि प्रायोगिकाणि । शेषमिति विस्तरः । किं पुनः शेषम् ? अवसान्यतो

---

१. वायोः—क० ।

आरूप्यविमोक्षा आरूप्यकृत्स्ने च त्रैधातुकाश्रयाणि। शेषं मनुष्याश्रयमेव; उपदेशसामर्थ्येनोत्पादनात् ॥ ३७ ॥

कथं रूपारूप्यधात्वोरारूप्यध्यानविशेषोत्पादनम्? त्रिभिः कारणैर्ध्यानारूप्यसमापत्तीनामुपपत्तिः, हेतुकर्मधर्मतावलैः। तत्र—

हेतुकर्मबलाद्धात्वोरारूप्योत्पादनं द्वयोः।

द्वयोः रूपारूप्यधात्वोरारूप्यसमापत्त्युत्पादनम्। हेतुबलाच्च, आसन्नाभीक्ष्णाभ्यासात्[1], कर्मबलाच्च ऊर्ध्वभूमिकस्यापरपर्यायवेदनीयस्य कर्मणः प्रत्युपस्थितविपाकत्वात्। नह्यधस्तादवीतरागेणोर्ध्वं शक्यमुपपत्तुमिति[2]।

विमोक्षा अभिभ्वायतनान्यष्टौ। कृत्स्नायतनान्यष्टौ। **एतन्मनुष्याश्रयमेव।** किं कारणम्? **उपदेशसामर्थ्येनोत्पादनात्।** अन्यत्र देवादिषूपदेशाभावात् ॥ ३७ ॥

कथं रूपारूप्यधात्वोरारूप्यध्यानविशेषोत्पादनमिति। आरूप्यधातौ रूपधातौ वा यस्यां भूमावुपपन्नः, तदूर्ध्वं यदारूप्यं ध्यानं च, तत् ततो विशिष्येत इत्यारूप्यध्यानविशेषः। तस्यारूप्यध्यानविशेषस्य कथमुपदेशमन्तरेण भवतीति? यतः शेषं मनुष्याश्रयमेव। उपदेशसामर्थ्येनोत्पादनादित्युक्तम्, अतोऽनेन सम्बन्धेन पृष्टम्—कथं रूपारूप्यधात्वोरिति विस्तरः। **हेतुबलाच्च आसन्नाभीक्ष्णाभ्यासाच्च।** आसन्नाभ्यासाद्, अभीक्ष्णाभ्यासाच्च। कथं कृत्वा? कश्चिद् आरूप्यसमापत्तिं समापद्य ततश्च परिहायनान्तरमेव रूपधातावुपपद्यते। आरूप्यसमापत्तिलक्षणस्य सभागहेतोर्बलीयस्त्वात् तस्य रूपधातौ आरूप्यसमापत्तिरुत्पत्स्यते। अभीक्ष्णाभ्यासादपि। यदि कश्चिद् आरूप्यसमापत्तिमभीक्ष्णं समापद्य, ततश्च परिहाय रूपधातौ उपपद्यते, तस्यारूप्यसमापत्तिलक्षणस्य सभागहेतोर्बलीयस्त्वाद् रूपधातौ आरूप्यसम्पत्तिरुत्पद्यते। एवं विज्ञानानन्त्यायतनसमापत्तेरपि परिहीणस्याकाशानन्त्यायतनोपपन्नस्य तथैव तत्समापत्तीनामुत्पादनम्। एवं तदूर्ध्वोपपन्नस्य।

कर्मबलाच्चेति। रूपधातावुपपन्नस्य **अपरपर्यायवेदनीयस्य कर्मणः प्रत्युपस्थितविपाकत्वात्।** तद्वैराग्यानुकूला सन्ततिरवतिष्ठते। न ह्यधस्ताद् अवीतरागेणोर्ध्वमारूप्यधातावशक्यमुपपत्तुमिति। एवमारूप्येषु आकाशा-

---

१. हेतुबलाद—का०। २. °मुत्पत्तु०—का०।

ध्यानानां रूपधातौ तु ताभ्यां धर्मतयापि च ॥ ३८ ॥

रूपधातौ ध्यानोत्पादनमेताभ्यां च[1] हेतुकर्मबलाभ्यां धर्मतयापि[2] च संवर्तनीकाले। तदानीं हि सर्वसत्त्वा एवावरभूमिकास्तद्ध्यानमुत्पादयन्ति; कुशलानां[3] धर्माणामुद्भूतवृत्तित्वात् ॥ ३८ ॥

कियच्चिरं पुनरयं सद्धर्मः स्थास्यति ? यत्रेमे ईदृशा[4] धर्माणां प्रकाराः प्रज्ञायन्ते ?

नन्त्यायतनोपपन्नस्य कर्मबलात्। ऊर्ध्वभूमिकस्य विज्ञानानन्त्यायतनभूमिकस्यापरपर्यायवेदनीयस्य कर्मणः प्रत्युपस्थितविपाकत्वात्। तद्वैराग्यानुकूला सन्ततिरवतिष्ठते। न ह्यधस्तादवीतरागेणोर्ध्वं शक्यमुपपत्तुमिति। एताभ्यां च हेतुकर्मबलाभ्याम्।

कथं प्रथमादिषु ध्यानेषु द्वितीयादिध्यानोत्पादनम् ? हेतुबलाच्च आसन्नाभीक्ष्णाभ्यासात्। कर्मबलाच्चोर्ध्वभूमिकस्येति विस्तरेण योज्यम्।

"धर्मतयापि च" इति। कथं धर्मता नाम ? केचित् तावत् सौत्रान्तिका आहुः—एषामेव धर्माणामुद्भूतवृत्तीनां पूर्वध्यानवासनाधिपत्यात् तदुत्पत्तौ उपदेशमन्तरेण ध्यानोत्पत्तावानुगुण्यं धर्मता, प्रकृतिः। स्वभावतेत्यर्थः।

वैभाषिका अपि केचिदाहुः—पूर्वजान्मनिकात् सभागहेतोः निष्यन्दफलं ध्यानोत्पादनम्, तदुपदेशमन्तरेण अन्यतो धर्मतेति।

कुशलानां धर्माणामुद्भूतवृत्तित्वादिति। तत्र संवर्तनीकाले कुशलानां कर्मपथानामित्यर्थः। वृत्तिस्तेषामेव धर्माणां यत् कारित्रम्। उद्भूता उत्कृष्टा वृत्तिरेषामित्युद्भूतवृत्तयः, तद्भावः, तस्मात्। एतदुक्तं भवति—तेषां कुशलानां प्रकर्षेणात्मलाभात् तदुत्पत्त्यानुगुण्येन आत्मलाभात् तदुपदेशमन्तरेणान्यतः पूर्वध्यानवासनायां सत्यां ध्यानोत्पत्तिरिति ॥ ३८ ॥

इमे ईदृशा धर्माणां प्रकारा इति। सास्रवानास्रवाणां धर्माणां धात्वभूम्यालम्बनाकारादिप्रकारा यथायोगमित्यर्थः।

---

१. का० पुस्तके नास्ति। २. धर्मतया—का०।
३. कुशलानां—का०।
४. ईदृशानां—का०।

सद्धर्मो द्विविधः शास्तुरागमाधिगमात्मकः ।

तत्रागमः सूत्रविनयाभिधर्माः, अधिगमो बोधिपक्ष्याः—इत्येष द्विविधः सद्धर्मः ।

धातारस्तस्य वक्तारः प्रतिपत्तार एव च ॥ ३९ ॥

आगमस्य हि धारयितारो वक्तारः । अधिगमस्य प्रतिपत्तारः । अतो यावदेते स्थास्यन्ति तावत् सद्धर्म इति वेदितव्यम् ।

तेषां तु वर्षसहस्रमवस्थानमाहुः ।

अधिगमस्यैवम् । आगमस्य तु भूयांसं कालमित्यपरे ॥ ३९ ॥

योऽयमिह शास्त्रेऽभिधर्म उक्तः किमेष एव शास्त्राऽभिधर्मो देशितः ?

काश्मीरवैभाषिकनीतिसिद्धः,
प्रायो मयाऽयं कथितोऽभिधर्मः ।

"धातारस्तस्य वक्तारः प्रतिपत्तार एव च" इति । तस्य आगमाधिगमात्मकस्य सद्धर्मस्य यथासंख्यं आगमस्य ये वक्तारः तेऽस्य धातारः, अधिगमस्य च ये प्रतिपत्तारः तेऽस्य धातार इति ।

अधिगमस्यैवमिति । वर्षसहस्रमवस्थानमिति । आगमस्य तु भूयांसं कालमिति । वर्षसहस्राद्ऊर्ध्वमपीत्यर्थः । एष एव पक्षो युक्त इति पश्यामः ॥ ३९ ॥

योऽयमिति । योऽयमिह अभिधर्मकोशलक्षणे अभिधर्म उक्तः । किमेष एव शास्त्राऽभि[1]धर्मो ज्ञानप्रस्थानादिलक्षणो देशितः । अत इदमुच्यते—

"काश्मीरवैभाषिकनीतिसिद्धः" इति विस्तरः । कश्मीरे भवाः काश्मीराः । विभाषया दीव्यन्ति वैभाषिकाः इति व्याख्यातमेतत् । सन्ति काश्मीरा न वैभाषिकाः, ये विनयविदादयः सौत्रान्तिकाः भदन्तादयः । सन्ति वैभाषिका न काश्मीराः, ये बहिर्देशका वैभाषिकाः—इत्युभयविशेषणम् । तेषां नीत्या यः सिद्धोऽभिधर्मः, स प्रायेणेह मया देशितः । अर्थादुक्तं भवति—अन्यनीतिसिद्धोऽपि देशित इति ।

---

१. शास्त्रो०—जा० ।

यद् दुर्गृहीतं तदिहास्मदागः,
सद्धर्मनीतौ मुनयः प्रमाणम् ॥ ४० ॥

प्रायेण हि काश्मीरवैभाषिकाणां [1]नीत्या सिद्ध एवोऽस्माभिरभिधर्म आख्यातः। यदत्रास्माभिर्दुर्गृहीतं सोऽस्माकमपराधः। सद्धर्मनीतौ तु पुनर्बुद्धा एव प्रमाणम्, बुद्धपुत्राश्च ॥ ४० ॥

निमीलिते शास्तरि लोकचक्षुषि
क्षयं गते साक्षिजने च भूयसा।
अदृष्टतत्त्वैर्निरवग्रहैः कृतं
कुतार्किकैः शासनमेतदाकुलम् ॥ ४१ ॥

गते हि[2] शान्तिं परमां स्वयम्भुवि
स्वयम्भुवः शासनधूर्धरेषु च।

यद् दुर्गृहीतमिति। काश्मीरवैभाषिकनयेन, अन्यनयेन वा। तदिह वचने अस्मदागः अस्मदपराधः। किं कारणम्? इत्याह—सद्धर्मनीतौ मुनयः प्रमाणमिति। सद्धर्मस्य आगमाधिगमलक्षणस्य नीतौ वर्णने मुनयो बुद्धा भगवन्तो बुद्धपुत्राश्च आर्यशारद्वतीपुत्रादयः प्रमाणम्। सर्वाकारसर्वधर्मविबोधे आप्ता इत्यर्थः ॥ ४० ॥

"निमीलिते शास्तरि लोकचक्षुषि" इति। परिनिर्वृते भगवति लोकस्य चक्षुर्भूते मार्गामार्गसन्दर्शके। अनेनान्धभूततां लोकस्य दर्शयति।

"क्षयं गते साक्षिजने च भूयसा" इति। साक्षाद् द्रष्टरि। साक्षी मार्गामार्गज्ञो भगवान् इति योऽधिगततत्त्वो भगवतः साक्षिजनः सहायभूतः, तस्मिन् परिनिर्वाणे क्षीणे।

अविद्यान्धेन अदृष्टतत्त्वैर्निरवग्रहैः निरङ्कुशैः कुतर्कपिन्नैर्भवद्भिर्भगवतः शासनं ग्रन्थतश्चार्थतश्च आकुलं कृतम् ॥ ४१ ॥

"गते हि शान्तिं परमां स्वयम्भुवि" इत्यादि। पूर्वश्लोकोक्तस्यार्थस्य हेतुरूपोऽयं द्वितीयः श्लोक उपन्यस्यते। बुद्ध-बुद्धपुत्रेषु हि परिनिर्वृतेषु अनार्ये

---

१. नीत्यादि—ता०। २. गतेऽत्र—ता०।

जगत्यनाथे गणघातिभिर्मलैः,
निरङ्कुशं[1] स्वैरमिहाद्य चर्यते ॥ ४२ ॥

एवं[2] कण्ठगतप्राणं विदित्वा शासनं मुनेः ।
बलकालं मलानां च न प्रमाद्यं मुमुक्षुभिः ॥ ४३ ॥

इति अभिधर्मकोशभाष्ये
समापत्तिनिर्देशो नामाष्टमकोशस्थानम्

जगति शासनान्तर्धानहेतुभिः । दृष्ट्यादिभि**र्मलैः** दोषै**र्निरंकुशं स्वैरं** यथेच्छ**मिह** लोके **अद्य** सम्प्रति **चर्यते** । भावसाधनमेतत् ॥ ४२ ॥

ततश्च **एवं कण्ठगतं प्राणम्** । कण्ठगतप्राणमिवेत्यर्थः । तद् **विदित्वा। बलकालं च मलानां** दोषाणां विदित्वा न **प्रमाद्यं मुमुक्षुभि**रिति । भावसाधनमिति ॥ ४३ ॥

आचार्यराजपुत्रयशोमित्रकृतौ
स्फुटार्थायां नामाभिधर्मकोशव्याख्यायां
समापत्तिनिर्देशो नामाष्टमं कोशस्थानम्

❀ ॐ नमो बुद्धाय ❀

पुद्गलविनिश्चयः

किं खल्वतोऽन्यत्र मोक्षो नास्ति ? नास्ति । किं कारणम् ? वितथात्मदृष्टिनिविष्टत्वात् । नहि ते स्कन्धसन्तान एवात्मप्रज्ञप्तिं व्यवस्यन्ति । किं तर्हि ? द्रव्यान्तरमेवात्मानं परिकल्पयन्ति, आत्मग्राहप्रभवाश्च क्लेशा[1] इति ।

कथं पुनरिदं गम्यते—स्कन्धसन्तान एवेदमात्माभिधानं वर्तते, नान्यस्मिन्नभिधेये इति ?

पुद्गलविनिश्चयः

किं खल्वतोऽन्यत्र मोक्षो नास्तीति । 'न प्रमाद्यं मुमुक्षुभिः' (अभि० ८.४३) इति वचनात् अयमेव मोक्षोपायः, नास्त्यतोऽन्यो मोक्षोपायः । तदत्र मोक्षकामैः प्रमादो न कर्तव्य इत्यर्थादुक्तमाचार्येण । चोदकः पृच्छति—किं खल्वत इति विस्तरः । अत्रोच्यते—नास्तीति । किं कारणम् ? इत्याह—वितथात्मदृष्टिनिविष्टत्वादिति । वितथायामात्मदृष्टौ निविष्टाः कुतीर्थ्याः वितथात्मदृष्टिनिविष्टाः, तद्भावः, तस्मात् । नास्त्यन्यत्र मोक्ष इति ।

स्तोत्रकारेणाप्येषोऽर्थ उक्तः—

"साहङ्कारे मनसि न शमं याति जन्मप्रबन्धो
नाहङ्कारश्चलति हृदयादात्मदृष्टौ च सत्याम् ।
अन्यः शास्ता जगति च यतो नास्ति नैरात्म्यवादी
नान्यस्तस्मादुपशमविधेस्त्वन्मतादस्ति मार्गः" ॥ इति ।

साधनं चात्र—"नास्ति कपिलोलूकादीनां मोक्षः, वितथात्मदृष्टिनिविष्टत्वात्, अदृष्टतत्त्वपुरुषवत् ।" आत्मग्राहप्रभवाश्च क्लेशा इति यदुक्तम् । यानि चा पुनरिहैकत्यानां श्रमणब्राह्मणानां पृथग्लोके दृष्टिगतानि सत्कायदृष्टिमूलकानि तानीति विस्तरः । सत्कायदृष्टौ च सत्यामात्मस्नेहादयः क्लेशाः प्रवर्तन्ते । स्कन्धसन्तान एवेदमात्माभिधानमिति । आत्मेत्यभिधानम् । आत्मप्रज्ञप्तिरित्यर्थः । नान्यस्मिन्नभिधेय इति । स्कन्ध-

प्रत्यक्षानुमानाभावात् ।

ये हि धर्माः सन्ति तेषां प्रत्यक्षमुपलब्धिर्भवत्यसत्यन्तराये । तद्यथा—षण्णां विषयाणां मनसश्च ।

अनुमानं च । तद्यथा पञ्चानामिन्द्रियाणाम् । तत्रेदमनुमानम्—सति कारणे कारणान्तरस्याभावे कार्यस्याभावो दृष्टो भावे च पुनर्भवः, तद्यथा—अङ्कुरस्य । सत्येव वाभासप्राप्ते[२] विषये मनस्कारे च कारणे विषय-ग्रहणस्याभावो दृष्टः पुनश्च भावः, अन्धबधिरादीनामनन्धाबधिरादीनां च ।

सन्तानव्यतिरिक्ते कल्पित इत्यर्थः । कस्मादेवम् ? इत्याह—**प्रत्यक्षानु-मानाभावादिति** । प्रत्यक्षस्यानुमानस्य चाभावान्न तस्यास्तित्वमित्यभि-प्रायः । आगमस्यानुमानान्तर्भावात् अपृथग्वचनम् ।

तेषां प्रत्यक्षमुपलब्धिरिति । प्रत्यक्षमित्युपलब्धिविशेषणम् । प्रत्यक्षं तदुपलब्धिः, प्रत्यक्षत उपलब्धिरित्यर्थः । अथवा प्रत्यक्षं प्रमाणमुपलब्धिः, उपलभ्यतेऽनयेत्युपलब्धिः । **असत्यन्तराय** इति । असत्युपलब्धिविघ्नेऽ-तिसन्निकर्षातिविप्रकर्षादिके । तेषाम् । **षण्णां विषयाणामिति** । रूप-शब्द-गन्ध-रस-स्प्रष्टव्यायतनानां धर्मायतनस्य च वेदनादिलक्षणस्य योगिविषयस्य चागमविकल्पातीतस्येति । **मनसश्च** । किम् ? प्रत्यक्षम् उपलब्धिः । समनन्तर-निरुद्धं हि मनोऽनन्तरोपपन्नेन मनोविज्ञानेन विज्ञायते । रक्तं वा द्विष्टं वा सुखसम्प्रयुक्तं वा दुःखसम्प्रयुक्तं वा—इत्येवमादि स्वसंवेद्यतयेत्यपरे । तदेतद् द्विविधं प्रत्यक्षम्—१. ग्राह्यगतम्, २. ग्राहकगतं चेति ।

अनुमानं चेति विस्तरः । यत्र प्रत्यक्षस्याप्रवृत्तिः तत्रानु-मानतस्तदुपलब्धिः । **तद्यथा पञ्चानामिन्द्रियाणामिति** । चक्षुरिन्द्रिया-दीनाम् । **सति कारणे** क्षेत्रोदकादिके । **कारणान्तरस्य** बीजलक्षण-स्याभावे **कार्यस्याङ्कुराख्यस्याभावो दृष्टः** । **भावे** च तस्य बीजस्य **पुनर्भवोऽङ्कुरस्य दृष्टः** । **तद्यथाऽङ्कुरस्येति** दृष्टान्तोपन्यासः । एवं दृष्टान्तमुपन्यस्य दार्ष्टान्तिकमुपदर्शयन्नाह—सत्येव वाभासप्राप्त इति विस्तरः । विद्यमान एव सम्मुखीप्राप्ते **विषये** रूपादिके **मनस्कारे** च तज्जे **कारणे** । **विषयग्रहणस्य** चक्षुरादिविज्ञानस्याभावो दृष्टः, पुनश्च भावः । केषामिति ? यथासङ्ख्यं दर्शयति—**अन्धबधिरादीनामभावः** । **अनन्धाबधिरादीनां च भाव** इति । आदि-शब्देनोपहतानुपहतघ्राणेन्द्रिया-

---

१. सर्वक्लेशाः—का० ।

२. चा०—का० ।

अतस्तत्रापि कारणान्तरस्याभावो भावश्च निश्चीयते। यच्च तत्कारणान्तरं तदिन्द्रियमित्येतदनुमानम्। न चैवमात्मतोऽस्तीति[1] नास्त्यात्मा।

यत्तर्हि **वात्सीपुत्रीयाः** पुद्गलं सन्तमिच्छन्ति।

विचार्यं तावदेतत्—किं ते द्रव्यत इच्छन्ति, आहोस्वित् प्रज्ञप्तितः ?

दीनां ग्रहणम्। **अतस्तत्रापि कारणान्तरस्य** कस्यापि अनिर्भिन्नरूपस्याभावो **भावश्च** यथासङ्ख्यमेव **निश्चीयते**। किं पुनस्तद् ? इत्याह—**यच्च तत्कारणान्तरमपेक्ष्यते तदिन्द्रियम्**। चक्षुरादिकमित्यभिप्रायः। साधनं चात्र—"कारणान्तरसहितः स्वकार्यजनकः पञ्चविज्ञानकायजनकसम्मतो विषयमनस्कारलक्षणो भावः; कदाचिदेव स्वकार्यनिर्वर्तकत्वात्। कदाचिदेव स्वकार्यनिर्वर्तकं तत् कारणान्तरसहितस्वकार्यजनकम्, तद्यथा—अङ्कुरजनकं क्षेत्रोदकम्। बीजलक्षणकारणान्तरसहितस्वकार्यान्तरजनकं हि क्षेत्रोदकं कदाचिदेव स्वकार्यनिर्वर्तकम्, बीजसद्भावावस्थायामङ्कुरनिर्वर्तकत्वात्। बीजासद्भावावस्थायां च स्वस्वकार्याजनकत्वात्। तथा च स विषयमनस्कारलक्षणो भावः। स हि अनन्धावधिराद्यवस्थायां तस्य पञ्चविज्ञानकायलक्षणस्य स्वकार्यस्य जनको भवति, अन्धवधिराद्यवस्थायां चाजनकः। तस्मादसौ कारणान्तरसहितः स्वकार्यजनकः" इति। **तदिन्द्रियमिति**। कथं तदिन्द्रियमिति परिच्छिद्यते; कारणान्तरमस्तीत्येतावदेव हि परिच्छिद्यते, न तु तदिन्द्रियमिति ? सिद्धमेवैतत्। महर्षिप्रणिधिज्ञानपरिच्छिन्नत्वादस्त्येव चक्षुरिन्द्रियमिन्द्रियं चक्षुर्विज्ञानादिकारणमिति। सर्वेषामविवादाच्च। **न चैवमात्मतोऽस्तीति नास्त्यात्मेति** निगमयति। उक्तं ह्येवमर्थतः साधनम्—'नास्त्यात्मा, प्रमाणेनानुपलभ्यमानत्वात्, अत्यन्ताभाववद्' इति। अस्त्यनुमानम्, अतोऽसिद्धो हेतुरिति चेत् ? न; यदि हि तदस्ति, तदुच्यताम् ! न वाङ्मात्रेण असिद्धो हेतुः—इति प्रत्यवस्थातव्यमिति।

यत्तर्हि वात्सीपुत्रीया इति विस्तरः। वात्सीपुत्रीया **आर्यसाम्मतीयाः**। अनेन वितथात्मदृष्टिनिविष्टलक्षणो हेतुरनैकान्तिक इति दर्शयति। न हि वात्सीपुत्रीयाणां मोक्षो नेष्यते, बौद्धत्वात्। अथ वा परपक्षविरोधसापक्षालोऽयं पक्षो नास्त्यात्मेत्यनेन दर्शयति। स्वपक्षो वात्सीपुत्रीयो निकाय इति।

विचार्यं तावदेतदिति। तन्निकाये प्रज्ञप्तिसत्पुद्गल इत्यदोष एष इत्यभिप्रायः।

---

१. आत्मनो०—का०।

किं वेदं[1] द्रव्यत इति ? किं वा प्रज्ञप्तितः ? रूपादिवत् भावान्तरं चेत्, द्रव्यतः। क्षीरादिवत् समुदायश्चेत्, प्रज्ञप्तितः।

किं चातः ? यदि तावत् द्रव्यतः ? भिन्नस्वभावत्वात्[2] स्कन्धेभ्योऽन्यो वक्तव्यः, इतरेतरस्कन्धवत्। कारणं चास्य वक्तव्यम्। असंस्कृतो वा। अतस्तीर्थिकदृष्टिप्रसङ्गो निष्प्रयोजनत्वं च। अथ प्रज्ञप्तितः ? वयमप्येवं ब्रूमः।

नैव हि द्रव्यतोऽस्ति, नापि प्रज्ञप्तितः। किं तर्हि ? आध्यात्मिकानुपात्तान् वर्त्तमानान् स्कन्धानुपादाय पुद्गलः प्रज्ञप्यते। तदिदमन्धवचनमनुन्मीलितार्थं न बुध्यामहे।

किं वेदं द्रव्यत इति **किं वा प्रज्ञप्तित** इति चोदित **आचार्य** आह—**रूपादिवद् भावान्तरं चेद् द्रव्यतः।** यदि यथा रूपादिः शब्दादेर्भावान्तरमभिप्रेयते, द्रव्यतः पुद्गल इत्युपगतो भवति। भिन्नलक्षणं रूपं शब्दात् इत्यादि। **क्षीरादिवत् समुदायश्चेत् प्रज्ञप्तितः।** यथा क्षीर-गृह-सेनादिकम् रूपरसगन्धस्प्रष्टव्येभ्यः, तृणकाष्ठेषिकादिभ्यः, हस्त्यश्वरथादिभ्यश्च न भावान्तरमिष्यते, किं तर्हि ? तेषामेव समुदायमात्रमित्येवं चेत्; प्रज्ञप्तितः पुद्गल इत्येवमुपगतो भवति। न हि रूपादिभ्यः, तृणादिभ्यः, हस्त्यश्वादिभ्यो वा क्षीर-गृह-सेनेति वा कश्चिद् भावोऽस्ति।

किं चातः। कश्चातो दोष इत्यभिप्रायः।

यदि तावद् द्रव्यत इति पक्ष आश्रीयते, स पुद्गलो **भिन्नस्वभावत्वात्** भिन्नस्वलक्षणत्वात् **स्कन्धेभ्योऽन्यो वक्तव्यः।** न स्कन्धसमुदायमात्रः। **इतरेतरस्कन्धवत्।** यथा रूपादिस्कन्धात् वेदनादिस्कन्धोऽन्यो भिन्नलक्षणत्वात्; एवं स्कन्धेभ्यः पुद्गल स्यात्; अरूपस्कन्धादिलक्षणत्वात् पुद्गलस्य। **कारणं चास्य वक्तव्यम्।** यदि संस्कृत इत्यभिप्रायः। **असंस्कृतो वा।** अतोऽसंस्कृतत्वात् वात्सीपुत्रीयाणां तीर्थिकदृष्टिः प्रसज्यते। **निष्प्रयोजनत्वं चेति।**

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत् सोऽनित्यः, खतुल्यश्चेदसत् फलम्॥

इत्यर्थः।

इदमन्धवचनमनुन्मीलितार्थमिति। अन्धमिवान्धम्। कस्मात् ?

---

१. चेदं—का०। २. संभिन्न०—का०।

किमिदमुपादायेति ? यद्ययमर्थः—स्कन्धानालम्ब्येति[1]; तेष्वेव पुद्गल-प्रज्ञप्तिः प्राप्नोति। यथा रूपादीनालम्ब्य तेष्वेव क्षीरप्रज्ञप्तिः। अथायमर्थः—स्कन्धान् प्रतीत्येति; स्कन्धानां पुद्गलप्रज्ञप्तिकारणत्वात् ? स एव दोषः; न स एवं प्रज्ञप्यते। कथं तर्हि ? यथेन्धनमुपादायाग्निः।

कथं चेन्धनमुपादायाग्निः प्रज्ञप्यते ? न हि विनेन्धनेनाग्निः प्रज्ञप्यते, न चान्य इन्धनादग्निः शक्यते प्रज्ञपयितुम्, नाप्यनन्यः। यदि ह्यन्यः स्याद्, अनुष्णमिन्धनं स्यात्। अथानन्यः स्यात्, दाह्यमेव दाहकं स्यात्।

एवं न च विना स्कन्धैः पुद्गलः प्रज्ञप्यते। न चान्यः स्कन्धेभ्यः शक्यते प्रतिज्ञातुम्; शाश्वतप्रसङ्गात्। नाप्यनन्यः; उच्छेदप्रसङ्गादिति।

अङ्ग तावद् ब्रूहि—किमिन्धनम्, कोऽग्निरिति ? ततो ज्ञास्यामः—कथ-मिन्धनमुपादायाग्निः प्रज्ञप्यत इति। किमत्र वक्तव्यम् ! दाह्यमिन्धनम्, दाह-कोऽग्निः। एतदेवात्र वक्तव्यम्—किं दाह्यम् ? को दाहक इति ? लोके हि तावदप्रदीप्तं काष्ठादिकमिन्धनमुच्यते, दाह्यं च। प्रदीप्तमग्निर्दाहकश्च। यच्च भास्वरं चोष्णं च, भृशं च, तेन हि तदिध्यते दह्यते चः सन्ततिविकारा-

---

यस्मादनुन्मीलितार्थम्। अव्यञ्जितार्थमित्यर्थः। **स्कन्धानालम्ब्येति**। गृहीत्वेत्यर्थः। **यथा रूपादीन् गृहीत्वा** अपेक्ष्य **क्षीरप्रज्ञप्तिः**। न रूपादि-व्यतिरिक्तं क्षीरमस्तीति। **यदि तथा**। पुद्गल इति प्रज्ञप्तिः, असत्पुद्गल प्राप्नोतीत्यर्थः। **स्कन्धान् प्रतीत्येति**। यदि स्कन्धान् प्रतीत्य प्राप्य इति। **स एव दोषः**। तेष्वेव स्कन्धादिषु पुद्गलप्रज्ञप्तिः प्राप्नोतीत्यर्थः। अथ वा—पुद्गलप्रज्ञप्तेः स्कन्धाः प्रत्ययो न पुद्गलः। पुद्गलस्तु तथैव प्रज्ञप्तिसन्निति स एव दोषः।

यथेन्धनमुपादायाग्निः। प्रज्ञप्यत इति। द्रव्यसन् पुद्गलः। **नान्यो नानन्य** इति। स्वमुपादानमुपादाय प्रज्ञप्यमानत्वात्। यो हि भावो नान्यो नानन्य इति स्वमुपादाय प्रज्ञप्यमानः, स द्रव्यसन्; तद्यथा—अग्निः। इति **वात्सीपुत्रीयाभिप्रायः**। अत एव चाह—**यदि ह्यन्यः स्यादिति** विस्तरेण। लोकविरोधं स्वसिद्धान्तविरोधं वा दर्शयति।

शाश्वतप्रसङ्गादिति। असंस्कृतत्वात्। **उच्छेदप्रसङ्गादिति**। स्कन्धवत्।

अप्रदीप्तं काष्ठादिकमिन्धनमिति विस्तरः। अनेनासिद्धतां दृष्टान्तस्य दर्शयति। अन्यत्वमेव हि अग्नीन्धनयोरिष्यते। **तेन हि तदिध्यते दह्यते चेति**। तेन अग्निना। तदिन्धनम्। इध्यते दीप्यत इत्यर्थः। दह्यते

---

१. स्कन्धानां लक्ष्यते—का०।

पादानात् । तच्चोभयमष्टद्रव्यकं तच्चेन्धनं प्रतीत्याग्निरुत्पद्यते । यथा क्षीरं प्रतीत्य दधि, मधु प्रतीत्य शुक्तम् । तस्मादिन्धनमुपादायेत्युच्यते । अन्यश्च सः; तस्माद्भिन्नकालत्वात् ।

यदि चैवं पुद्गलः स्कन्धान् प्रतीत्योत्पद्यते, स तेभ्योऽन्यश्चानित्यश्च प्राप्नोति । अथ पुनस्तत्रैव काष्ठादौ प्रदीप्ते यदौष्ण्यं तदग्निः, तत्सहजातानि त्रीणि भूतानीन्धनमिष्यन्ते । तयोरपि सिद्धमन्यत्वम्; लक्षणभेदात् ।

उपादायार्थस्तु वक्तव्यः—कथं तदिन्धनमुपादाय सोऽग्निः प्रज्ञप्तः इति ? न हि तत्तस्य कारणम्, नापि तत् प्रज्ञप्तेः । अग्निरेव हि तत्प्रज्ञप्तेः कारणम् । यद्याश्रयार्थः; उपादायार्थः सहभावोऽर्थो[1] वा । स्कन्धा अप्येवं पुद्गलस्याश्रयसहभूताः प्राप्नुवन्तीति स्कन्धतः स्पष्टमन्यत्वं[2] प्रतिज्ञायते । तदभावे च पुद्गलाभावः प्राप्नोति । इन्धनाभाव इवाग्न्यभावः ।

भस्मीक्रियते । **सन्ततिविकारापादानात्** । भस्मतापादानादित्यर्थः । इध्यते दह्यते चेति पर्यायावित्यपरे । **तच्चोभयमष्टद्रव्यकमिति** । इन्धनं चाग्निश्चैतदुभयमप्यष्टद्रव्यकम्—चत्वारि महाभूतानि चत्वारि चोपादायरूपाणि रूपम् यावत् स्प्रष्टव्यमिति; "कामेऽष्टद्रव्यकोऽशब्दः" (अभि० को० २.२३) इति सिद्धान्तात् ।

भिन्नकालत्वादिति । पूर्वमिन्धनम्, पश्चादग्निः । भिन्नकालयोश्चान्यत्वं दृष्टं वीजाङ्कुरयोः । **अनित्यश्च प्राप्नोतीति** । उत्पत्तिमतो रूपादेरनित्यत्वदर्शनात् । **तत्रैव काष्ठादौ प्रदीप्त** इति । तदुभयलक्षणे समुदये । **तयोरपि सिद्धमन्यत्वम्, लक्षणभेदादिति** । तयोरपि अग्नीन्धनयोरेवंलक्षणयोः सिद्धमन्यत्वम्; लक्षणभेदात् । पृथिवीधात्वादीनां लक्षणान्यत्वात् । भिन्नलक्षणानां ह्यन्यत्वं दृष्टं रूप-वेदनादीनाम् ।

उपादायार्थस्तु वक्तव्य इति । अनन्यत्वादित्यभिप्रायः । **न हि तत् तस्य कारणमिति** । न हि तदिन्धनं भूतत्रयलक्षणं तस्योष्णलक्षणस्याग्नेः कारणं युज्यते; सहजातत्वात् । सव्येतरगोविषाणवत् । **नापि तत्प्रज्ञप्तेरिति** । अग्नि-तत्प्रज्ञप्तेः । **यदचाश्रयार्थ इति** । इन्धनमुपादाय=इन्धनमाश्रित्येत्यर्थः । **सहभावोऽर्थो वेति** । सहोत्पादार्थः । इन्धनं सहभूत्वेनागृह्येत्यर्थः । **आश्रयसहभूताः प्राप्नुवन्तीति** । आश्रयभूताः, सहभूताश्च प्राप्नुवन्तीत्यर्थः । **स्कन्धतः स्पष्टमन्यत्वं प्रतिज्ञायते वात्सीपुत्रीयैः** । **तदभाव इति** । स्कन्धाभावे ।

---

१. सहनावार्थो—का० । २. विस्पष्टम०—का० ।

यत्तु तदुक्तम्—यदोन्धनादन्योऽग्निः स्याद्, अनुष्णमिन्धनं स्यादिति । किमिदमुष्णं नाम ? यदि तावदौष्ण्यम्, अनुष्णमेवेन्धनम्; अन्यभूतस्वभावत्वात् । अथ यदौष्ण्यवत्, अन्यदपि तदुष्णस्वभावादग्नेरुष्णं सिध्यति; औष्ण्ययोगादिति । नास्त्यन्यत्वे दोषः । अथ पुनः सर्वमेव तत् प्रदीप्तं काष्ठादिकमिन्धनं चाग्निश्चेष्यते ।

तदुपादायाथश्च वक्तव्यः । स्कन्धा एव च पुद्गला इत्यनन्यत्वमनिवार्यं प्राप्नोति । तस्मान्न सिध्यत्येतत्—यथेन्धनमुपादायाग्निः प्रज्ञप्यते एवं स्कन्धानुपादाय पुद्गल इति । यदि चायमन्यः स्कन्धेभ्यो न वक्तव्यः, "पञ्चविधं ज्ञेयमतीतानागतं प्रत्युपन्नमसंस्कृतमवक्तव्यम्" ( ) इति न वक्तव्यं प्राप्नोति । नैव हि तदतीतादिभ्यः पञ्चमं नापञ्चमं वक्तव्यम् ।

यदा च पुद्गलः प्रज्ञप्यते, किं तावत् स्कन्धानुपलभ्य प्रज्ञप्यते ? आहोस्वित् पुद्गलम् ? यदि तावत् स्कन्धान्, तेष्वेव पुद्गलप्रज्ञप्तिः प्राप्नोति; पुद्गलस्यानुपलम्भात् । अथ पुद्गलम् ? कथमस्य स्कन्धानुपादाय प्रज्ञप्तिर्भवति । पुद्गल एव हि तस्या उपादानं प्राप्नोति ।

अथ मतम्—सत्सु स्कन्धेषु पुद्गल उपलभ्यते, ततः स्कन्धानुपादायास्य प्रज्ञप्तिरुच्यत इति ? तदेवं रूपस्यापि चक्षुर्मनस्कारालोकेषु सत्सूपलम्भात् तान्युपादाय प्रज्ञप्तिर्वक्तव्या । रूपवच्च पुद्गलस्यान्यत्वं स्पष्टम् ।

इदं तावद् वक्तव्यम्—षण्णां विज्ञानानां कतमेन पुद्गलो विज्ञेयः ? षड्भिरपीत्युच्यते । कथं कृत्वा ? चक्षुर्विज्ञेयानि चेद्रूपाणि प्रतीत्य पुद्गलं

अन्यभूतस्वभावत्वादिति । पृथ्वीधात्वादिस्वभावत्वात् । **अन्यदपीति** । न केवलमौष्ण्यमुष्णम्, अन्यदपि तत्प्रदीप्ताग्निसम्बन्धं भूम्यादिकमुष्णं सिद्धयति । अतो यथा **तस्यान्यत्वे न दोषः**, तथास्यापीति । ततश्चावक्तव्य इति । तत्पक्षलोपः स्यात् । **काष्ठादिकमिति** । काष्ठतृणगोमयादिकम् ।

अवक्तव्यमिति । पुद्गलः । अनिर्भिन्नत्वान्नपुंसकलिङ्गता । 'किं ते जातम्' इति यथा । **न वक्तव्यं प्राप्नोतीति** । **पञ्चविधं ज्ञेयमिति** । कथं तर्हि वक्तव्यम् ? इत्याह—**नैव हि तदतीतादिभ्यः पञ्चमं नापञ्चमं वक्तव्यमिति** ।

रूपस्यापीति । विस्तरः । रूपस्यापि प्रज्ञप्तिर्वक्तव्या । **चक्षुरादिषु सत्सु तस्योपलम्भात् तानि** चक्षुरादीन्**युपादाय रूपं प्रज्ञप्यत** इति ।

प्रतिविभावयतीति । उपलक्षयति । तदुपादानत्वात् । **न तु वक्तव्यो**

प्रतिविभावयति[1], चक्षुर्विज्ञेयः पुद्गलो वक्तव्यः, नो तु वक्तव्यः—रूपाणि वा नो वा। एवं यावत्, मनोविज्ञेयान् चेद्धर्मान् प्रतीत्य पुद्गलं प्रतिविभावयति, मनोविज्ञेयः पुद्गलो वक्तव्यः, नो तु वक्तव्यः—धर्मा वा नो वा।

एवं तर्हि क्षीरादिभिः समानः प्राप्नोति। चक्षुर्विज्ञेयानि चेद्रूपाणि प्रतीत्य क्षीरं प्रतिविभावयत्युदकं[2] च[3], चक्षुर्विज्ञेयं क्षीरमुदकं चेति वक्तव्यम्, नो तु वक्तव्यम्—रूपाणि वा नो वा। एवं घ्राणजिह्वाकायविज्ञेयं वक्तव्यम्, नो तु वक्तव्यम्—स्प्रष्टव्यानि वा नो वा। मा भूत् क्षीरोदकयोश्चतुष्ट्वप्रसङ्ग इति ?

अतो यथा रूपादीन्येव क्षीरमुदकं वा प्रज्ञप्यते समस्तानि, एवं स्कन्धाः पुद्गल इति सिद्धम्।

यच्चोच्यते—चक्षुर्विज्ञेयानि रूपाणि प्रतीत्य पुद्गलं प्रतिविभावयतीति, कोऽस्य वाक्यस्यार्थः ? किं तावद्रूपाणि पुद्गलोपलब्धेः कारणं भवतीति ? आहोस्विद् रूपाण्युपलभमानः पुद्गलमुपलभत इति ? यदि रूपाणि रूपाणि वा नो वेति। अतल्लक्षणत्वात्, अवक्तव्यत्वाच्च। एवं यावद् धर्मो वा नो वेति।

क्षीरं प्रतिविभावत्युदकं चेति। उदाहरणद्वयम्। तदेवं वक्तव्यम्—चक्षुर्विज्ञेयानि चेद् रूपाणि प्रतीत्य क्षीरं प्रतिभावयति, चक्षुर्विज्ञेयं क्षीरं वक्तव्यम्। नो तु वक्तव्यम्—रूपाणि वा नो वेति सर्वम्। तथैतदपि वक्तव्यम्—चक्षुर्विज्ञेयानि चेद् रूपाणि प्रतीत्योदकं प्रतिविभावयति, चक्षुर्विज्ञेयमुदकं वक्तव्यम्। नो तु वक्तव्यम्—रूपाणि वा नो वेति सर्वम्। मा भूत् क्षीरोदकयोः चतुष्ट्वप्रसङ्ग इति। रूपाणीति यद्युच्येत, चतुःप्रकारं क्षीरम्, उदकं वा प्राप्नोतीत्यर्थः। शब्द आगन्तुकत्वान्नात्राधिकृतः। अतो यथा रूपादीन्येव समस्तानि समुदितानि क्षीरमिति उदकमिति वा प्रज्ञप्यते तथा स्कन्धा एव समस्ताः पुद्गल इति प्रज्ञप्यन्त इति सिद्धम्।

रूपाणि पुद्गलोपलब्धेः कारणमिति। रूपाण्युपलभमानः पुद्गलमुपलभत इति। कोऽनयोः पक्षयोर्विशेषः ? पूर्वस्मिन् पक्षे रूपाणां कारणत्वमधिक्रियते; द्वितीये न तु कारणत्वम्, किं तर्हि ? रूपाण्युपादाय पुद्गलोपलब्धिरिति। तत्र रूपाणां यदि कारणत्वमिष्यते, स च पुद्गलः तेभ्यो

१. प्रतिनावयति—का०। २. विभावयत्यु०—का०। ३. वा—का०।

पुद्गलोपलब्धेः कारणं भवन्ति स च तेभ्योऽन्यो न वक्तव्यः । इदं तर्हि रूपमप्यालोकचक्षुर्मनस्कारेभ्योऽन्यन्न वक्तव्यम्; तेषां तदुपलब्धिकारणत्वात् ।

अथ रूपाण्युपलभमानः पुद्गलमुपलभते, किं तयैवोपलब्ध्योपलभते ? आहोस्विदन्यया ? यदि तयैव, रूपादभिन्नस्वभावः पुद्गलः प्राप्नोति, रूप एव वा तत्प्रज्ञप्तिः । इदं च रूपमयं पुद्गल इति[1] कथमिदं परिच्छिद्यते[2] ! अथैवं न परिच्छिद्यते, कथमिदं प्रतिज्ञायते—रूपमप्यस्ति पुद्गलोऽप्यस्तीति ! उपलब्धिवशेन हि तस्यास्तित्वं परिज्ञायते[3] । एवं यावद्धर्मेभ्यो वक्तव्यम् ।

अथान्यया ? भिन्नकालोपलम्भादन्यो रूपात् प्राप्नोति । नीलादिव

रूपेभ्योऽन्यो न वक्तव्य इति । **इदं तर्हि** वः प्रसज्यते रूपमपीति विस्तरः । यथा रूपाणि पुद्लोपब्धेः कारणं भवन्ति स च तेभ्योऽन्यो न वक्तव्यः । **आलोकचक्षुर्मनसिकारा** अपि रूपोपलब्धेः कारणं भवन्ति, **तदपि** रूपं **तेभ्य** आलोकादिभ्यो **ऽन्यन्न वक्तव्यं** भवद्भिः; **तेषां तदुपलब्धिकारणत्वात् ।** तेषामालोकादीनां रूपोपलब्धिकारणत्वात् । **रूपादभिन्नस्वभावः पुद्गलः प्राप्नोति;** तयैवैकयोपलब्ध्योपलभ्यमानत्वात्, रूपान्तरवत् ।

रूप एव वा तत्प्रज्ञप्तिः । पुद्गलप्रज्ञप्तिः प्राप्नोतीति वर्तते । कुतः ? तत एव हेतोः । **इदं च रूपमिति** विस्तरः । उपलब्धेरेकत्वे रूपपुद्गलयोः परिच्छेदो न प्राप्नोतीति । **अथैवं न परिच्छद्यते** 'इदं रूपम्' 'अयं पुद्गलः' इति । **कथमुभयं प्रतिज्ञायते** । रूपमेव हि प्रतिज्ञातव्यं स्यात्, तदुपलब्धिसद्भावात् । **एवं यावद् धर्मेभ्यो वक्तव्यमिति** । कथम् ? यच्चोच्यते—श्रोत्रविज्ञेयान् शब्दान् प्रतीत्य पुद्गलं प्रतिविभावयतीति, कोऽस्य वाक्यस्यार्थः ? किं तावच्छब्दाः पुद्गलोपलब्धेः कारणं भवन्ति, आहोस्विच्छब्दानुपलभमानः पुद्गलमुपलभते इति ? यदि तावच्छब्दाः पुद्गलोपलब्धेः कारणं भवन्ति, स च तेभ्योऽन्यो न वक्तव्यः । एवं तर्हि शब्दोऽप्यालोकश्रोत्रमनस्कारेभ्योऽन्यो न वक्तव्यः; तेषां तदुपलब्धिकारणत्वात् । अथ शब्दानुपलभमानः पुद्गलमुपलभते, किं तयैवोपलब्ध्योपलभते, आहोस्विदन्यया ? यदि तयैव, शब्दादभिन्नस्वभावः पुद्गलः प्राप्नोति । शब्दा एव वा तत्प्रज्ञप्तिः । 'अयं च शब्दः', 'अयं च पुद्गलः' इति कथमिदं परिच्छिद्यते ! अथैवं न परिच्छिद्यते. कथमिदं परिज्ञायते—शब्दोऽप्यस्ति, पुद्गलोऽप्यस्ति । उपलब्धिवशेन हि तस्यास्तित्वं परिज्ञायते । अनया दिशा यावद् धर्मेभ्यो योजयितव्यम् ।

---

१. का० पुस्तके नास्ति । २. गम्यते—का० ।
३. प्रतिज्ञायते—का० ।

पीतम्, क्षणादिव च क्षणान्तरम् । एवं यावद्धर्मेभ्यो वक्तव्यम् ।

अथ रूपपुद्गलवत् तदुपलब्ध्योरप्यन्यानन्यत्वमवक्तव्यम् । तेन तर्हि संस्कृतमप्यवक्तव्यं[1] भवतीति सिद्धान्तभेदः ।

यदि चायमस्ति—नो तु वक्तव्यो रूपाणि वा नो वा, किं तर्हि एतद्[2] भगवतोक्तम्—"रूपमनात्मा इति[3], यावद्विज्ञानमनात्मा" इति !

येन चायं चक्षुर्विज्ञानेन पुद्गल उपलभ्यते, किं तद्रूपाणि प्रतीत्योत्पद्यते ? आहोस्वित् पुद्गलम् ? उभयं वा ?

यदि रूपाणि प्रतीत्योत्पद्यते ? नोत्सहिष्यते पुद्गलं विज्ञातुं शब्दादि-

---

नीलादिव पीतमिति । यदा परिच्छेदेन नीलमुपलभ्यते, न तदा पीतमुपलभ्यते, पश्चात्तूपलभ्यत इति । अन्ययोपलब्ध्योपलभ्यते । तच्च 'नीलात् पीतमन्यत्' इति प्रतीतम् । तथा च पुद्गलोऽन्ययोपलब्ध्योपलभ्यत इति । रूपादन्यः प्राप्नोति । **एवं क्षणादपि क्षणान्तरमन्यदित्युदाहार्यम्** । **एवं यावद् धर्मेभ्यो वक्तव्यम्** इति । कथम् ? अथान्यया भिन्नकालोपलम्भात् अन्यः शब्दः प्राप्नोति, यथा भेरीशब्दान्मृदङ्गशब्दः । क्षणादिव च क्षणान्तरम् । यथा पूर्वमुक्तम्—नीलादिव पीतम्, क्षणादिव क्षणान्तरम् इति । भिन्नलक्षणे विषये अभिन्नलक्षणे च भिन्नकालोपलब्ध्या अन्यत्वं दर्शितमेव । अथान्ययेति विस्तरेण यावद् धर्मेभ्यो योज्यम् ।

अथ रूपपुद्गलवदिति[4] विस्तरः । यथा रूपपुद्गलयोरन्यानन्यत्वमवक्तव्यम्, एवं तदुपलब्ध्योरपि **अन्यानन्यत्वमवक्तव्यमित्येवं** यदि ब्रूयात् **तेन तर्हि संस्कृतमप्यवक्तव्यं भवति** । तदुपलब्धिलक्षणं संस्कृतमप्येतदवक्तव्यमिति । सिद्धान्तभेदः । योऽयं सिद्धान्तः—'पुद्गल एवावक्तव्यः' इति, अयं भिद्यते । संस्कृतमप्यवक्तव्यमिति कृत्वा ।

यदि चायमिति विस्तरः । यद्येवं रूपाणि नो वेति न वक्तव्यः, किं तर्हि एतद् भगवतोक्तम्—रूपमनात्मेति । यावद् विज्ञानमनात्मेति । एवं हि ब्रुवता वक्तव्य एव पुद्गलः, नावक्तव्य इति दर्शितं भवति ।

शब्दादिवदिति । न रूपविज्ञानेनोपलभ्यते पुद्गलः; तदनालम्बन

---

१. संस्कृतेऽप्य०—का० ।

वत्। यमेव हि विषयं चक्षुर्विज्ञानेषु प्रतीत्योत्पद्यते विज्ञानं स एव तस्यालम्बनप्रत्ययः।

अथ पुद्गलं प्रतीत्योत्पद्यते? उभयं वा? इदमुत्सूत्रम्। सूत्रे हि निर्धारितम्—द्वयं प्रतीत्य विज्ञानस्योत्पादो भवतीति। "तथा चक्षुर्भिक्षो हेतू रूपाणि प्रत्ययश्चक्षुर्विज्ञानस्योत्पादाय। तत् कस्य हेतोः? यत्किञ्चित् भिक्षो चक्षुर्विज्ञानं सर्वं तच्चक्षुः प्रतीत्य रूपाणि च" इति। अनित्यश्च पुद्गल एवं प्राप्नोति; "ये हि हेतवो ये प्रत्यया विज्ञानस्योत्पादाय, तेऽप्यनित्याः" इति सूत्रे वचनात्।

अथ पुद्गलो न तस्यालम्बनम्, न तर्हि तेन विज्ञेयः।

यदि च पुद्गलः षड्विज्ञानविज्ञेयः प्रतिज्ञायते, स श्रोत्रविज्ञानविज्ञेयत्वाद् रूपादन्यः प्राप्नोति, शब्दवत्। चक्षुर्विज्ञानविज्ञेयत्वाच्छब्दादन्यः प्राप्नोति रूपवत्। एवमन्येभ्योऽपि योज्यम्। इदं च सूत्रपदं बाधितं भवति—"यानीमानि ब्राह्मण पञ्चेन्द्रियाणि नानागोचराणि नानाविषयाणि स्वकं[1] स्वकं[1] गोचरविषयं प्रत्यनुभवन्ति। नान्यदन्यस्य गोचरविषयं प्रत्यनुभवति। तद्यथा चक्षुरिन्द्रियं श्रोत्रेन्द्रियं घ्राणेन्द्रियं जिह्वेन्द्रियं कायेन्द्रियम्। मन एषां पञ्चानामिन्द्रियाणां गोचरविषयं प्रत्यनुभवति,

---

प्रत्ययभूतत्वात्, शब्दादिवत्। आदिशब्देन गन्धवत्, रसवत्—इत्यादि योज्यम्। एवं श्रोत्रादिविज्ञानानुपलभ्यमानत्वमस्य वक्तव्यम्। एषा हि दिक्। अनेन चोपन्यासेन धर्मिविशेषविपर्ययप्रतिज्ञादोष उद्भाव्यत इत्यवगन्तव्यम्।

द्वयं प्रतीत्येति। द्वयं प्रतीत्य, न तु त्रयं प्रतीत्येति। अत इदमुत्सूत्रमिति।

चक्षुर्भिक्षो हेतुरिति विस्तरः। हेतुः आसन्नः प्रत्ययः। विप्रकृष्टस्तु प्रत्यय एव। 'जनको हेतुः, प्रत्ययस्त्वालम्बनमात्रम्' इत्यपरे। 'पर्यायावेतौ' इत्यपरे।

रूपादन्यः पुद्गलः इति पक्षप्रसङ्गः। **श्रोत्रविज्ञानविज्ञेयत्वाच्छब्दवत्**। तथा शब्दादन्यः पुद्गल इति पक्षप्रसङ्गः; **चक्षुर्विज्ञानविज्ञेयत्वात् रूपवत्**। **इत्येवमन्येभ्योऽपि योज्यमिति**। रूपशब्दाभ्यामन्यः पुद्गल इति पक्षप्रसङ्गः; घ्राणविज्ञेयत्वात्, गन्धवत्—इत्येषा दिग् योजनं प्रतीति। **स्वकं स्वकं गोचरविषयं प्रत्यनुभवन्तीति** वचनात् पुद्गलेन प्रत्यनु-

---

१-१. स्वं स्वं—का०।

मनश्चैषां प्रतिशरणम्" इति ।

न वा पुद्गलो विषयः । न चेद् विषयो न तर्हि विज्ञेयः । यद्येवम्, मनइन्द्रियस्याप्यव्यभिचारः प्राप्नोति । "षडिमानीन्द्रियाणि नानागोचराणि नानाविषयाणि स्वकं स्वकं गोचरविषयमाकाङ्क्षन्ते" इत्युक्तं **षट्प्राणकोपमे ?**

न तत्रेन्द्रियमेवेन्द्रियं कृत्वोक्तम् । पञ्चानां दर्शनाद्याकाङ्क्षणासम्भवात्, तद्विज्ञानानां च । अतस्तदाधिपत्याध्याहृतं[1] तु[1] मनोविज्ञानमिन्द्रियम्[2]

भवन्तीति उक्तं भवति । **मनश्चैषां प्रतिशरणमिति** । अनुषङ्गेनेदमुक्तम्, नेदमुदाहरणम् । तथापि तु मनश्चैषामिन्द्रियाणां प्रतिशरणमिति तदपेक्षाणीन्द्रियाणि विज्ञानोत्पत्तौ कारणं भवन्तीत्यर्थः ।

न वा पुद्गलो विषय इति । यदि सूत्रं प्रमाणीक्रियते । ततः किम् ? इत्याह—**न चेद् विषय** इति । यदि न कस्यचिद् विज्ञानस्य विषयः । न तर्हि विज्ञेयः । ततश्च 'पञ्चविधं ज्ञेयम्' इति स्वसिद्धान्तो बाध्यते ।

यद्येवम् । सूत्रे वचनात् नान्यदन्यस्य गोचरविषयं प्रत्यनुभवतीति पञ्चानां चक्षुरादीनां प्रमाणीक्रियते स्वविषयाव्यभिचारः । स्वविषयाव्यभिचारे च न चक्षुर्विज्ञानादिभिर्विज्ञेयः पुद्गलः । तदेवं सति **मनइन्द्रियस्याप्यव्यभिचारः प्राप्नोति । षडिमानीन्द्रियाणि नानागोचराणीति** विस्तरेण सूत्रे वचनात् । कुक्कुर-पक्षि-शृगाल-शिशुमार-सर्प-मर्कटाः षट् प्राणकाः केनचिद् बद्धा मध्ये ग्रन्थि कृत्वोत्सृष्टाः । ते **स्वकं स्वकं गोचरविषयमाकाङ्क्षन्ते** । ग्रामाकाश-श्मशानोदकान्त-वल्मीक-वनाकाङ्क्षणात् । एवमेव षडिमानीन्द्रियाणि स्वकं स्वकं गोचरविषयमाकाङ्क्षन्ते । इत्येवमुपमात्र क्रियते । अथ सत्यपि सूत्रवचने मनइन्द्रियस्य व्यभिचारः, एवं चक्षुरादीनामपीन्द्रियाणां व्यभिचारः, व्यभिचारे च चक्षुर्विज्ञानादिभिर्विज्ञेयः पुद्गलो भविष्यतीति ।

अत्र ब्रूमः—**न तत्रेति** विस्तरः । तत्र षट्प्राणकोपमे सूत्रे **नेन्द्रियमेव** चक्षुरादिकम् इन्द्रियं कृत्वोक्तम् । किं कारणम् ? चक्षुरादीनां पञ्चानाम् इन्द्रियाणां दर्शनाद्याकाङ्क्षणासम्भवात् । यस्मादेषां दर्शन-श्रवणाद्याकाङ्क्षणं न सम्भवति; रूपस्वभावत्वात् । **तद्विज्ञानानां च** । चक्षुरादिविज्ञानानां च दर्शनाद्याकाङ्क्षाऽसम्भवात् । कस्मादेषां दर्शनश्रवणाद्या-

---

१—१. ०स्याध्याहृतमय—का० ।

२. ०विज्ञानेन्द्रि०—का० ।

इत्युक्तम्[1] । यच्च तत्केवलं मनआधिपत्याध्याकृतं मनोविज्ञानम्, नैव तदन्येषां विषयमाकाङ्क्षति । अतो नास्त्येष दोषः ।

उक्तं च भगवता—"सर्वाभिज्ञेयं वो भिक्षवो धर्मपर्यायं देशयिष्यामि" इत्युक्त्वा "चक्षुरभिज्ञेयं रूपाणि चक्षुर्विज्ञानं चक्षुःसंस्पर्शो यदपि तच्चक्षुः-संस्पर्शप्रत्ययमध्यात्ममुत्पद्यते वेदितं सुखं दुःखं वा अदुःखासुखं वा, यावत् मनःसंस्पर्शप्रत्ययम् । अयमुच्यते—सर्वाभिज्ञेयपरिज्ञेयो धर्मपर्यायः" इति ।

अत एतावदेवाभिज्ञेयं प्रतिज्ञेयं चेत्यवधार्यते, न पुद्गलः । तस्माद् विज्ञेयोऽप्यसौ न भवति; प्रज्ञाविज्ञानयोः समानविषयत्वात् ।

चक्षुषा च पुद्गलं पश्याम इति पश्यन्तः पौद्गलिकाः—'अनात्मना आत्मानं पश्यामः' इति दृष्टिस्थानमापन्ना भवन्ति ।

सूत्रे च भगवता नीतमेतत् । "स्कन्धेष्वेव पुद्गलाख्या" इति मानुष्यकसूत्रम् । "चक्षुःप्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानं त्रयाणां

काङ्क्षण न सम्भवति ? अविकल्पकत्वात् । तदाधिपत्याध्याहृतं तु मनोविज्ञानमिन्द्रियमित्युक्तम् । इन्द्रियमिवेति कृत्वा । कथं ज्ञायते—तदाधिपत्याध्याहृतं तदिति ? यदि हि चक्षुरादिद्वारेण चक्षुर्विज्ञानादि नोत्पन्नं स्यात्, कथमन्यथा विकल्पं मनोविज्ञानमुत्पन्नं स्यात् ! इत्यतो ज्ञायते—तदाधिपत्याध्याहृतमिति । तत् मनोविज्ञानं चक्षुरादीन्द्रियभूतं स्वकं स्वकं गोचरविषयं रूपादिकमाकाङ्क्षतीति । यच्च तत् केवलमिति विस्तरः । नैव तदन्येषां चक्षुरादीनां विषयमाकाङ्क्षति यन्मनआधिपत्याध्याहृतम् । किं तर्हि ? स्वविषयमेव धर्मायतनमेवालम्बत इति । अतो नास्त्येष दोषः । 'यद्येवम्, मनइन्द्रियस्याप्यव्यभिचारः प्राप्नोति' इति यदुक्तमिति ।

न पुद्गलः । किम् ? अभिज्ञेयः, परिज्ञेयश्चेति । तस्माद् विज्ञेयोऽप्यसौ पुद्गलो न भवति । ननु चासावर्थादभिज्ञेयः परिज्ञेयश्च न भवतीति उक्तः । न त्वर्थो विज्ञेय इति ? अत आह—प्रज्ञाविज्ञानयोः समानविषयत्वादिति । विज्ञेयमपि हि चक्षुरादिकं भवति, न केवलमभिज्ञेयं परिज्ञेयं चेति ।

अनात्मनेति । चक्षुषा । चक्षुर्विज्ञानेनेत्यर्थः ।

---

१. कृत्वोक्तम्—का० ।

सन्निपातः स्पर्शः स्पर्शसहजाता वेदना संज्ञा चेतना इतीमे चत्वारो रूपिणः स्कन्धाश्चक्षुरिन्द्रियं च रूपम्—एतावन्मनुष्यत्वमुच्यते। अत्रेयं संज्ञा—सत्त्वो नरो मनुष्यो मानवश्च पोषः पुरुषः पुद्गलो जीवो जन्तुरिति। अत्रेयं प्रतिज्ञा—अहं चक्षुषा रूपाणि पश्यामीति। अत्रायं व्यवहारः—इत्यपि स आयुष्मानेवंनामा एवंजन्य[1] एवंगोत्र एवमाहार एवंसुखदुःखप्रतिसंवेदी एवंदीर्घायुरेवंचिरस्थितिक एवमायुःपर्यन्त इति। इति हि भिक्षवः संज्ञामात्रकमेवैतद्, व्यवहारमात्रकमेवैतत। सर्व इमे धर्मा अनित्याः संस्कृताश्चेति ताः प्रतीत्यसमुत्पन्नाः" इति।

नीतार्थं च सूत्रं प्रतिशरणमुक्त भगवता। तस्मान्न पुनः परीक्ष्यते।

तथा चोक्तम्—"सर्वमस्तीति ब्राह्मण यावदेव द्वादशायतनानि" इति। यदि चायं पुद्गलो नायतनम्, न सोऽस्तीति सिद्धम्। अथायतनम्, न तर्ह्यवक्तव्यः। तेषामपि चैवं पश्यतः "यावता भिक्षो चक्षुर्यावता रूपाणि, विस्तरेण, एतावता भिक्षो तथागतः सर्व च प्रज्ञापयति च" इति। विम्बिसारसूत्रे चोक्तम्—"आत्मा आत्मेति भिक्षवो बालोऽश्रुतवान् पृथग्जनः प्रज्ञप्तिमनुपतितः। न त्वत्रात्मा वा आत्मीयं वा दुःखमिदमुत्पद्यमानमुत्पद्यते" इति विस्तरः।

शैलयाप्यर्हन्त्या मारमारभ्योक्तम्—

"मन्यसे किं नु सत्त्वेति मारदृष्टिगतं हि ते।
शून्यः संस्कारपुञ्जोऽयं नहि सत्त्वोऽत्र विद्यते॥
यथैव ह्यङ्गसम्भारात् संज्ञा रथ इति स्मृता।
एवं स्कन्धानुपादाय संवृत्या सत्त्व उच्यते"॥ इति।

क्षुद्रकेऽपि चागमे दरिद्रब्राह्मणमधिकृत्योक्तम्—

"शृणु त्वं स्वादरे धर्म सर्वग्रन्थिप्रमोचनम्।
यथा संक्लिश्यते चित्तं यथा चित्तं विशुध्यति॥

नीतार्थं च सूत्रं प्रतिशरणमुक्तमिति। "चत्वारीमानि भिक्षवः प्रतिशरणानि। कतमानि चत्वारि? १. धर्मः प्रतिशरणम्, न पुद्गलः। २. अर्थः प्रतिशरणम्, न पुद्गलः। ३. नीतार्थसूत्रं प्रतिशरणम्, न नेयार्थम्। ४. ज्ञानं प्रतिशरणम्, न विज्ञानम्" ( ) इति।

प्रज्ञप्तिमनुपतित[2] इति। यत्रैव प्रज्ञप्तिः कृता--आत्मेति व्यवहारार्थम् तामेव। आत्मेत्यभिनिविष्ट इत्यर्थः।

---

१. एवंजात्य—का०। २. ०मनूपपतित—जा०।

आत्मैव ह्यात्मनो नास्ति विपरीतेन कल्प्यते ।
नास्तीह सत्त्व आत्मा च[1] धर्मास्त्वेते सहेतुकाः ।।
द्वादशैव भवाङ्गानि स्कन्धायतनधातवः ।
विचिन्त्य सर्वाण्येतानि पुद्गलो नोपलभ्यते ।।
शून्यमध्यात्मकं पश्य शून्यं पश्य वहिर्गतम् ।
न विद्यते[2] सोऽपि कश्चिद् यो भावयति शून्यताम्" ।। इति ।

तथोक्तम्—"पञ्चादीनवा आत्मोपलम्भे—१. आत्मदृष्टिर्भवति यावज्जीवदृष्टिः[3], २. निर्विशेषो भवति तीर्थिकैः सार्धम्, ३. उन्मार्ग-प्रतिपन्नो भवति, ४. शून्यतायामस्य चित्तं न प्रस्कन्दति न प्रसीदति न सन्तिष्ठते नाधिमुच्यते[4], ५. आर्यधर्मा अस्य न व्यवदायन्ते" इति ।

न चैत एवं ग्रन्थं ग्रमाणं कुर्वन्ति । किं कारणम् ? 'नास्माकमयं निकाये पठ्यते' इति । किं पुनस्तेषां निकाय एव प्रमाणम् ? आहोस्विद् बुद्धवचनम् ? यदि निकाय एव प्रमाणम्, न तर्हि तेषां बुद्धः शास्ता । न च ते शाक्यपुत्रीया भवन्ति । अथ बुद्धवचनं प्रमाणम्, अयं ग्रन्थः कस्मान्न प्रमाणम् ? नहि किलैतद् बुद्धवचनमिति । किं कारणम् ? 'नास्माकं निकाये पठ्यते' इति । अयमन्यायो वर्तते । कोऽत्रान्यायः ? यो

नास्तीह सत्त्व आत्मा चेति । इदमिहोदाहरणम् ।

पुद्गलो नोपलभ्यत इति । एतच्च ।

न विद्यते सोऽपि कश्चिदिति । इदं वाप्युदाहरणम् । **योग्यपि नास्ति यः शून्यतामभ्यस्यतीति** ।

आत्मदृष्टिर्भवति, यावज्जीवदृष्टिरिति प्रथम आदीनवो **निर्विशेषो** भवति । **तीर्थिकैरिति** द्वितीयः । **उन्मार्गप्रतिपन्नो भवतीति** तृतीयः । **शून्यतायामस्य चित्तं न प्रस्कन्दति** यावत् **नाधिमुच्यत** इति चतुर्थः । **आर्यधर्मा अस्य न व्यवदायन्त** इति पञ्चमः ।

न तर्हि तेषां बुद्धः शास्तेति । बुद्धवचनमेषां न प्रमाणमित्यभिप्रायात् ।

न किलैतद् बुद्धवचनमिति । केनाप्यध्यारोपितान्येतानि सूत्रा-

---

१. वा—का० । २. लभ्यते—का० ।
३. सत्त्वदृष्टिः—का० । ४. न विमुच्यते—का० ।

हि ग्रन्थः सर्वेषु निकायान्तरेष्वाम्नायते, न च सूत्रं धर्मतां वा बाधते, सोऽस्माभिरपाठान्न बुद्धवचनमिति वचनं केवलं साहसमात्रम् ।

किञ्च—इदमपि तेषां सूत्रं नास्ति "सर्वधर्मा अनात्मानः" इति !

स्यात् मतम्—नैव हि पुद्गलो धर्म उच्यते, नाप्यन्यो धर्मादिति। एवं तर्हि न मनोविज्ञेयः सिध्यति । 'द्वयं प्रतीत्य विज्ञानस्योत्पादः' इत्यवधारणात् । इह चैवं विकल्प्यते "अनात्मन्यात्मेति विपर्यासः, न त्वात्मनि । किं च पुनः ? "नात्मा स्कन्धायतनधातवः" । यत्तावदुक्तं प्राक्—"नो तु वक्तव्यं रूपाणि वा नो वा" इति, तत्तावदपोढम्[1] ।

उक्तं च सूत्रान्तरे—"ये केचिद् भिक्षवः श्रमणा वा ब्राह्मणा वा आत्मेति समनुपश्यन्तः समनुपश्यन्ति, सर्वे त इमानेव पञ्चोपादानस्कन्धान्" इति । तस्मात् सर्व एवानात्मन्यात्मग्राहः । तथोक्तम्—"ये केचिदनेकविधं पूर्वनिवासं समनुस्मरन्तः समनुस्मार्षुः, समनुस्मरन्ति, समनुस्मरिष्यन्ति वा, पुनः सर्वे त इमानेव पञ्चोपादानस्कन्धान्" इति ।

यद्येवमिदम्, कस्मादाह—"रूपवानहमभूवमतीते[2] अध्वनि" इति ।

णीत्यभिप्रायः । सर्वनिकायान्तरेष्विति । ताम्रपर्णीयनिकायादिषु । न च सूत्रं बाधते । न च सूत्रान्तरं बाधते । न च सूत्रान्तरं विरोधयति । न धर्मतां बाधते इति । प्रतीत्यसमुत्पादधर्मताम् ।

सर्वधर्मा अनात्मान इति । न चैत आत्मस्वभावाः । न चैतेषु आत्मा विद्यत इति अनात्मानः सर्वधर्माः ।

द्वयं प्रतीत्येति । चक्षू रूपाणि यावन् मनोधर्मानिति । न पुद्गलो न धर्मा इति ।

नात्मा स्कन्धायतनधातव इति वचने यत् कश्चित् पूर्वं नो तु वक्तव्यं रूपाणि वा नो वेत्युक्तम्, अपोढम् अपास्तं तद् भवति; आत्मनोऽन्यत्वात् ।

तस्मात् सर्व एवानात्मन्यात्मग्राह इति । नातोऽन्योऽस्तीति दर्शयति ।

यदप्येवमिति विस्तरः । यदीमानेव पञ्चोपादानस्कन्धान्

---

१. ०दशोचम्—का० ।
२. यनूवातीते—जा० ।

एवमनेकविधं ये समनुस्मरन्तीति प्रदर्शयति। यदि तु रूपवन्तं पुद्गलं पश्येत्, सत्कायदृष्टिप्रसङ्गः स्यात्। अपाठ एव चात्र[1] शरणं स्यात्।

तस्मात् प्रज्ञप्तिसत्पुद्गलो राशिधारादिवत्[2]।

यद्येवम्, तर्हि न बुद्धः सर्वज्ञः प्राप्नोति, न हि किञ्चिच्चित्तमस्ति चैत्ता वा यत् सर्वं जानीयाद्; क्षणिकत्वात्। पुद्गलस्तु जानीयात्? एवं तर्हि चित्तविनाशे पुद्गलस्याविनाशाभ्युपगमात् नित्यत्वमस्याभ्युपेतं भवति? नैव च वयं सर्वत्र ज्ञानसम्मुखीभावाद् बुद्धं सर्वज्ञमाचक्ष्महे। किं तर्हि? सामर्थ्यात्। याह्य सौ बुद्धाख्या सन्ततिस्तस्या इदमस्ति सामर्थ्यं यदाभोगमात्रेणाविपरीतं ज्ञानमुत्पद्यते यत्रेष्टम्। आह चात्र—

"सन्तानेन समर्थत्वाद् यथाग्निः सर्वभुङ्मतः।
तथा सर्वविदेष्टव्योऽसकृत्सर्वस्य वेदनात्" ॥

कथमिदं गम्यते? अतीतादिवचनात्।

"ये चाभ्यतीताः सम्बुद्धा ये च बुद्धा अनागताः।
यश्च एतर्हि सम्बुद्धो बहूनां शोकनाशनः" ॥ इति ॥

समनुस्मरन्तः समन्वस्मार्षुः, समनुस्मरन्ति, समनुस्मरिष्यन्ति वा न पुद्गलम्। **कस्मादाह रूपवानहं बभूवातीतेऽध्वनीति**। अहमिति वचनात् पुद्गल उच्यत इति दर्शयति। एवमनेकविधं ये समनुस्मरन्ति त एवं समनुस्मरन्तीति वाक्याध्याहारः। **अपाठ एव चात्र शरणं स्यादिति**। अहमिति पाठे हि सति सत्कायदृष्टिपरिग्रहप्रसङ्गः स्यादित्यर्थः। विंशति-कोटिका हि सत्कायदृष्टिः पठ्यते—१. रूपमात्मेति समनुपश्यति, २. रूपवन्तमात्मानम्, ३. आत्मीयं रूपम्, ४. रूपे आत्मेति। एवं यावद् विज्ञानं वक्तव्यम्।

राशिधारादिवच्च। राशिवत्, धारावच्च। आदिशब्देन पानकादि-ग्रहणम्। एकस्मिन् क्षणे बहूनां **राशिः**। बहुषु क्षणेषु समवहितानां **धारा**। राशिदृष्टान्तेन बहुषु धर्मेषु पुद्गलप्रज्ञप्तिं दर्शयति। धारादृष्टान्तेन बहुत्वे सति रूपवेदनादीनां स्कन्धानां प्रवाहे पुद्गलप्रज्ञप्ति दर्शयति।

कथमिदं गम्यत इति। बुद्धाख्यायाः सन्ततेरिदं सामर्थ्यम् यद् आभोगमात्रेणाविपरीतं ज्ञानमुत्पद्यते यत्रेष्टम्, न पुनः पुद्गलस्येति। उच्यते—**अतीतादिवचनात्। ये चाभ्यतीता** इति। विस्तरेणोक्त उपसंहारः। तस्मात् स्कन्धसन्तान एव बुद्धाख्या, न पुद्गल इति।

---

१. त्वत्—का०। २. ०धारावत्—का०।

भारहारं च कृत्वोक्ताः । उपघातार्थो हि भार इति ।

अस्त्येव पुद्गलः; यस्मादुक्तम्—"नास्ति सत्त्व उपपादुक इति मिथ्यादृष्टिः" । कश्चैवमाह—नास्ति सत्त्व उपपादुक इति । सत्त्वस्तु ययाऽस्ति तथा विभक्तो भगवतेति ब्रूमो मानुष्यकसूत्रे । यस्माद् यः परत्रोपपादुकसत्त्वाख्यस्कन्धसन्तानापवादं करोति, तस्यैषा मिथ्यादृष्टिः—'नास्ति सत्त्व उपपादुकः' इति; स्कन्धानामुपपादुकत्वात् ।

अथैषा मिथ्यादृष्टिः पुद्गलापवादिका सती किम्प्रहातव्या भवेत् ? नह्येषा दर्शनभावनाप्रहातव्या युज्यते; पुद्गलस्य सत्येष्वन्तर्भावात्[1] । "एकः पुद्गलो लोक उत्पद्यमान उत्पद्यते" इति वचनात् न स्कन्धा इति चेत् ? न; समुदायेऽप्येकोपचारादेकतिलैकतण्डुलवत्, एकराश्येकवचनवच्च ।

संस्कृत इति वा पुद्गलो वक्तव्यः, उत्पत्तिमत्त्वाभ्युपगमात् । न स एवमुत्पद्यते यथा स्कन्धाः, अपूर्वप्रादुर्भावात् । किं तर्हि ? स्कन्धान्तरोपा-

---

उत्तरे ये पीड्यन्ते ते भारहार इति कृत्वोक्ता इति ।

उपपादुकत्वादिति । उपपादने साधुकारित्वादित्यर्थः । पुद्गलस्य सत्येष्वनन्तर्भावादिति । यस्माद् यथापरिकल्पितस्य पुद्गलस्य सत्येषु दुःखादिषु नान्तर्भावः[2] । नहि पुद्गलो दुःखम्, यावत् मार्ग इति । अतो न सत्यदर्शनप्रहातव्यैषा पुद्गलापवादिका मिथ्यादृष्टिः । या हि दृष्टिः यस्मिन् सत्ये विप्रतिपन्ना, तत्सत्यदर्शनात् तस्याः प्रहाणं भवेत् । तथा दुःख-समुदयसत्ययोः पुद्गलस्यानन्तर्भावात् नापि भावनाप्रहातव्या । भावनाप्रहातव्यो हि क्लेशो भावनाप्रहातव्यमेव वस्तु दुःखं समुदयं वाऽऽलम्बते—इत्येवं तस्याः भावनाप्रहातव्यत्वं युज्यते । न च पुद्गलस्तयोरन्तर्भूत इत्यतो भावनाप्रहातव्या सा न भवति । अथ वा न कदाचिदपि दृष्टिर्भावना प्रहातव्येति नासौ भावनाप्रहातव्या ।

एकतिलैकतण्डुलवद् एकराश्येकवचनवच्चेति । यथा अष्टद्रव्यकत्वेऽपि एकतिल एकतण्डुल इति चोच्यते, तथा एको राशिरेकवचनमिति । तावद् एकः पुद्गल इति ।

उत्पत्तिमत्त्वाभ्युपगमादिति । उत्पद्यत इति वचनात् उपत्तिमत्त्वमस्याभ्युपगतं भवति । ततश्च संस्कृत इति वक्तव्यो भवद्भिः ।

स्कन्धान्तरोपादानादिति । नास्य संस्कृतत्वमापद्यत इत्यभिप्रायः ।

दानात् । यथा हि याज्ञिको जातः, वैयाकरणो जात इत्युच्यते; विद्योपादानात् । भिक्षुर्जातः, परिव्राजको जात इति; लिङ्गोपादानात् । वृद्धो जातः, व्याधितो जात इति; अवस्थान्तरोपादानादिति ? न; प्रतिक्षेपात् ।

सूत्र एव हि प्रतिक्षिप्तं भगवता परमार्थशून्यतायाम्—"इति हि भिक्षवोऽस्ति कर्म, अस्ति विपाकः, कारकस्तु नोपलभ्यते । य इमांश्च स्कन्धान्निक्षिपति, अन्यांश्च स्कन्धान् प्रतिसन्दधात्यन्यत्र धर्मसंकेतात्" ( ) इति ।

फल्गुसूत्रे चोक्तम्—"उपादत्त इति फल्गुना[1] न वदामि" इति । तस्मान्नास्ति स्कन्धानां कश्चिदुपादाता, नापि निक्षिप्ता ।

कं च तावद्ब्रवान् याज्ञिकं यावद्व्याधितमधिमुच्यते दृष्टान्तं करोति ? पुद्गलं यदि ? सोऽसिद्धः । अथ चित्तचैत्ताः ? न; तेषां प्रतिक्षणमपूर्वोत्पत्तिरेव । अथ शरीरम् ? तस्यापि तथा ।

शरीरविद्यालिङ्गवच्च स्कन्धपुद्गलयोरन्यत्वमापद्यते । जीर्णं शरीरान्तरमेव व्याधितं च । प्रतिषिद्धो हि सांख्येयः[2] परिणामवादः । तस्मादपदृष्टान्ता[3] एते ।

यथा हि याज्ञिको जात इति विद्योपादानादुच्यते । न चासौ भूतार्थेन जातः । तद्वदिति सर्वं योज्यम् ।

कारकस्तु नोपलभ्यत इति विस्तरः । कर्मणः कारको नोपलभ्यते । कीदृशोऽसाविति ? आह—य इमाँश्च ऐहिकान् स्कन्धान् निक्षिपति त्यजति । अन्याँश्च पारत्रिकान् स्कन्धान् प्रतिसन्दधाति उपसंगृह्णाति द्रव्यसन्नवस्थित इति । अन्यत्र धर्मसंकेतादिति । प्रतीत्यसमुत्पादलक्षणान्तेनाह—यदुत अस्मिन् सतीति ।

उपादत्त इति फल्गुना न वदामीति । अहं चेदेवं वदेयम्—उपादत्त इति, अत्र ते कल्पः स्यात् वचनाय—'को नु, भदन्त, उपादानमुपादत्ते' इति । तस्मान्नास्ति स्कन्धानां कश्चित् उपादाता, नापि निक्षिप्तेति ।

तस्यापि तथेति । प्रतिक्षणमपूर्वोत्पत्तिरेवेत्यर्थः । यदि पुद्गलः सोऽसिद्ध इत्येवमादिनोपन्यासेनासिद्धतां दृष्टान्तस्य दर्शयति ।

शरीरविद्यालिङ्गवच्चेति । विद्या च लिङ्गं च विद्यालिङ्गम्, शरीरं च विद्यालिङ्गं च शरीरविद्यालिङ्गम्, तयोरिव शरीरविद्यालिङ्गवत् ।

---

१ फल्गु—का० । २. सांख्यीयः—का० । ३. तस्माददृष्टान्ता—का० ।

यदि च स्कन्धानामपूर्वोत्पादो न पुद्गलस्येष्यते सोऽन्यश्च तेभ्यो नित्यश्च स्फुटं दीपितो भवति। पञ्च स्कन्धा एकः पुद्गल इति ब्रुवता कथमन्यत्वं नोच्यते। कथं तावद् भूतानि चत्वारि रूपं चैकं[1], न च भूतेभ्योऽन्यद्रूपम् ? पाक्षिक एष दोषः। कतमस्मिन् पक्षे ? भूतमात्रिकपक्षे। तथापि तु यथा भूतमात्रं रूपम्, एवं स्कन्धमात्रं पुद्गल इत्यभ्युपेतं भवति।

यदि स्कन्धमात्रं पुद्गलः, कस्माद् भगवता—'स जीवस्तच्छरीरमन्यो वा' इति न व्याकृतम् ? प्रष्टुराशयापेक्षया। स हि जीवद्रव्यमेकमन्तर्व्यापारपुरुषमधिकृत्य पृष्टवान्। स च कस्मिंश्चिन्नास्तीति कथमस्यान्यत्वमनन्यत्वं वा व्याक्रियताम्। कौर्मस्येव रोम्णोऽन्तः खरता मृदुता वा।

एष च ग्रन्थः पूर्वकैरेव निर्मोचितः। स्थविरो हि नागसेनः कलिङ्गेन

स्कन्धपुद्गलयोरन्यत्वमापद्यते। यथोपादेयाया विद्यया लिङ्गाच्च शरीरस्यान्यत्वम्, एवमुपादेयात् स्कन्धात् पुद्गलस्यान्यत्वम्, उपादातृत्वादित्यभिप्रायः। जीर्णं तं शरीरान्तरमेव, व्याधितं चेति प्रतिक्षणमन्यत्वमवस्थानादित्यभिप्रायात्। तत्र यदुक्तम्—जीर्णो जातः, व्याधितो जात इत्यसिद्धो दृष्टान्त इति दर्शयति। अथापि स्यात्—अवस्थितस्य शरीरस्यावस्थान्तरनिवृत्तावन्यावस्थान्तरप्रादुर्भाव इति ? तच्च नाप्रतिषिद्धो हि साङ्ख्येयः परिणामवादः पूर्वस्मिन् कोशस्थाने। कथम् ? स एव धर्मी न संविद्यते, यस्यावस्थितस्य धर्मान्तरविकल्पः परिकल्प्येत। तदेव चेदं तथेत्यपूर्विका वाचो युक्तिरिति।

भूतानि चत्वारि, रूपं चैकमिति। "रूपं कतमत् ? चत्वारि महाभूतानि" ( ) इत्यादि।

पाक्षिक एष दोष इति। एकस्मिन् पक्षे अयं दोषवाद इत्यर्थः। भूतमात्रिकपक्ष इति। स्थविरबुद्धदेवपक्षे, नास्मत्पक्ष इत्यर्थः। तथापि त्विति। भूतमात्रिकपक्षेऽपि भूतेभ्यो रूपं नान्यत्। भूतमात्रिकपक्षेऽपि भूतेभ्यो रूपवत् स्कन्धेभ्यो नान्यः पुद्गल इत्युपगतं भवतीति स्वसिद्धान्तस्य परित्यागः[2] स्यादित्यभिप्रायः।

कस्माद् भगवता स जीवः तच्छरीरम्, अन्यो वेति न व्याकृतमिति। अयमेषामभिप्रायः—यदि स्कन्धेषु पुद्गलोपचारः, कस्माच्छरीरमेव जीव इति नोक्तमिति।

पूर्वकैरेवेति। स्थविरनागसेनादिभिः। बहुबोल्लका इति। बहुप्रलापा इति।

---

३. त्वेकं—का०। २. ०सिद्धान्तः०—जा०।

राज्ञोपसंक्रम्योक्तः—"पृच्छेयमहं भदन्तम्, बहुवोल्लकाश्च श्रमणा भवन्ति, यदि यदेव पृच्छेयं तदेव व्याकुर्याः" इति। पृच्छेत्युक्तः पृष्टवान्—"किं नु स जीवस्तच्छरीरम्, अन्यो जीवोऽन्यच्छरीरम्" इति? "अव्याकृतमेतत्" इत्यवोचत् स्थविरः। स आह—"ननु भदन्तः पूर्वमेव प्रतिज्ञां कारितः—नान्यद्व्याकर्तव्यमिति! किमिदमन्यदेवोक्तम्—अव्याकृतमेतदिति"। स्थविर आह—"अहमपि महाराजं पृच्छेयम्, बहुवोल्लकाश्च राजानो भवन्ति, यदि यदेव पृच्छेयं तदेव व्याकुर्याः" इति। पृच्छेत्युक्तः पृष्टवान्—"यस्तेऽन्तःपुरे आम्रवृक्षस्तस्य किमम्लानि फलानि, आहोस्वित् मधुराणि इति? "नैव ममान्तःपुरे कश्चिदाम्रवृक्षोऽस्ति" इत्याह। "ननु मया पूर्वमेव महाराजः प्रतिज्ञां कारितः—नान्यद्व्याकर्तव्यमिति! किमिदमन्यदेवोक्तम्—आम्र एव नास्ति" इति? स आह—"कथमसतो वृक्षस्य फलानामम्लतां मधुरतां वा व्याकरोमि" इति। "एवमेव महाराज, स एव जीवो नास्ति, कुतोऽस्य शरीरादन्यतामनन्यतां वा व्याकरोमि" ( ) इति।

कस्मात् भगवताऽपि नोक्तम्—नास्त्येवेति? प्रष्टुराशयापेक्षया। स हि यस्यापि स्कन्धसन्तानस्य जीव इत्याख्या, तस्याप्यभावं प्रतीयादिति मिथ्यादृष्टि पातितः स्यात्; प्रतीत्यसमुत्पादस्याज्ञानात्। स च तद्देशनाया अक्षमः।

इतश्चैतदेव निश्चीयते। यत् भगवतोक्तम्—"अस्त्यात्मेत्यानन्द! वत्ससगोत्राय परिव्राजकाय प्रश्नं पृष्टो व्याकुर्या नन्वकल्पं स्याद्वचनाय—सर्वधर्मा अनात्मान इति। नास्त्यात्मेत्यानन्द वत्ससगोत्राय परिव्राजकाय प्रश्नं पृष्टो व्याकुर्याम्, ननु वत्ससगोत्रः परिव्राजकः पूर्वमेव संमूढो भूयस्या मात्रया सम्मोहमापद्येत—अभूत् मे आत्मा, स मे एतर्हि नास्तीति। अस्त्यात्मेत्यानन्द शाश्वताय परेति। नास्त्यात्मेत्यानन्दोच्छेदाय परेति" इति विस्तरः।

उत्तर आह[1]—यदि पुद्गलो नावक्तव्यः, कस्मान्नोक्तो नास्त्येवेति।

स च तद्देशनाया अक्षम इति। नैरात्म्यदेशनाया अयोग्य इत्यर्थः। पूर्वमेवं सम्मूढा इति। सत्कायदृष्टिसहगतेन मोहेन। भूयस्या मात्रया सम्मोहमापद्येतेति। उच्छेददृष्टिसहगतं दृष्टयन्तरमुत्पादयेदित्यभिप्रायः। अत एवाह—अभून्मे आत्मा, स एतर्हि नास्तीति। आह चात्रेति। सनत्कुमारलातः[2]—

---

१. इत्यत्र—सं०। २. °कुमारस्तात इत्यपि पाठः।

आह चात्र—

"दृष्टिदंष्ट्रावभेदं च भ्रंशं चापेक्ष्य कर्मणाम् ।
देशयन्ति जिना धर्मं व्याघ्रीपोतापहारवत् ॥
आत्मास्तित्वं ह्युपगतो भिन्नः स्याद् दृष्टिदंष्ट्रया ।
भ्रंशं कुशलपोतस्य कुर्यादप्राप्य संवृतिम्" ॥ ( ) इति ।

पुनराह—

"असत्त्वाद्भगवान् जीवं तत्त्वान्यत्वेन नावदत् ।
नास्तीत्यपि च नावोचन्मा भूत् प्राज्ञप्तिकोऽप्यसन् ॥
यत्र हि स्कन्धसन्ताने शुभाशुभफलास्तिता ।
जीवाख्या तत्र सा न स्यात् जीवनास्तित्वदेशनात् ॥
प्रज्ञप्तिमात्रं स्कन्धेषु जीव इत्यपि नावदत् ।
अभव्यः शून्यतां वोद्धुं तदानीं तादृशो जनः ॥
तथा ह्यात्मास्ति नास्तीति पृष्टो वास्त्येव नावदत् ।
आशयापेक्षाया प्रष्टुः सति त्वस्तीति नाह किम्" ॥ ( )

दृष्टिदंष्ट्रावभेदं चेति विस्तरः । दृष्टिरेव दंष्ट्रा, तयावभेदम् । **अपेक्ष्य देशयन्ति बुद्धा** भगवन्तो **धर्मं** नैरात्म्यं तत्प्रतिपक्षेण । **भ्रंशं च कर्मणाम् अपेक्ष्य** कृतविपरिणाशमपेक्ष्य पुद्गलास्तित्वमिव दर्शयन्तोऽन्यथा देशयन्ति । **व्याघ्रीपोतापहारवत्** इति । यथा व्याघ्री नातिनिष्ठुरेण दन्तग्रहणेन स्वपोतमपहरति नयति—'मास्य दंष्ट्रया शरीरं क्षतं भूत्' इति । नाप्यतिशिथिलेन दन्तग्रहणेन तमपहरति—'मास्य भ्रंशपातोऽस्मिन् विषये भूत्' इति । युक्तेनैव ग्रहणेनापहरतीत्यर्थः । अपहरतीत्यपरे पठन्ति, स्थानान्तराद् अपहरति अपनयतीत्यर्थः ।

तथाऽर्थदर्शने कारणं दर्शयन्नाह—**आत्मास्तित्वमिति** विस्तरः । आत्मास्तित्वं प्रतिपन्नश्चेत् कश्चित् **दृष्टिदंष्ट्रया** सत्कायदृष्टिलक्षणया **भिन्नः स** विनेयजनः **स्यात्** । **अप्राप्य संवृतिगतिम्** । धर्मसंकेतमजानानः **कुशलपोतस्य** कुशलकर्मणः व्याघ्रोपोतभूतस्य **भ्रंशं कुर्यात्**—'नास्ति कर्मणः फलम्' इति ।

प्राज्ञप्तिक इति प्रज्ञप्तौ भवः प्राज्ञप्तिकः । संवृतिसन्नपि पुद्गलोऽस्तीति कश्चिद् ग्रह्णीयादित्यतो **नास्तीति नावोचत्** ।

सति त्वस्तीति नाह किम् इति । यदि भूतार्थेन पुद्गलोऽस्ति,

शाश्वतलोकादीनामप्यव्याकरणं प्रष्टुराशयापेक्षया। यदि हि तावदात्मा लोक इष्टः स्यात्, तस्याभावादयुक्तं चतुर्धा व्याकरणम्। अथ सर्व एव संसारो लोकः, तस्याप्ययुक्तम्। शाश्वते लोके न कस्यचित् परिनिर्वाणं प्राप्नुयात्। अशाश्वते सर्वेषामुच्छेदः प्राप्नुयात्। उभयथात्वे नियमत एकेषां परिनिर्वाणं प्राप्नुयात्, एकेषां न। अनुभयथात्वे नैव परिनिर्वाणं नापरिनिर्वाणं प्राप्नुयात्। अतो मार्गाधीनत्वात्, परिनिर्वाणस्य चतुर्धापि नियमो न व्याक्रियते निर्ग्रन्थश्रावकचटकवत्।

अत एवान्तवान् लोक इति चतुष्काव्याकरणम्। तुल्यार्थो ह्येष चतुष्कः। तथाहि मुक्तिकः परिव्राजक एवं चतुष्कं पृष्ट्वा पुनः पृष्टवान्—"किं नु सर्वो लोकोऽनेन मार्गेण निर्यास्यति[1], आहोस्विदेकदेशो लोकस्य" इति ? स्थविर आनन्द आह—"यमेव त्वं मुक्तिक तत्प्रथमतो भगवन्तं प्रश्नं पृष्टवान्, त्वमेवैतत्[2] पृच्छस्यनेन पर्यायेण" ( ) इति सर्वम्।

किमिति कृत्वा भगवान् 'अस्ति पुद्गलः' इति न ब्रवीति। नहि 'रूपमस्ति' इति वचनेन दोषो भवति ; तस्यास्तित्वात्।

निर्ग्रन्थश्रावकचाटकवदिति। निर्ग्रन्थश्रावकेण चटकं जीवन्तं गृहीत्वा भगवान् पृष्टः—किमयं चटको जीवति न वेति। तस्यायमभिप्रायः—यदि श्रमणो गौतम आदिशेत्—'जीवति' इति, स तं निपीडनेन मारयित्वा दर्शयेत्। यदि पुनर्भगवान् एवमादिशेत्—'मृतः' इति, स तं जीवन्तमेव दर्शयेत्—'कथं नामायमज्ञः' इति लोको जानीयात् इति तस्याभिप्रायः। भगवता तु तस्याशयं विदित्वा न व्याकृतम्। त्वच्चित्तप्रतिबद्धमेवैतत्—'जीवति वा न वेति च' इत्येवाभिहितम्, तद्वदेतन्न व्याकृतमिति।

तुल्यार्थो ह्येष चतुष्क इति। 'शाश्वतो लोकः, अशाश्वतो लोकः' इत्यनेन चतुष्केन 'अन्तवान् लोकः अनन्तवान् लोकः' इत्ययं चतुष्कस्तुल्यार्थः। यद्येवम्, कथं चतुर्दशाव्याकृतवस्तूनि भवन्ति ? 'शाश्वतो लोकः' इत्येकचतुष्कः। 'अन्तवान्' इति द्वितीयश्चतुष्कः। 'भवति तथागतः' इति तृतीयश्चतुष्कः। 'स जीवस्तच्छरीरम्, अन्यो जीवोऽन्यत् शरीरम्' इति द्विकः। त्रयश्चतुष्काः, एकश्च द्विक इति चतुर्दशाव्याकृतवस्तूनि। पर्यायरूपत्वच्च स्थानेऽपि चतुर्दशत्वं भवतीत्यदोषः। त्वमेवैतत् पृच्छसीति।

---

१. निर्या[ति]—ता०।

२. त्वमेवै[तत्]—ता०।

'भवति तथागतः परं मरणात्' इत्यपि चतुष्कः प्रष्टुराशयापेक्षया न व्याकृतः। स हि मुक्त्वात्मानं तथागतं कृत्वा पृष्टवान्।

पौद्गलिकस्तु पर्यनुयोज्यः—किं कारणं भगवान् जीवन्तं पुद्गलम् अस्तीति व्याकरोति, परं मरणान्न व्याकरोतीति ? शाश्वतदोषप्रसङ्गः।

इदं तर्हि कस्माद्व्याकरोति—"भविष्यसि त्वं मैत्रेयानागतेऽध्वनि तथागतोऽर्हन् सम्यक्सम्बुद्धः" इति ? कस्माच्च श्रावकमभ्यतीतं कालगतमुपपत्तौ व्याकरोति—अमुकोऽमुत्रोपपन्न इति ? एवमपि हि शाश्वतत्वप्रसङ्गः।

यदि च भगवान् पूर्वं पुद्गलं दृष्ट्वा परिनिर्वृतं पुनः न पश्यति, अज्ञानान्न व्याकरोतीति, सार्वज्ञं[1] शास्तुरुत्पादितं भवति, न वा सोऽस्तीत्यभ्युपगन्तव्यम्।

अथ पश्यति, अनुच्यमानोऽप्यसावस्ति शाश्वतश्चेति सिद्धं भवति।

अथैतदपि न वक्तव्यम्—पश्यति वा नवेति। एवं तर्हि इदमपि शनैः शनैरवक्तव्यं क्रियताम्—सर्वज्ञो वा न वा भगवान्न वेति।

अस्त्येव पुद्गलो यस्मात् सत्यतः स्थितितो नास्ति मे आत्मेति दृष्टिस्थानमुक्तम् ? अस्तीत्यपि दृष्टिस्थानमुक्तम्। तस्मादज्ञापकमेतत्।

'अन्तवान्' इति यं पृष्टवान्। कथम् ? किं नु सर्वो लोकोऽनेन मार्गेण निर्यास्यति ? इति 'अन्तवान्' इति 'अशाश्वतः' इति च पृष्टं भवति। आहोस्वित् 'एकदेशो लोकस्य' इत्यनेन 'अन्तवांश्च, अनन्तवाँश्च' इति 'शाश्वतश्च, अशाश्वतश्च' इति पृष्टं भवति।

जीवन्तं पुद्गलमस्तीति व्याकरोतीति। तत्त्वान्यत्वेनावक्तव्यं सन्तमेव पुद्गलं व्याकरोतीत्यभिप्रायः।

शाश्वतदोषप्रसङ्गादिति। वात्सीपुत्रीयवचनम्। **इदं तर्हि कस्माद् व्याकरोतीति** विस्तरेण आचार्यवचनम्। **सार्वज्ञमिति**। अञ् भावप्रत्ययः, यौवनमिति यथा। **न वक्तव्यं पश्यति वा न वेति**। पश्यति, न पश्यतीति न वक्तव्यम् इत्यर्थः। **शनैः शनैरवक्तव्यं क्रियतामिति**। **सर्वज्ञो वा भगवान्, न वेति**। न वक्तव्यमिति। शनैः शनैर्ग्रहणं समानशाक्यपुत्रीयप्रकोपपरिहारार्थम्। **सत्यतः स्थितित इति**। स्थितिरूपेणेत्यर्थः। **दृष्टिस्थानमुक्तमिति**। मिथ्यादृष्टिस्थानमुक्तमित्यभिप्रायः।

---

१. सर्वज्ञत्वं—का०।

उभयमपि त्वेतदन्तग्राहदृष्टिशाश्वतोच्छेददृष्टिसंगृहीतमित्याभिधार्मिकाः। तथैव च युक्तम्। "अस्त्यात्मेत्यानन्द शाश्वताय परैति नास्त्यात्मेत्यानन्दोच्छेदाय परैति" ( ) इति वात्स्यसूत्रे वचनात्।

यदि तर्हि पुद्गलो नास्ति, क एष संसरति ? नहि संसार एष संसरतीति युक्तम्। उक्तं च भगवता—"अविद्यानिवरणानां सत्त्वानां सन्धावतां संसरताम्" ( ) इति। अथ पुद्गलः, कथं संसरति ? स्कन्धान्तरत्यागोपादानात् ? उक्तोत्तर एव पक्षः। यथा तु क्षणिकोऽग्निः सन्ततया सञ्चरतीत्युच्यते[1], तथा सत्त्वाख्यः स्कन्धसमुदायस्तृष्णोपादानः संसरतीत्युच्यते।

यदि स्कन्धमात्रमिदम्, कस्मादाह भगवान्—"अहमेव स तेन कालेन तेन समयेन सुनेत्रो नाम शास्ताऽभूवम्" इति ? कस्मान्न वक्तव्यं स्यात् ? अन्यत्वात् स्कन्धानाम्। अथ किं पुद्गलः ? स एवासौ। शाश्वतो हि स्यात् ! तस्मादहमेव स इत्येकसन्ततां दर्शयति। यथा स एवाग्निर्दहन्नागत इति।

यदि चात्मा भवेत्, तथागता एव सुव्यक्तं पश्येयुः। पश्यतां चात्मग्राहो

आचार्य आह—अस्तीत्यपि दृष्टिस्थानमुक्तमिति। सत्कायदृष्टिस्थानमुक्तमित्यर्थः।

उक्तोत्तर एव पक्ष इति। कथं च न ? प्रतिक्षेपात्। सूत्र एव हि प्रतिक्षिप्तं भगवतेति विस्तरेण यावद् 'अपदृष्टान्ता एते' इति। किमिदमुपादायेति आरभ्य। एतदपरेषां व्याख्यानम्। स्वमतेन तु यथा संसरति तथा दर्शयन्नाह—यथा तु क्षणिकोऽग्निरिति विस्तरः। क्षणिकोऽग्निः प्रसिद्धः। स च देशान्तरोत्पत्तिसन्ततया सञ्चरतीत्युच्यते। तथा सत्त्वाख्यस्कन्धसमुदायस्तृष्णोपादानः। तृष्णा उपादानमस्येति तृष्णोपादानः। क्षणिकोऽपि सन्ततया संसरतीति।

सुनेत्रो नाम शास्तेति। सप्तसूर्योदयसूत्रेऽयमेव भगवान् ऋषिः सुनेत्रो नाम अभूवेति।

अन्यत्वात् स्कन्धानामिति। क्षणिकत्वे सत्यन्यत्वादित्यभिप्रायः। एकसन्ततां दर्शयतीति। यस्मात् सुनेत्रो बुद्धसन्तान एवासीत्।

---

१. संसरती०—का०।

दृढतरः स्यादात्मस्नेहश्च । "आत्मनि च सत्यात्मीयं भवति" इति सूत्रे वचनादात्मग्राहोऽप्येषां स्कन्धेष्वधिकं प्रवर्तेत । सैषां[1] स्यात् सत्कायदृष्टिः । आत्मीयदृष्टौ च सत्यामात्मीयस्नेहः । एवमेषां दृढतरात्मात्मीयस्नेहपरिगाहितवन्धनानां[2] मोक्षो दूरीभवेत्[3] ।

अथ मतम्—नैवात्मनि प्रवर्तते स्नेह इति । तत् क इदानीमेष योगो यदनात्मन्यात्माधिमोक्षात् स्नेह उत्पद्यते, आत्मन्येव तु नोत्पद्यते ! तस्मात् दृष्ट्यर्वुदमेतस्मिन् शासने उत्पन्नम्—य एष **एकेषां** पुद्गलग्राहः, **एकेषां** सर्वनास्तिताग्राहः ।

येऽपि च द्रव्यान्तरमेवात्मानं मन्यन्ते **तीर्थकराः**, तेषामेव मोक्षाभावदोषो निष्कम्पः ।

यदि तर्हि सर्वथापि नास्त्यात्मा, कथं क्षणिकेषु चित्तेषु चिरानुभूतस्यार्थस्य स्मरणं भवति, प्रत्यभिज्ञानं वा ? स्मृतिविषयसंज्ञान्वयाच्चित्तविशेषात् । कीदृशाच्चित्तविशेषात् यतोऽनन्तरं स्मृतिर्भवति ? तदाभोग-

---

अथ 'स एवाहम्' इत्यभेदोपचारः । **यथा स एवाग्निर्यः** पूर्वं दृष्टो **दहन्नागत** इति । सन्तानवृत्त्या स एवेत्युच्यते, तद्वत् । **सैषां स्यात् सत्कायदृष्टिरिति** । सैषां तथागतानामात्मात्मीयाकारा सत्कायदृष्टिः स्यात् । **दृढतरात्मात्मीयस्नेहपरिगाहितबन्धनानामिति** । आत्मदृष्टौ आत्मीयदृष्टौ च सत्याम् आत्मस्नेह आत्मीयस्नेहश्च भवति । इत्यतो रागो बन्धनमिति कृत्वा दृढीकृतबन्धनानां सतां **मोक्षो दूरीभवेत्** । नैव भवेदित्यभिप्रायः ।

य एकेषां पुद्गलग्राह इति । वात्सीपुत्रीयाणाम् । **एकेषां सर्वनास्तिग्राह** इति । मध्यमकचित्तानामित्यभिप्रायः । **स्मृतिविषयसंज्ञान्वयाच्चित्तविशेषादिति** । स्मृतेर्विषयः = अनुभूतोऽर्थः, तत्र संज्ञा=सान्वयो हेतुरस्येति स्मृतिविषयसंज्ञान्वयश्चित्तविशेषः । किञ्चिदेव चित्तम्, न सर्वमित्यर्थः । **तस्मात् स्मरणं भवति, प्रत्यभिज्ञानं वा** ।

एवमुभयविशेषणे कृते पृच्छति—**कीदृशाच्चित्तविशेषादिति** ।

आह—**तदाभोग** इति विस्तरः । तस्मिन् स्मर्तव्य आभोगः= तदाभोगः । यत्र तेन सदृशाः सम्बन्धिनश्च संज्ञादयो ये ते विद्यन्तेऽस्येति

---

१. सैषा—का० । २. परिसादित०—का० ।

सदृशसम्बन्धिसंज्ञादिमतोऽनुपहतप्रभावाद् आश्रयविशेषशोकव्याक्षेपादिभिः। तादृशोऽपि ह्यतदन्वयश्चित्तविशेषो न समर्थस्तां स्मृतिं भावयितुम्, तदन्वयोऽपि चान्यादृशो न समर्थस्तां स्मृतिं भावयितुम्। उभयथा तु समर्थ इत्येवं स्मृतिर्भवति; अन्यस्य[1] सामर्थ्यादर्शनात्।

कथमिदानीमन्येन चेतसा दृष्टमन्यत् स्मरति, एवं हि देवदत्तचेतसा दृष्टं यज्ञदत्तचेतः स्मरेत् ? नः असम्बन्धात्। न हि तयोः सम्बन्धोऽस्ति;

तदाभोगसदृशसम्बन्धिसंज्ञादिमान् चित्तविशेषः। आदिग्रहणेन प्रणिधान-निबन्धाभ्यासादिग्रहणम्। आश्रयविशेषश्च शोकतश्च व्याक्षेपतश्च आदि-रेषामिति आश्रयविशेषशोकव्याक्षेपादीनि, तैः अनुपहतप्रभावश्चित्तविशेषः। स एवमनेन दर्शितो भवति। तस्माद् ईदृशाच्चित्तविशेषात् स्मृतिर्भवति। तदिदमुक्तं भवति—तदाभोगवतः यदि तत्राभोगः क्रियते सदृशसंज्ञादिमतः यत्र सादृश्यात् स्मृतिर्भवति। सम्बन्धिसंज्ञादिमतः यत्रान्तरेणापि सादृश्यं धूमादिदर्शनात् स्मृतिर्भवति। प्रणिधाननिबन्धाभ्यासादिमतश्च यत्र प्रणि-धानम्—अत्र काले स्मर्तव्यम्, अभ्यासो वाऽस्य तत्स्मरणे[2]ः आश्रय-विशेषादिभिरनुपहतप्रभावत्वादिति। व्याधिलक्षणेनाश्रयविशेषेण शोकेन व्याक्षेपेणान्यत्र काये[3]। आदिशब्दगृहीतैश्च कर्मविद्यादिभिः। तादृशोऽपीति विस्तरः। तदाभोग-यावत्-संज्ञादिमान् अनुपहतप्रभावोऽपीत्यर्थः। अतदन्वय इति। अस्मृतिविषयसंज्ञान्वय इत्यर्थः। भावयितुम् उत्पादयितुम्। अन्यादृश इति। अतदाभोग-यावत्-संज्ञादिमान् अनुपहतप्रभावो वा। अन्यस्य चित्त-विशेषादन्यस्य।

न, असम्बन्धादिति। देवदत्तयज्ञदत्तचेतसोरेकार्यकारणभावेनासम्ब-न्धादित्यर्थः। यथैकसान्तानिकयोश्चेतसोः कार्यकारणभावात् सम्बन्धः, नैव देवदत्तयज्ञदत्तचेतसोः सम्बन्धः। इत्यनेन दृष्टान्त-दार्ष्टान्तिकयोरसाम्यं दर्शयति। तत्र यदि परेणैवं साधनमभिधीयते—'न देवदत्तानुभवचित्तानु-भूतमर्थं तत्स्मरणचित्तं स्मरति; अन्यत्वात्, यज्ञदत्तचित्तवत्' इति। तदसाधनम्; हेतोः स्वयमनिश्चितत्वात्, प्रत्यक्षविरोधेन च पूर्वपक्षसापक्षा-त्वात्। अथ देवदत्तानुभवचित्तानुस्मरणचित्तयोरन्यत्वप्रतिज्ञायामिदं दूषणमुद्भाव्येत ? तददूषणम्; दृष्टबाधायां दूषणानुपपत्तेः। भवत्-सिद्धान्तेऽपि हि देवदत्तानुभवचित्तानुभूतमर्थं तत्स्मरणचित्तं स्मरति।

---

१. अन्यस्मा—ता०। २. तत्स्मरणादि—ता०।
३. कार्ये—ता०।

गौः । तस्मात् तत्रापि न हेतुभावं व्यतीत्यास्ति स्वामिभावः ।

एवं को विजानाति, कस्य विज्ञानम्—इत्येवमादिषु वक्तव्यम् । तस्य हेतुरिन्द्रियार्थमनस्कारो यथायोगमित्येष विशेषः ।

योऽप्याह—भावस्य भवित्रपेक्षत्वात् सर्वो हि भावो भवितारमपेक्षते । यथा देवदत्तो गच्छतीत्यत्र गतिर्भावो गन्तारं देवदत्तमपेक्षते । तथा विज्ञानं भावः । तस्माद् यो विजानाति तेन भवितव्यमिति । स वक्तव्यः—कोऽयं देवदत्त इति ? यद्यात्मा ? स एव साध्यः । अथ व्यवहारपुरुषः ? सोऽपि न कश्चिदेकः । संस्कारा हि त एवन्नामानः । तत्र यथा देवदत्तो गच्छति यथा विजानाति ।

कथं च देवदत्तो गच्छति ? क्षणिका हि संस्कारा अभिन्नसन्ताना देवदत्त इति बालैरेकसत्त्वपिण्डग्राहेणाधिमुक्ताः स्वस्य सन्तानस्य देशान्तरे

एवाह—न तु कश्चिदिति विस्तरः ।

एवं को विजानातीति । असत्यात्मनि क एवं विजानाति । विजानातीति कोऽर्थः ? विज्ञानेन विषयं गृह्णाति । किं तद ग्रहणम् अन्यद् विज्ञानात् । विज्ञानं तर्हि किं करोति ? उक्तः सः, यस्तत् करोति । **विज्ञान-हेतुरिन्द्रियार्थमनस्कारः** । चित्तविशेष इति तन्न वक्तव्यम् । इन्द्रियादि-हेत्वन्तरयोगात् । अत एव चोच्यते **यथायोगमित्येष विशेष** इति । यत् तर्हि चैत्रो विजानातीत्युच्यते । ततो हि चैत्राख्याद् सन्तानाद् भावदृष्टचोच्यते । असत्यात्मनि कस्येदं विज्ञानम् ? किमर्थेषा षष्ठी ? स्वाम्यर्था । यथा कस्य कः स्वामीति विस्तरेण यावत् क्व च पुनः विज्ञानं विनियोक्तव्यम् ? यत एतस्य स्वामी मृग्यते । विज्ञातव्येऽर्थे । किमर्थं विनियोक्तव्यम् ? विज्ञानार्थम् । अहो सूक्तानि सुखैषितानाम् ! तदेव हि नाम तदर्थं विनियोक्तव्यमिति । कथं च विनियोक्तव्यम् ? उत्पादनतः, आहोस्वित् सम्प्रेषणतः ? विज्ञानगत्ययोगादुत्पादनतः । हेतुरेव तर्हि स्वामीति विस्तरेण यावद् यो हि एव हेतुविज्ञानस्य, तस्यैवायं । यज्ञाति न चैत्राभिधान इति विस्तरेण यावन्न जानाति हेतुभावं व्यतीत्यास्ति स्वाभिभाव इति । आदि-शब्देन 'को वेदयते', 'कस्य वेदना' 'कः सञ्जानीते' 'कस्य संज्ञा' इत्येवमादि । एषा दिगिति ।

योऽप्याह—भावस्य भवित्रपेक्षादिति । वैयाकरणः । तेन भवितव्यमिति । विज्ञाता भवितव्यं पुद्गलेनेत्यभिप्रायः ।

कारणं भवन्त उच्यन्ते—गच्छति देवदत्त इति । सा च देशान्तरोत्पत्तिर्गतिरिति । ज्वालाशब्दसंतानयोर्गच्छतिगमनाभिधानवत् । त एव च पुनर्विज्ञानस्य कारणं भवन्त उच्यन्ते—विजानाति[1] देवदत्त इति । आर्यैरपि तेषां संज्ञया तथोच्यन्ते व्यवहारार्थम् ।

यत्तर्हि "विज्ञानं विजानाति" इति सूत्र उक्तम्, किं तत्र विज्ञानं करोति ? न किञ्चित् करोति । यथा तु कार्यं कारणमनुविधीयत इत्युच्यते, सादृश्येनात्मलाभादकुर्वदपि किञ्चित् । एवं विज्ञानमपि विजानातीत्युच्यते, सादृश्येनात्मलाभादकुर्वदपि किञ्चित् । किं पुनरस्य सादृश्यम् ? तदाकारता । अत एव तदिन्द्रियादप्युत्पन्नं विषयं विजानातीत्युच्यते, नेन्द्रियम् ।

अथवा तथाऽत्रापि विज्ञानसन्तानस्य विज्ञाने कारणभावाद् विज्ञानं विजानातीति वचनान्निर्दोषम्, कारणे कर्तृशब्दनिर्देशात् । घण्टा रौतीति यद्वत् ।

अपि खलु यथा प्रदीपो गच्छति, तथा विज्ञानं विजानातीति । कथं च प्रदीपो गच्छति ? प्रदीप इत्यर्चिषां सन्तान उपचर्यते, स देशान्तरेषूत्पद्यमानस्तं देशं गच्छतीत्युच्यते । एवं विज्ञानमपि चित्तानां सन्तान

गच्छति-गमनाभिधानवदिति । यथा ज्वाला गच्छति, शब्दो गच्छतीति गच्छति-शब्दाभिधानम् । यथा ज्वालायाः शब्दस्य वा गमनम् । अनेन दृष्टान्तेन **विजानाति देवदत्त** इति सिद्धयति ।

सादृश्येनात्मलाभादिति । कारणसादृश्येन कार्यात्मलाभात् । **अकुर्वदपि कञ्चिदिति** । परिस्पन्दनमकुर्वदपीत्यर्थः ।

तदाकारतेति । नीलादिविषयाकारतेत्यर्थः । **विज्ञाने कारणभावात्** इति विज्ञानं विज्ञानान्तरस्य कारणम्, अतो विज्ञानान्तरं उत्पादाद् विजानातीति उच्यते । **कारणे कर्तृशब्दनिवेशादिति** । कारणं कर्तृभूतमिति कृत्वा **तद्यथा** नादस्य कारणं घण्टेति **घण्टा रौतीत्युच्यते, तद्वत्** ।

प्रदीप इति । अर्चिषां सन्ताने प्रदीप इत्युपचर्यते । एक इवेति कृत्वा **स देशान्तरेषूत्पद्यमानः सन्तानरूपः** प्रदीपदेशान्तरेषूत्पद्यमानः । तं तं **देशं गच्छतीत्युच्यते** । **एवं चित्तानां सन्ताने विज्ञानमित्युपचर्यते** । एकमिवेति कृत्वा । **तत् सन्तानरूपं विज्ञानं विषयान्तरेषूत्पद्यमानं तं तं विषयं**

---

१. जानाति—का० ।

उपचर्यते। तद्विषयान्तरेषूत्पद्यमानं तं विषयं विजानातीत्युच्यते। यथा चाभिजायते तिष्ठति रूपमित्यत्र भवितुर्भावादनर्थान्तरत्वम्, एवं विज्ञानेऽपि स्यात्।

यदि विज्ञानाद् विज्ञानमुत्पद्यते नात्मनः, कस्मान्न नित्यं तादृशमेवोत्पद्यते, न च क्रमनियमेनाङ्कुरकाण्डपत्रादिवत्? स्थित्यन्यथात्वस्य संस्कृतलक्षणत्वात्। एष हि संस्कृतस्य स्वभावो यदवश्यं प्रवन्धस्यान्यथात्वं भवति। अन्यथा हि निकामध्यानसमाहितानां सदृशकायचित्तोत्पत्तौ प्रथमक्षणनिर्विशेषत्वात् पश्चादपि न स्यात् स्वयं व्युत्थानम्।

क्रमोऽपि हि चित्तानां नियत एव। यतो नूत्पत्तव्यम्; तत एव तस्योत्पादात्। तुल्याकारमपि हि किञ्चिदुत्पादने समर्थं भवति; गोत्रविशेषात्। तद्यथा स्त्रीचित्तादनन्तरं यदि तत्कायविदूषणाचित्तमुत्पन्नं

विजनातीत्युच्यते। सन्तानेन विज्ञानोत्पत्त्या विजानातीत्यभिप्रायः। यथा वा रूपं भवतीति विस्तरः। यथा भवितू रूपस्य भावात्, जनितुर्जातेः, स्यातुः स्थितेरनर्थान्तरत्वम्, एवं विज्ञानेऽपि स्यात् विज्ञातुर्विज्ञानस्य भावादनर्थान्तरत्वम्; व्यतिरिक्तस्य भावस्यानुपलब्धेः। वैशेषिकसूत्रानुसाराद् वा।

नात्मन इति। यदि नात्मनो विज्ञानमुत्पद्यते विज्ञानलक्षणस्याविशेषात्। तादृशमेव विज्ञानमुत्पद्येत। यदि त्वात्मतः तस्याभिप्रायविशेषाद् विशिष्टं ज्ञानमुत्पद्यत इत्यभिप्रायः। **न च क्रमनियमेनेति**। कस्माच्च न क्रमनियमेनोत्पद्यते। अनियमेनापि हि उत्पद्यते, गोबुद्धेरनन्तरं स्त्रीबुद्धिः। स्त्रीबुद्धेर्महिषबुद्धिः। कस्माद् गोबुद्धेरनन्तरं नोत्पद्यते! अङ्कुर-काण्ड-पत्रादिवदिति। अङ्कुरात् काण्ड एवोत्पद्यते, न पत्रादि। काण्डात् पत्रमेवोत्पद्यते, न पुष्पादि, अङ्कुरादि वा, तद्वत्।

भवति तत्पतिपुत्रादिचित्तं वा पुनश्च पश्चात् सन्ततिपरिणत्या स्त्रीचित्त-मुत्पद्यते, तत् समर्थं भवति तत्कायविदूषणाचित्तोत्पादने तत्पतिपुत्रादि-चित्तोत्पादने वा; तद्गोत्रत्वात् । अन्यथा न समर्थम् ।

अथ पुनः पर्यायेण स्त्रीचित्ताद् बहुविधं चित्तमुत्पन्नं बहुतरमासन्नतरं वा तदेवोत्पद्यते; तद्भावनाया बलीयस्त्वात् । अन्यत्र तात्कालिकात् काय-बाह्यप्रत्ययविशेषात् । सैव बलीयसी भावना कस्मान्नित्यं न फलति ? स्थित्यन्यथात्वस्य संस्कृतलक्षणत्वात् । तस्य चान्यथात्वस्यान्यभावना-

---

मुत्पन्नं भवति । **तत्पतिपुत्रादिचित्तं** वा । तस्याः पतिपुत्रादयः । आदि-शब्देन दुहित्रादयो गृह्यन्ते । तदालम्बनं चित्तं तत्पतिपुत्रादिचित्तम् । तद् वान्यतरद् यदिदं तस्मात् स्त्रीचित्ताद् अनन्तरमुत्पन्नं भवति । **पुनश्च** कालान्तरेण **सन्ततिपरिणामेन स्त्रीचित्तमुत्पद्यते** । तत् पश्चादुत्पन्नं स्त्रीचित्तं **समर्थं भवति तत्कायविदूषणाचित्तोत्पादने** । तत्स्त्रीकायविदूषणाचित्तोत्पादने, तत्पतिपुत्रादिचित्तोत्पादने वा समर्थम् । कस्माद् ? इत्याह—**तद्गोत्रत्वा-दिति** । तत्कायविदूषणाचित्तं तत्पतिपुत्रादिचित्तं वा गोत्रं बीजमस्येति तद्गोत्रं । चित्तम्, तस्य भावः, तस्मात् । तज्जातीयत्वादित्यभिप्रायः । **अन्यथेति** । अतद्गोत्रम् ।

अथ पुनः पर्यायेणेति विस्तरः । पर्यायेण=अयुगपत् । स्त्रीचित्तात् तत्कायविदूषणाचित्तम्, ततश्च तत्पतिचित्तम्, ततश्च तत्पुत्रचित्तम्, तत एव च तद्दुहितृचित्तम्, तत एवं च तदुपकरणादिचित्तमुत्पन्नं भवति । **ततः** स्त्रीचित्ताद् अनन्तरोत्पन्नेभ्यश्चित्तेभ्यो **यद् बहुतरं** प्रवाहतः **पटुतरं** शक्तितः **आसन्नतरं** वास्योत्पाद्यस्य चित्तस्य, **तदेव चित्तमुत्पद्यते; तद्भावनाया बलीयस्त्वात्** । तस्य बहुतरस्य पटुतरस्यासन्नतरस्य वा भावनाया बलवत्त-रत्वात् । **अन्यत्रेति** विस्तरः । तत्कालप्रत्युपस्थितः तात्कालिकः **काय-प्रत्ययविशेषो बाह्यप्रत्ययविशेषश्च, तस्मादन्यत्र** । तस्मादृत इत्यर्थः । तदेव ह्युत्पद्यते, यस्य कायो वा बाह्यो वा प्रत्ययविषय उपतिष्ठते ।

सैव बलीयसीति । या बहुतरस्य पटुतरस्य आसन्नतरस्य वा अभिहिता, **सैव बलीयसी भावना कस्मान्नित्यं न फलति** । नहि तच्चित्तं निवर्तते ।

वर्तते इतीतरेण चोदित आह—**स्थित्यन्यथात्वलक्षणत्वात्** । स्थिते-रन्यथात्वं लक्षणमस्येति स्थित्यन्यथात्वलक्षणत्वात्, तद्भावात् । **तस्य चान्यथात्वस्य** संस्कृतलक्षणस्य । **अन्यभावनाफलोत्पत्तौ अन्यभावनाफलस्य**

संयोग इति लक्षणव्याख्यानाच्चात्मनः परिच्छेदप्रसङ्गः । ततो मनःसंचारादात्मनः सञ्चारप्रसङ्गात्[1], विनाशस्य[2] वा ।

प्रदेशसंयोग इति चेत् ? न; तस्यैव तत्प्रदेशत्वायोगात् ।

अस्तु वा संयोगः, तथापि नित्यमविशिष्टे मनसि कथं संयोगविशेषः ? बुद्धिविशेषापेक्षत्वादिति[3] चेत् ? स एवोपरि[4] चोद्यते[4]—कथं बुद्धिविशेष

काष्ठयोरन्ययोर्वा कयोश्चित् । **परिच्छिन्नत्वात्** । परिच्छिन्नदेशदृष्टत्वादित्यर्थः । **लक्षणव्याख्यानाच्चेति** । वैशेषिकतन्त्रे संयोगलक्षणनिर्देशात् । ततः किम् ? **आत्मनः परिच्छेदप्रसङ्गः** । परिच्छिन्नदेशत्वप्रसङ्गः । यत्रात्मा न तत्र मनः, यत्र मनः न तत्रात्मेति । अनेनानुमानागमापतितो धर्मिविशेषविपर्ययोऽस्य पक्षस्य सन्दृष्टो भवति । मनसा संयोग आत्मनेति आत्मा धर्मी, तस्य विशेषः सर्वगतत्वम् । तद्विपर्ययोऽसर्वगतत्वमिति । **ततो मनःसञ्चारादात्मनः सञ्चारप्रसङ्गादिति** । ततो लक्षणाद् अप्राप्तिपूर्विका प्राप्तिः संयोग इति मनःसञ्चारात् यं यं शरीरप्रदेशं मनः सञ्चरति ततस्तत आत्मा सञ्चरति=अपैतीति प्रसज्यते । तद्यथा—यं यं पृथिवीप्रदेशं पुरुषः सञ्चरति, ततस्तत आतपोऽपसरति । तथा च सति निष्क्रियत्वमस्य बाधितं भवतीति स एव प्रतिज्ञादोषः । **विनाशस्य वा** । प्रसङ्ग इति वर्तते । आत्मन इति च । यत्र यत्र मनः सञ्चरति तत्र तत्र आत्मा विनश्यतीति स एव चात्र प्रतिज्ञादोषः आत्मनो नित्यत्वनिवृत्तेः । **प्रदेशसंयोग इति चेत्** । स्यान्मतम्—आत्मना प्रदेशेन संयोगो मनसः, आत्मनो वा प्रदेशेन मनसा सह संयोगः । यस्मिन् शरीरप्रदेशे मनोऽवस्थितं भवति, तद्गतेनात्मप्रदेशेन मनो न संयुज्यते, प्रदेशान्तरेणान्यपार्श्वतः संयुज्यते । तस्मादप्राप्तिपूर्वकत्वेऽपि संयोगस्याप्राप्तेनैवात्मप्रदेशेन मनः संयुज्यत इति । **तन्न; तस्यैव तत्प्रदेशत्वायोगात्** । न ह्यात्मनोऽन्यप्रदेशा विद्यन्ते । न चैवात्मैवात्मनः प्रदेशो युज्यते । **अस्तु वा संयोग** इति विस्तरः । अभ्युपेत्यापि संयोगम्, **तथापि** निर्विकारत्वाद् **अविशिष्टे मनसि कथं संयोगविशेषः** ! कथं विशिष्टः संयोगो भवति । यत एवमुक्तम्—मनःसंयोगविशेषापेक्षत्वादिति । **बुद्धिविशेषापेक्षत्वादिति चेत् । स एवोपरि चोद्यते—कथं बुद्धिविशेष** इति । कस्मान्न नित्यमीदृशमेवोत्पद्यते चित्तमविशिष्ट आत्मनीति । कारणविशेषाद्धि कार्यविशेष इष्यते, शङ्खपटहादिशब्दवत् । **संस्कारविशेषापेक्षा-**

---

१. ०प्रसङ्गो–का० । २. विरागस्य–का० ।
३. ०पेक्ष इति—का० । ४-४ एव परिचोद्यते–का० ।

इति । संस्कारविशेषापेक्षादात्ममनःसंयोगादिति चेत् ? चित्तादेवास्तु संस्कारविशेषापेक्षात्[1] । नहि किञ्चिदात्मनः उपलभ्यते सामर्थ्यम्, औषध-कार्यसिद्धाविव कुहकवैद्यफूःस्वाहानाम् । सत्यात्मनि तयोः सम्भव[2] इति चेत् ? वाङ्मात्रम् । आश्रयः स इति चेत् ? यथा कः कस्याश्रयः ? न हि ते चित्रवदरादिवदाधार्ये । नापि स कुड्यकुण्डादिवदाधारो युक्तः ।

दात्ममनःसंयोगादिति चेत् । स्यान्मतम्—नित्यमविशिष्टेऽप्यात्मनि मनसि च संस्कारविशेषापेक्षात् आत्ममनसोः संयोगाद् **बुद्धिविशेष** इति । तदुक्तं भवति—संस्कारविशेषाद् भावनाविशेषलक्षणात् आत्ममनःसंयोगविशेषः तद्विशेषाद् बुद्धिविशेष इति । अत्र ब्रूमः—**चित्तादेवास्तु** इति विस्तरः । अयमिहाचार्यस्याभिप्रायः—सान्तर्भवश्चित्तमस्तीत्यविवादः । मम तव च चित्तमस्तीत्यविवादः । संस्कारविशेषोऽप्यस्ति । भावनाविशेषलक्षणो योऽसौ वासना बीजं वा अस्माभिर्व्यवस्थाप्यते । भावनान्तरं न वेति तु विशेषः । तस्माच्चित्तादेव संस्कारविशेषापेक्षाद् **बुद्धिविशेषोऽस्तु**, किमात्मना तत्संयोगेन वा कल्पितेनेति । **नहि किञ्चिदिति** विस्तरः । कुहकेनैकतरेण वैद्येन कस्मैश्चिद्[3] ग्लानीयौषधं ददानेन चिन्तितम्—'इदमौषधं सुलभम्, विदितं चास्य सपरिजनस्य ग्लानस्य, एतेन चौषधेनास्य ग्लानस्य ग्लानोपशमो भवेत् । तदेवं मामवधूयान्येऽपि करिष्यन्ति, ततश्च ममार्थलाभो न भवि-ष्यति' । इति चिन्तयित्वा तदभिमन्त्र्य 'फूः स्वाहा, फूः स्वाहा' इति जनस्य दर्शितम्—'अनेन मन्त्रेणेदमौषधं सिद्ध्यति' इति । **तत्र यथा कुहकवैद्य-फूःस्वाहानाम् औषधकार्यसिद्धौ सामर्थ्यं** नास्ति, औषधस्यैव तु सामर्थ्यम्; एवमात्मनो बुद्धिविशेषोत्पत्तौ नास्ति सामर्थ्यम्, चित्तस्यैव सामर्थ्यमिति । **सत्यात्मनि तयोः सम्भव इति चेत्** । स्यान्मतम्—सत्यात्मनि तयोः संस्कारचित्तयोः सम्भवः—इत्यतोऽस्त्यात्मेति ? अत्र ब्रूमः—**वाङ्मात्रम्** । नात्र काचिद् युक्तिरस्ति । **आश्रयः स इति चेत्** । स्यान्मतम्—आत्मा-श्रयस्तयोरिति । **यथा कः कस्याश्रय** इति । आश्रयरूपेणोदाहरणं मृग्यते । तमस्याश्रयार्थमयुक्तं दर्शयन्नाह—**न हि ते** इति विस्तरः । ते=संस्कार-चित्ते । **चित्रवदरादिवत्** । यथा कुड्ये चित्रम् आधार्यम्, वदरं च कुण्डे । आदि-शब्देन भाजने भोजनमित्यादि । नैव ते संस्कारचित्ते तत्रात्मन्याधेये आधार्ये । **नापि स कुड्यकुण्डादिवदाधारो युक्तः** । नापि स आत्मा कुड्यादि-वत कुण्डा [illegible] धारो युक्तः । आदिशब्देन भाजनादिग्रहणम् । ए—

प्रतिघातियुतत्वदोषात्[1] नैव स एवमाश्रयः ।

कथं तर्हि ? यथा गन्धादीनां पृथिवीति चेत् ? अतिपरितोषिताः स्मः ! इदमेव हि नः प्रत्यायकम्—नास्त्यात्मेति । यथा न गन्धादिभ्योऽन्या पृथिवीति । को हि सत्पुरिसो[2] गन्धादिभ्योऽन्यां पृथिवीं निर्धारयति । व्यपदेशस्तु पृथिव्या गन्धादय इति विशेषणार्थम् । ते ह्येव तदाख्या गन्धादयो यथा विज्ञायेरन्नान्य[3] इति । काष्ठप्रतिमायाः शरीरव्यपदेशवत् ।

सत्यपि च संस्कारविशेषापेक्षत्वे कस्मान्न युगपत् सर्वज्ञानोत्पत्तिः ?

कारणम् ? इत्याह—**प्रतिघातियुतत्वदोषादिति** । प्रतिघातित्वदोषात्, युतत्वदोषाच्च । सप्रतिघत्वप्रसङ्गात्, पृथग्दशत्वप्रसङ्गाच्चेत्यर्थः । यथा चित्रवदरयोः, कुड्यकुण्डयोश्च आधार्याधारभावे प्रतिघातित्वं युतत्वं च दृष्टे, एवमेतेषामपि स्यात् । अनिष्टं चैतत् । अतोऽनात्माश्रयः ।

यथा न गन्धादिभ्योऽन्या पृथिवी । तथा बुद्ध्यादिभ्योऽन्यो न आत्मेति । **को हि सत्पुरुषो गन्धादिभ्योऽन्यां पृथिवीं निर्धारयति** । नहि पृथिवी कतमा ?—इत्युक्ते रूप-गन्ध-रस-स्पर्शेभ्योऽन्या दर्शयितुं शक्यते, यथा रूपं गन्धादिभ्योऽन्यदिति ।

यदि न गन्धादिभ्योऽन्या पृथिवी, कथमयं **व्यपदेशः—पृथिव्यां गन्धादय** इति । अन्येन ह्यन्यस्य व्यपदेशो दृष्टः—चैत्रस्य कम्बल इति । अत उच्यते—**व्यपदेश स्त्वति** विस्तरः ।

विशेषणार्थमिति । अवादिभ्यो विशेषणार्थमित्यर्थः । कथम् ? इति प्रतिपादयति—**ते ह्येवेति** विस्तरः । ते ह्येवेति एवकारस्तद्व्यतिरिक्तपृथिवीद्रव्यनिवृत्त्यर्थः । त एव गन्धादयः । **तदाख्याः** पृथिव्याख्याः । **यथा विज्ञायेरन्**, तथा विशेषणार्थं व्यपदेश इत्यभिसम्बन्धः । **नान्य** इति । नावाद्याख्याः । पृथिव्याख्येभ्योऽन्ये विज्ञायेरन्नित्यर्थः । **काष्ठप्रतिमायाः शरीरव्यपदेशवदिति** । यथा काष्ठप्रतिमायाः 'शरीरम्' इति व्यपदिश्यते । अन्येभ्यो मृण्मयादिविशेषणार्थम् । न च काष्ठप्रतिमायाः शरीरमन्यत् । एवमिहापि व्यपदेशः स्यात्—न च गन्धादिभ्योऽन्या पृथिवीति ।

संस्कारविशेषापेक्षत्व इति । आत्ममनःसंयोगस्य ।

---

१. °युतदोषात्—का० ।
२. स—का० ।
३. प्रतीयेरन्—का० ।

यो हि वलिष्ठस्तेनान्येषां प्रतिवन्धः। स एव वलिष्ठः कस्मान्नित्यं न फलति ? योऽस्य न्यायः सोऽस्तु भावनायाः। आत्मा तु निरर्थकः कल्प्यते।

अवश्यमात्माऽभ्युपगन्तव्यः। स्मृत्यादीनां गुणपदार्थत्वात् तस्य च गुण-पदार्थस्यावश्यं द्रव्याश्रितत्वात् तेषां चान्याश्रयायोगादिति चेत् ? न; न ह्येषां गुणपदार्थत्वं सिद्धम्। सर्वमेव नो विद्यमानं द्रव्यम्; "षट् द्रव्याणि श्रामण्यफलानि" इति वचनात्। नाप्येषां द्रव्याश्रितत्वं सिद्धम्। परीक्षितौ ह्याश्रयार्थः। तस्माद्यत्किञ्चिदेव तत्।

आत्मन्यसति किमर्थः कर्मारम्भः—अहं सुखी स्याम्, अहं दुःखी न स्यामित्येवमर्थः ? कोऽसावहं नाम यद्विषयोऽयमहङ्कारः ? स्कन्धविषयः। कथं ज्ञायते ? तेषु स्नेहात्। गौरादिवुद्धिभिः सामानाधिकरण्यात्तु गौरोऽहम्, अहं श्यामः, स्थूलोऽहम्, अहं कृशः, जीर्णोऽहम्, अहं युवेति गौरादिवुद्धिभिः समानाधिकरणोऽयमहङ्कारो दृश्यते। न चात्मन एते प्रकारा दृश्यन्ते। तस्मादपि स्कन्धेष्वयमिति गम्यते। आत्मन उपकारकेऽपि

यो हि बलिष्ठ इति। संस्कारविशेषः। **तेनान्येषां** संस्कारविशेषाणां **प्रतिबन्धः**।

स एव बलिष्ठः कस्मान्नित्यं न फलतीति। आचार्यवचनम्। स एव पुनराह—**योऽस्य न्यायो** यः संस्कारस्य न्यायो विनाशः, प्रतिवन्धो वा। **सोऽस्तु भावनाया** वीजान्तिकायाः। **आत्मा तु निरर्थको** निष्प्रयोजनः **कल्प्यते**। संस्कारार्था हि तत्कल्पना स्यात्। तस्य च संस्कारस्य यत् कार्यम्, तत् भावनयैव क्रियत इति।

स्मृत्यादीनामिति विस्तरः। स्यान्मतम्—स्मृतिसंस्कारेच्छाद्वेषादीनां **गुणपदार्थत्वात् तस्य च गुणपदार्थस्य अवश्यद्रव्याश्रितत्वात्** द्रव्याश्रयश्च गुणवानित्येवं लक्षणोपदेशात्। **न चैषामन्य आश्रयः** पृथिव्यादिको **युज्यते** अपरप्रत्यक्षत्वादिभिः कारणैः। अतो यः एषामाश्रयः स आत्मा। तस्मा-दस्त्यात्मेति ?

न; असिद्धेः। नैतदेवम्। कस्मात् ? **स्मृत्यादीनां गुणपदार्थत्वा-सिद्धेः**। **विद्यमानं द्रव्यमिति**। यत् स्वलक्षणतो विद्यमानम्, तद् द्रव्यम्। **षट् द्रव्याणि श्रामण्यफलानीति**। रूपस्कन्धादीनि पञ्च स्कन्धानि श्रामण्य-फलानि असंस्कृतं च षष्ठमिति षट् द्रव्याणि भवन्ति। **नाप्येषामिति**। स्मृत्यादीनाम्। **परीक्षितो ह्याश्रयार्थ** इति। "यथा कः कस्याश्रयः, न हि ते चित्रवदरादिवद् आधार्ये" इति विस्तरेण।

शरीर आत्मोपचारो यथा य एवायं स एवाहम्, स एवायं मे भृत्य इति भवत्युपकारकेऽपि आत्मोपचारो न त्वहंकारः। सति शरीरालम्बनत्वे पर-शरीरालम्बनोऽपि कस्मान्न भवति ? असम्बन्धात्। येनैव हि सहास्य सम्बन्धः कायेन चित्तेन वा तत्रैवायमहंकार उत्पद्यते, नान्यत्र; अनादौ संसार एवमभ्यासात्। कश्च सम्बन्धः ? कार्यकारणभावः।

यद्यात्मा नास्ति, कस्यायमहंकारः ? इदं पुनस्तदेवायातम्—'किमर्थैषा षष्ठीति ? यावद्य एवास्य हेतुस्तस्यैवायम्' इति। कश्चान्यो हेतुः ? पूर्वाहङ्कारपरिभावितं स्वसन्ततिविषयं सावद्यं चित्तम्।

असत्यात्मनि क एष सुखितो दुःखितो वा ? यस्मिन्नाश्रये सुखमुत्पन्नं दुखं वा। यथा पुष्पितो वृक्षः, फलितं वनमिति। कः पुनरनयोराश्रयः ? षडायतनम्। यथा कृत्वा तथोक्तम्।

एते प्रकारा इति। गौरादिप्रकाराः। **स्कन्धेष्वयमिति**। अहङ्कारः। **न त्वहङ्कार इति**। न तु 'अहम्' इत्येवमाकारः प्रत्यय इत्यर्थः।

इदं पुनस्तदेवायातम् इति। किमर्थैषा षष्ठी ? स्वाम्यर्था। यथा कः कस्य[1] स्वामी। यथा गोश्चैत्रः, कथमसौ तस्याः स्वामी। तदधीनो हि तस्यावाहदोहादिषु विनियोगः। क्व च पुनरहङ्कारो विनियोक्तव्यो यत एतस्य स्वामी मृग्यते ? अहङ्कर्तव्येऽर्थे। किमर्थं विनियोक्तव्यः ? अहङ्कारार्थम्। अहो सूक्तानि सुखैधितानाम्! स एव हि नाम तदर्थं विनियोक्तव्य इति। कथं च विनियोक्तव्यः ? उत्पादनतः, आहोस्वित् सम्प्रेषणतः। अहङ्कारगत्ययोगात् उत्पादनतः। हेतुरेव तर्हि स्वामी प्राप्नोति, फलमेव च स्वम्; यस्माद्धेतोराधिपत्यं फले। फलेन च तद्वान् हेतुरिति।

य एवास्य हेतुरहङ्कारस्य तस्यैवायमिति। **पुष्पितो वृक्ष इति** दृष्टान्तः। यत्र सिद्धान्ते वृक्षावयवो नेष्यते, विजातीयश्चतुर्महाभूतकाया-रम्भणमोष्टे। यत्र तु वृक्षावयवो अस्ति, तत्र द्वितीयो दृष्टान्तः—**फलितं वनमिति**। न हि वनं नाम किञ्चिदस्ति। यथा यस्मिन् वने फलमुत्पन्नम्, तत् फलितमित्युच्यते। यथा यस्मिन्नाश्रये षडायतनलक्षणे सुखमुत्पन्नं दुःखं वा, स सुखितो दुःखितो वा। **तथोक्तमिति**। यथा आश्रयः षडायतनं तथोक्तम्।

---

१. कस्यो—जा०।

असत्यात्मनि क एषां कर्मणां कर्ता, कश्च फलानां भोक्ता भवति ? कर्तेति । क एष बाह्यार्थः ? करोतीति कर्ता । भुङ्क्त इति भोक्ता । पर्याय उच्यते, नार्थः । "स्वतन्त्रः कर्ता" (पा० १.४.५४) इति कर्तृलक्षणमाचक्षते **लाक्षणिकाः** । अस्ति पुनः क्वचिदेव कार्ये कस्यचित् स्वातन्त्र्यम् । लोके दृष्टं देवदत्तस्य स्नानासनगमनादौ । कः पुनर्भवान् देवदत्तमुदाहरति ? यद्यात्मानम् ? स एव साध्यः । अथ पञ्चस्कन्धकम् ? स एव कर्ता । त्रिविधं चेदं कर्म कायवाङ्मनस्कर्म । तत्र कायकर्मणि तावत् कायस्य चित्तपरतन्त्रा वृत्तिः । चित्तस्यापि काये स्वकारणपरतन्त्रा वृत्तिः, तस्याप्येवमिति नास्ति कस्यचिदपि[1] स्वातन्त्र्यम् । प्रत्ययपरतन्त्रा हि सर्वे भावाः प्रवर्तन्ते । आत्मनोऽपि च निरपेक्षस्याकारणत्वाभ्युपगमान्न स्वातन्त्र्यं सिध्यति । तस्मान्नैवंलक्षण उपलभ्यते कश्चित् कर्ता ।

यत्तु यस्य प्रधानकारणं[2] तत्तस्य कर्तेत्युच्यते । न च आत्मनः

"तद्विकारविकारित्वादाश्रयाश्चक्षुरादयः" (अभि० को० १.४४) इति ।

अथ पञ्चस्कन्धकम् । भवानुदाहरतीत्यधिकृतम् । स एव कर्तेति । स एव पञ्चस्कन्धलक्षणः कर्ता, नात्मा इति सिद्धो नः पक्षः । तत्रापि स्वातन्त्र्यं नास्तीति दर्शयन्नाह—**त्रिविधं चेदं कर्मति** विस्तरः । **कायस्य चित्तपरतन्त्रा वृत्तिः** चित्तप्रवर्तित्वात् कायकर्मणः । **चित्तस्यापि काये वृत्तिः स्वकारणपरतन्त्रा**; मनोधर्ममनस्कारादिपरतन्त्रत्वात् तस्याप्येवं तस्य चित्तपरतन्त्रस्य स्वकारणपरतन्त्रा वृत्तिरिति **नास्ति कस्यचिदपि स्वातन्त्र्यं** कायस्य, चित्तस्य, चित्तकारणस्यान्यस्य वा । **प्रत्ययपरतन्त्रा हि सर्वे भावाः** ।

"चतुर्भिश्चित्तचैत्ता हि समापत्तिद्वयं त्रिभिः ।

द्वाभ्यामन्ये तु जायन्ते" (अभि० को० २.६५) इति वचनात् ।

आत्मनोऽपि च निरपेक्षस्य बुद्धिविशेषाद्युत्पत्तावकारणत्वाभ्युपगमान्न **स्वातन्त्र्यं सिद्धचति** । **तस्मान्नैवंलक्षण** इति । स्वतन्त्रः कर्तेति ।

एवं तर्हि कः[3] कर्तेत्याह—**यत्तु यस्य प्रधानकारणं तत् तस्य कर्ते**-

---

१. कस्यचित्—का० । २. प्रधानं कारणं—का० ।

३. जा० पुस्तके नास्ति ।

क्वचिदपि कारणत्वं दृश्यते। तस्मात् स एवमपि न कर्ता युज्यते। स्मृतितो[1] हि च्छन्दः, च्छन्दाद्[2] वितर्कः, वितर्कात् प्रयत्नः, प्रयत्नाद्वायुः, ततः कर्मेति किमत्रात्मा कुरुते!

फलस्यापि च क उपभोगो यमयमात्मा कुर्वन्नुपभोक्ता कल्प्यते?

उपलब्धिरिति चेत्? नात्मनः उपलब्धौ सामर्थ्यम्; विज्ञाने प्रतिषेधात्।

असत्यात्मनि कस्मादसत्त्वाधिष्ठानः पापपुण्योपचयो न भवति; वेदनाद्यनाश्रयत्वात्। तदाश्रयश्च षडायतनम्, नात्मा यथा तथोक्तम्।

कथमसत्यात्मनि विनष्टात् कर्मण आयत्यां फलोत्पत्तिः? आत्मन्यपि सति कथं विनष्टात् कर्मण आयत्यां फलोत्पत्तिः? तदाश्रिताद्धर्माधर्मात्। यथा कः किमाश्रित इत्युक्तोत्तरैषा वाचोयुक्तिः। तस्मादनाश्रितादेव धर्माधर्मात् भवतु। नैव तु वयं विनष्टात् कर्मण आयत्यां फलोत्पत्तिं ब्रूमः। किं तर्हि? तत्सन्ततिपरिणामविशेषाद्, बीजफलवत्।

यथा बीजात् फलमुत्पद्यत इत्युच्यते। न च तद्विनष्टाद् बीजादुत्पद्यते। नाप्यनन्तरमेव। किं तर्हि? तत्सन्ततिपरिणामविशेषादङ्कुरकाण्डपत्रादि-

---

त्युच्यते। प्रावान्ये तत्प्रतीत्योत्पत्तेः। स एवमपि कर्ता न युज्यते। प्रधानकारणभावेनापि न युज्यत इत्यर्थः।

तस्याकारणत्वमुपदर्शयन्नाह—स्मृतितो हि छन्द इति विस्तरः। पूर्वस्मर्तव्येऽर्थे स्मृतिरुत्पद्यते। स्मृतेश्छन्दः, कर्तुकामता। छन्दाद् वितर्कः चेतनाविशेषोऽभिसंस्कारलक्षणः, प्रज्ञाविशेषो वा योगाचारनयेन। वैभाषिकनयेन तु अभिरूपणविकल्पलक्षणः। वितर्कात् प्रयत्नः। वीर्यम्! प्रयत्नाद् वायुः। ततो वायोः कर्म देशान्तरोत्पत्तिलक्षणमिति। किमत्रात्मा कुरुते!

विज्ञाने प्रतिषेधादिति। यैवोपलब्धिः तदेव विज्ञानम्। विज्ञाने च आत्मनः सामर्थ्यं प्रतिषिद्धम्। चित्ताद् एवास्तु संस्कारविशेषापेक्षात्। न हि किञ्चिदात्मन उपलभ्यते सामर्थ्यम्। औपधकार्यसिद्धाविव कुहकवैद्यफूःस्वाहानामिति।

यथा तथोक्तमिति।

क्रमनिष्पन्नात् पुष्पावसानात्। तत् पुनः पुष्पान्निष्पन्नं कस्मात्तस्य वीजस्य फलमित्युच्यते। तदाहितं हि तत् परयापुष्पे सामर्थ्यम्। यदि हि तत्-पूर्वकान्नाभविष्यत्, तत्तादृशस्य फलस्योत्पत्तौ न समर्थमभविष्यत्। एवं कर्मणः फलमुत्पद्यत इत्युच्यते। न च तद्विनष्टात् कर्मण उत्पद्यते, नाप्य-नन्तरमेव। किं तर्हि? तसत्ततिपरिणामविशेषात्।

का पुनः सन्ततिः, कः परिणामः, को विशेषः? यः कर्मपूर्व उत्त-रोत्तरचित्तप्रसवः सा सन्ततिः। तस्या अन्यथोत्पत्तिः परिणामः। स पुनर्योऽनन्तरं फलोत्पादनसमर्थः सोऽन्त्यपरिणामविशिष्टत्वात् परिणाम-विशेषः। तद्यथा सोपादानं मरणचित्तं पुनर्भवस्य। त्रिविधकर्मपूर्वकत्वेऽपि यत्कर्म गुरु वा भवत्यासन्नमभ्यस्तं वा तत्कृतं सामर्थ्यं द्योत्यते, न त्वन्यस्य। यथोक्तम्[1]—

"यद् गुरु यच्चासन्नं यच्चाभ्यस्तं कृतं च यत् पूर्वम्[2]।
पूर्वं पूर्वं पूर्वं विपच्यते कर्मसंसारे"॥

तत्र विपाकहेत्वाहितं तु विपाकफलदानसामर्थ्यं विपाकं दत्त्वा विनि-वर्तते। सभागहेत्वाहितं तु निष्यन्दफलदानसामर्थ्यं क्लिष्टानां प्रतिपक्षोदयाद् विनिवर्तते। अक्लिष्टानां चित्तसन्तानात्यन्तविनिवृत्तेर्यदा परिनिर्वाति।

अथ कस्माद्विपाकाद् विपाकान्तरं नोपद्यते? वीजफलादिव फलान्तरम् न तावत् दृष्टान्तेन सर्वं समानं भवति। तत्रापि तु न फलादेव पुन फलान्तरमुत्पद्यते। किं तर्हि? विकिलत्तिविशेषजाद् विकारविशेषात्। यं

कथं तर्हीति विस्तरः। **तदाहितं हि तदिति**। तेन वीजेन आहितं तत्सामर्थ्य मित्यर्थः। **यथोक्तमिति**। स्थविरराहुलेन।

यद् गुरु यच्चासन्नमिति विस्तरः। एकस्मिन् सन्ताने चत्वारि कर्माणि—गुरु, आसन्नम्, अभ्यस्तम्, पूर्वकृतं च। एषां चतुर्णां गुरुक पूर्वकमिति त्रिभ्यस्तत् पूर्वं विपच्यते। आसन्नाभ्यस्तपूर्वकृतानामपि आसन्न पूर्वम्, तत् पूर्वं द्वाभ्यां विपच्यते। अभ्यस्तपूर्वकृतयोश्च अभ्यस्तं पूर्वं इति एकस्मात् पूर्वं विपच्यते। असत्स्वेतेषु पूर्वजन्मकृतं विपच्यते अप पर्यायवेदनीयम्।

अक्लिष्टानामिति। कुशलानाम्, अनिवृताव्याकृतानां च। **विकिलत्ति विशेषजादिति**। भूम्युदकसम्बन्धात् फलस्य सूक्ष्मो विकारो विकिलत्तिः

---

१. आह च—का०। २. का० पुस्तके नास्ति।

हि तत्र भूतप्रकाराङ्कुरं निर्वर्तयति स तस्य वीजम्, नान्यः। भाविन्या तु संज्ञया सादृश्याद्वा पूर्वकोऽपि सन्तानो वीजमित्याख्यायते। एवमिहापि तस्माद् विपाकाद् यदि सदसद्धर्मश्रवणादिप्रत्ययविशेषजः कुशलसास्रवोऽकुशलो वा चित्तविकार उत्पद्यते, तस्मात् पुनर्विकारान्तरमुत्पद्यते, नान्यथेति समानमेतत्।

अथवा पुनरेतदेवं विज्ञातव्यम्—यथा लाक्षारसरञ्जितात् मातुलुङ्ग-पुष्पात् संततिपरिणामविशेषजः फले रक्तः केशर उपजायते, न च तस्मात् पुनरन्यः। एवं कर्मजाद्विपाकात्, न पुनर्विपाकान्तरमिति।

यथास्थूलमिदमस्मद्बुद्धिगम्यं दर्शितम्। नानाविधशक्तिभिन्नैस्तु कर्मभिरविवासिताः सन्ततय एतामवस्थां गता ईदृशं फलमभिनिवर्तयन्तीति बुद्धानामेव विषयः।

आह खल्वपि—

तस्य विशेषः स एवातिविप्रकृष्टः। तस्माज्जातो विकारविशेषः। तस्मात्। फलान्तरमुत्पद्यते। कीदृशाद्विकारविशेषात्? इति दर्शयन्नाह—यो हि तत्र भूतप्रकाराङ्कुरं निर्वर्तयति स तस्य बीजम्। नान्यो भूतप्रकारः। न पूर्व-बीजावस्थो भूतप्रकार इत्यर्थः। भाविन्या[1] तु संज्ञयेति। 'ओदनं पचति' 'सक्तुं पिनष्टि' इति यया भाविन्या संज्ञया व्यपदेशः, एवं पूर्वकोऽपि सन्तानः अविकिलन्नबीजावस्थः बीजमित्याख्यायते भाविन्यान्यया संज्ञयेति। सादृश्याद्वेति। विकिलन्नविशेषजेन भूतविकारविशेषेण सदृशः। स पूर्वकः सन्तान इति कृत्वा 'बीजम्' इत्याख्यायते। एवमिहापीति विस्तरः। यदि सद्धर्मश्रवणयोनिशोमनस्कारप्रत्ययविशेषाज्जातः कुशलसास्रवश्चित्तविकार उत्पद्यते। असद्धर्मश्रवणयोनिशोमनस्कारप्रत्ययविशेषाज्जातः अकुशलो वा चित्तविकार उत्पद्यते। तस्मात् तद्विपाकान्तरमुत्पद्यते। नान्यथेति समान-मेतत्। यथा न फलादेव फलान्तरमुत्पद्यते, किं तर्हि? विकारविशेषात्; एवं न विपाकादेव विपाकान्तरमुत्पद्यते, किं तर्हि? चित्तविकारविशेषात् उत्पद्यते इति तुल्यमेतत्।

फले रक्तः केशर इति। फलाभ्यन्तरे केशरः। यत्र बीजपूरकरस अभ्योऽवतिष्ठते। न च स तस्मात् पुनरन्य इति। न रसरक्तः केशरस्तस्मा-दुक्तात् केशरात् पुनरुपजायते। किं तर्हि? प्राकृत एवारक्तः केशर उपजायत इत्यर्थः। इदमत्रोदाहरणम्। यथा लाक्षारसरक्तमातुलुङ्गपुष्पफलाद् रक्त-केशरान्न रक्तं केशरान्तरं पुनर्भवति। एवं कर्मजाद्विपाकान्न पुनर्विपाकान्तर-मिति। आह चात्र—

---

१. भाविन्या—ज्ञा०।

"कर्म तद्भावनां तस्या वृत्तिलाभं ततः फलम् ।
नियमेन प्रजानाति बुद्धादन्यो न सर्वथा ।।

इत्येतां सुविहितहेतुमार्गशुद्धां
बुद्धानां प्रवचनधर्मतां निशम्य ।
अन्धानां विविधकुदृष्टिचेष्टितानां
तीर्थ्यानां मतपविध्य यान्त्यनन्धाः ।।

"चित्तं ह्येतदनन्तबीजसहितं सन्तानतो वर्तते,
तत्तद् बीजमुपैति पुष्टिमुदिते स्वे प्रत्यये चेतसि ।
तत् पुष्टं द्रुमलाभवृत्ति फलदं कालेन सम्पद्यते,
रङ्गस्यैव हि मातुलुङ्गकुसुमेऽन्यस्तस्य तत्केसरे" ।।

पुनराह—

"कर्पासबीजे पुष्पे च मातुलुङ्गस्य रञ्जिते ।
लाक्षया जायते रक्तं यथा कर्पासकेसरम् ।।
तस्मिन्नस्तमिते रङ्गे सन्तानाद् भावितक्रमात् ।
कर्मण्यस्तमिते चैव भावनातः फलोदयः" ।। इति ।

कर्मेति सर्वम् । **तद्भावनाम्** कर्मभावनाम् । **तस्याः** भावनायाः । **वृत्तिलाभम्** । तद्वृत्तं लाभम् । **ततः** तद्वृत्तिलाभात् । **फलम्** इत्येतच्चतुष्टयम् **नियमेन** यदृच्छया **बुद्धादन्यः** श्रावकादिः **सर्वथा सर्वकारं न प्रजानाति** । अर्थादुक्तं भवति—बुद्ध एव तत्सर्वं सर्वथा प्रजानातीति ।

इत्येतामिति विस्तरः । इति-करणः समाप्त्यर्थः । प्रदर्शनार्थो वा । **एतां बुद्धानां प्रवचनधर्मतां सुविहितेन** हेतोः मार्गेण **हेतुमार्गेण शुद्धां निरवद्यां निशम्य** दृष्ट्वा । **अन्धाः** तीर्थ्याः यथाभूतदर्शनवैकल्यात् । कुत्सिता दृष्टिः कुदृष्टिः, तस्याः चेष्टितानि कुदृष्टिचेष्टितानि, विविधानि कुदृष्टिचेष्टितानि एषामिति **विविधकुदृष्टिचेष्टिताः** स्वर्गापवर्गहेत्वप्रतिपन्ना मिथ्याप्रतिपन्नाश्चेत्यर्थः । तेषामेवंविधानां **तीर्थ्यानां कपिलोलूकादीनाम्, मतं दर्शनम् अपविध्य** त्यक्त्वा यान्ति संसारान्निर्वाणमिति वाक्याध्याहारः । के ते सत्त्वाः ? प्रज्ञाचक्षुष्मन्त आर्यश्रावकाः ।

अथ वा तमेव प्रवचनधर्मतां यान्ति प्रतिपद्यन्त इत्यर्थः । प्रवचन-धर्मता पुनरत्र नैरात्म्यम्, बुद्धानुशासनी वा ।

इमां हि निर्वाणपुरैकवर्तिनीं तथागतादित्यवचोंऽशुभास्वतीम् ।
निरात्मतामार्यसहस्रवाहितां न मन्दचक्षुर्विवृतामपीक्षते ॥

इति दिङ्मात्रमेवेदमुपदिष्टं सुमेधसाम् ।
व्रणदेशो विषस्येव स्वसामर्थ्यविसर्पिणः[२] ॥ इति ।

अन्य आहुः—प्रवचनं सूत्रादिद्वादशाङ्गवचोगतम् । तस्य धर्मता स्वाख्यातता, युक्त्युपेतत्वात् । निर्वाणधर्मता च निर्वाणद्योतनात् । यथोक्तम्—"सर्व इमे धर्माः निर्वाणप्रवणाः, निर्वाणप्राग्भाराः निर्वाणमेवाभिवदन्तोऽभिवदन्ति । अनात्मसंज्ञिनश्च निर्वाणे शान्तसंज्ञिनः सन्तिष्ठन्ते; आत्मोच्छेदशङ्कापगमात्" इति । तदेवमनन्धा एव यान्ति, नान्धाः । अन्धास्तु भ्रमन्त्येव संसारार्णवे नैरात्म्यमपश्यन्तः । तद्दर्शयन्नाह—**इमां** हीति विस्तरः । इयं निरात्मता । निर्वाणमेव पुरं **निर्वाणपुरम्** । तस्यैका **वर्तिनी**ति निर्वाणपुरैकमार्गः । नान्यो मार्ग इत्यर्थः । तथागत एवादित्यो गम्भीरधर्माभिप्रकाशकत्वादादित्यभूतस्तथागतः, तस्य वचांसि तान्येवांशवः, तैर्भास्वती आलोकवती **तथागतादित्यवचोंशुभास्वती** । आर्याणां सहस्रैर्वाहितेति **आर्यसहस्रवाहिता** । **विवृतामपी**ति । तामिमां निर्वाणपुरैकवर्तिनीं तथागतादित्यवचोंऽशुभास्वतीं विवृतामपि निरात्मताम् । प्रज्ञाचक्षुषो विशदस्याभावादविद्याकोशपटलपर्यवनद्धनेत्रत्वाद्वा **मन्दचक्षुः** तीर्थिको वात्सीपुत्रीयो वापि **नेक्षते** । त्रयश्चेह मार्गगुणाः वर्ण्यन्ते । तद्यथा—१. एकायनता, अभिप्रेतदेशप्रयाणात् । २. सालोकता, यतो निःशङ्को गच्छति । ३. यातानुयातता च, परिमर्दितस्थाणुकण्टकादित्वात् येन सुखं गच्छति । तत्साधर्म्येणेयं निरात्मतावर्तिनी द्रष्टव्या । चतुर्भिश्च कारणैर्मार्गो न विद्यते—१. सत्त्वानुत्तमस्कतया, २. प्रकाशितोऽप्यादित्येनावाहिततया, ३. बहुपुरुषवाहितोऽप्यावृततया, ४. विवृतोऽपि द्रष्टुः मन्दचक्षुष्कतयेति ।

तेषामिहैकमेव कारणमस्य मार्गस्यादर्शन उक्तम्; यतो द्रष्टुः दोषेणैवायं मार्गो न दृश्यते । मार्गदोषेणेति । यत एष मन्दचक्षुः एतां न पश्यन्तीति अवगन्तव्यम् ।

इति दिङ्मात्रमेवेदमिति । सर्वमिति यथोक्तम् । दिगेव दिङ्मात्रम् । एवकारार्थो मात्रशब्दः । दिक् प्रमाणमस्येति दिङ्मात्रमिति वा । महतोऽभिधर्मशास्त्रादल्पमिदमुपदिष्टम् । मयेति वाक्यशेषः । केषाम् ?

पुद्गलकोशमभिधर्मकोशभाष्यं समाप्तमिति ।
कृतरियमाचार्यवसुबन्धुपादानामिति[1]

सुमेधसाम् । मतिमतामित्यर्थः । तादर्थ्ये षष्ठी । किंवद् ? इत्याह—व्रणदेशो विषस्येव स्वसामर्थ्यविसर्पिणः इति । यथा विषं स्वसामर्थ्याद् व्रणदेशं प्राप्य सर्वेष्वङ्गप्रत्यङ्गेष्वत्यन्तं विसर्पतीति मत्वा केनचित् तस्य व्रणदेशः कृतः—कथं नामेदं विसर्पतीति । एवं सुमेधसः स्वसामर्थ्यविसर्पित्वाद् विषस्थानीयः—इत्यतस्तेषां सुमेधसाम् उद्घटितज्ञानां प्राज्ञानामिदमुपदिष्टं मया । कथम् ? अल्पेन ग्रन्थेन महद् अभिधर्मशास्त्रम् काश्मीरवैभाषिकनीतिसिद्धमर्थतः प्रतिपद्येरन्निति ।

अपरे पुनर्व्याचक्षते—इति दिङ्मात्रमेवेदमिति । इदमेव नैरात्म्यप्रतिवेधमधिकृत्योक्तमिति; "काश्मीरवैभाषिकनीतिसिद्धः प्रायो मयायं कथितोऽभिधर्मः" इत्यनेनैवार्थस्याभिहितत्वादिति ।

समाप्तश्चाष्टमकोशस्थानसम्बद्ध एव
पुद्गलविनिश्चयः

नानाभिधर्मार्थकरण्डभूत-
मेतद् विवृ····· रः ····· ।
प्रसूततृष्णायमृतमद्भुतयोनिभूतम् ।
व्याख्यापदार्ककिरणैः स्फुटितं मदीयैः
शास्त्राम्बुजं बुधजनभ्रमरा भजन्ताम् ।।

योऽधीत्य सर्वशास्त्राणि विद्वद्यशाः यशोमित्रः ।
स इमां कृतवान् व्याख्यां व्याख्यास्वन्यास्वसन्तुष्टः ।।

तेन श्रीभारतीभर्त्रा परमार्थागमा व्याख्या ।
इयं देवरूपस्य देवकल्पस्य कल्पिता ।।

आचार्ययशोमित्रकृतायां स्फुटार्थायाम्
अभिधर्मकोशव्याख्यायाम्
अष्टमं कोशस्थानं समाप्तमिति[2]
शुभम्

---

१. देववर्मोऽयं प्रवरमहायानसकलतथागतशासनबूर्द्धरस्य उत्तरापथिकपण्डितस्यविरस्त्रीलामावाकस्य यदत्र पुण्यमित्यादि—का० ।

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवंवादी महाश्रमणः ॥

परिशिष्टम्

अभिधर्मकोशस्य मूलपाठः

सप्तमं कोशस्थानम्

(ज्ञाननिर्देशः)

नामलाः क्षान्तयो ज्ञानं क्षयानुत्पादधीर्न दृक् ।
तदन्योभयथार्या धीरन्या ज्ञानं दृशश्च षट् ॥ १ ॥
सास्रवानास्रवं ज्ञानमाद्यं संवृतिज्ञापकम् ।
अनास्रवं द्विधा धर्मज्ञानमन्वयमेव च ॥ २ ॥
सांवृतं सर्वविषयं कामदुःखादिगोचरम् ।
धर्माख्यमन्वयज्ञानं तूर्ध्वदुःखादिगोचरम् ॥ ३ ॥
ते एव सत्यभेदेन चत्वार्यार्यते चतुर्विधे ।
अनुत्पादक्षयज्ञाने ते पुनः प्रथमोदिते ॥ ४ ॥
दुःखहेत्वन्वयज्ञाने चतुर्थ्यः परिचित्तवित् ।
भूम्यक्षपुद्गलोत्क्रान्तं नष्टाजातं न वेत्ति तत् ॥ ५ ॥
न धर्मान्वयधीपक्ष्यमन्योन्यं दर्शनक्षणौ ।
श्रावको वेत्ति खड्गस्त्रोन् सर्वान् बुद्धोऽप्रयोगतः ॥ ६ ॥
क्षयज्ञानं हि सत्येषु परिज्ञातादिनिश्चयः ।
न परिज्ञेयमित्यादिरनुत्पादमतिर्मता ॥ ७ ॥
स्वभावप्रतिपक्षाभ्यामाकाराकारगोचरात् ।
प्रयोगकृतकृत्यत्वहेतूपचयतो दश ॥ ८ ॥
धर्मज्ञानं निरोधे यन्मार्गे वा भावनापथे ।
त्रिधातुप्रतिपक्षस्तत् कामधातोस्तु नान्वयम् ॥ ९ ॥
धर्मज्ञानान्वयज्ञानं षोडशाकारमन्यथा ।
तथा च सांवृतं स्वैः स्वैः सत्याकारैश्चतुष्टयम् ॥ १० ॥
तथा परमनोज्ञानं निर्मलं समलं पुनः ।
ज्ञेयस्वलक्षणाकारमेकैकद्रव्यगोचरम् ॥ ११ ॥
शेषे चतुर्दशाकारे शून्यानात्मविवर्जिते ।
नामलः षोडशेभ्योऽन्य आकारोऽन्येऽस्ति शास्त्रतः ॥ १२ ॥
द्रव्यतः षोडशाकाराः प्रज्ञाकारस्तया सह ।
आकारयन्ति सालम्बाः सर्वमाकार्यते तु सत् ॥ १३ ॥

त्रिधाद्यं कुशलान्यन्यान्याद्यं सर्वासु भूमिषु ।
धर्माद्यं षट्सु नवसु त्वन्वयाख्यं तथैव षट् ।। १४ ।।
ध्यानेष्वन्यमनोज्ञानं कामरूपाश्रयं च तत् ।
कामाश्रयं तु धर्माख्यमन्यत् त्रैधातुकाश्रयम् ।। १५ ।।
स्मृत्युपस्थानमेकं धीर्निरोधे परचित्तधीः ।
त्रीणि चत्वारि शेषाणि धर्मधीगोचरो नव ।। १६ ।।
नव मार्गान्वयधियोर्दुःखहेतुधियोर्द्वयम् ।
चतुर्णां दश नैकस्य योज्या धर्माः पुनर्दश ।। १७ ।।
त्रैधातुकामला धर्मा अकृताश्च द्विधा द्विधा ।
सांवृतं स्वकलापान्यदेकं विद्यादनात्मतः ।। १८ ।।
एकज्ञानान्वितो रागी प्रथमेऽनास्रवक्षणे ।
द्वितीये त्रिभिरूर्ध्वस्तु चतुर्व्वेकैकवृद्धिमान् ।। १९ ।।
यथोत्पन्नानि भाव्यन्ते क्षान्तिज्ञानानि दर्शने ।
अनागतानि तत्रैव सांवृतं चान्वयत्रये ।। २० ।।
अतोऽभिसमयान्त्याख्यं तदानुत्पत्तिधर्मकम् ।
स्वाधोभूमिनिरोधेऽन्त्यं स्वसत्याकारं यात्निकम् ।। २१ ।।
षोडशे षट् सरागस्य वीतरागस्य सप्त तु ।
सरागभावना मार्गे तदूर्ध्वं सप्तभावना ।। २२ ।।
सप्तभूमिजयाऽभिज्ञाकोप्याप्ताकीर्णभाविते ।
आनन्तर्यपथेषूर्ध्वं मुक्तिमार्गाष्टकेऽपि च ।। २३ ।।
शैक्षोत्तापनमुक्तौ वा षट्सप्तज्ञानभावना ।
आनन्तर्यपथे षण्णां भवाग्रविजये तथा ।। २४ ।।
नवानां तु क्षयज्ञानेऽकोप्यस्य दशभावना ।
तत्सञ्चारेऽन्त्यमुक्तौ च प्रोक्तशेषेऽष्टभावना ।। २५ ।।
यद्वैराग्याय यल्लाभस्तत्र चावश्च भाव्यते ।
सास्रवाश्च क्षयज्ञाने लब्धपूर्वं न भाव्यते ।। २६ ।।
प्रतिलम्भनिषेवाख्ये शुभसंस्कृतभावने ।
प्रतिपक्षविनिर्घातविभावने सास्रवस्य तु ।। २७ ।।
अष्टादशावेणिकास्तु बुद्धधर्मा बलादयः ।
स्थानास्थाने दशज्ञानान्यष्टौ कर्मफले नव ।। २८ ।।
ध्यानाद्यक्षाविमोक्षेषु वाती च प्रतिपत्स त ।

प्राङ्निवासच्युतोत्पादवलध्यानेषु शेषितम् ।
सर्वभूमिषु केनास्य वलमव्याहतं यतः ।। ३० ।।
नारायणं वलं काये सन्धिष्वन्ये दशाधिकम् ।
हस्त्यादिसप्तकवलं स्प्रष्टव्यायतनं च तत् ।। ३१ ।।
वैशारद्यं चतुर्धा तु यथाद्यदशमे वले ।
द्वितीयसप्तमे चैव स्मृतिप्रज्ञात्मकं त्रयम् ।। ३२ ।।
महाकृपा संवृतिधीः सम्भाराकारगोचरैः ।
समत्वादाधिमात्र्याच्च नानाकरणमष्टधा ।। ३३ ।।
सम्भारधर्मकायाभ्यां जगतश्चार्थचर्यया ।
समता सर्ववुद्धानां नायुर्जातिप्रमाणतः ।। ३४ ।।
शिष्यसाधारणा अन्ये धर्माः केचित् पृथग्जनैः ।
अरणाप्रणिधिज्ञानप्रतिसंविद्गुणादयः ।। ३५ ।।
संवृतिज्ञानमरणा, ध्यानेऽन्त्येऽक्रोप्यधर्मणः ।
नृजानुत्पन्नकामाप्तसवस्तुक्लेशगोचराः ।। ३६ ।।
तथैव प्रणिधिज्ञानं सवलिम्वं तु तत् तथा ।
धर्मार्थयोर्निरुक्तौ च प्रतिभाने च संविदः ।। ३७ ।।
तिस्रो नामार्थवाग्ज्ञानमविवर्त्यं यथाक्रमम् ।
चतुर्थी युक्तमुक्ताभिलापमार्गवशित्वयोः ।। ३८ ।।
वाङ्मार्गालम्वना चासौ नव ज्ञानानि सर्वभूः ।
दश षड्वार्थसंवित् सा सर्वत्रान्ये तु सांवृतम् ।। ३९ ।।
कामध्यानेषु धर्मे वित् वाचि प्रथमकामयोः ।
विकलाभिर्न तल्लाभी षडेते प्रान्तकोटिकाः ।। ४० ।।
तत् षड्विधं ध्यानमन्त्यं सर्वभूम्यनुलोमितम् ।
वृद्धिकाष्ठागतं तच्च वुद्धान्यस्य प्रयोगजाः ।। ४१ ।।
ऋद्धिश्रोत्रमनःपूर्वजन्मच्युत्युदयक्षये ।
ज्ञानसाक्षीक्रियाभिज्ञा षड्विधा मुक्तिमार्गधीः ।। ४२ ।।
चतस्रः संवृतिज्ञानं चेतसि ज्ञानपञ्चकम् ।
क्षयाभिज्ञा वलं यद्वत् पञ्च ध्यानचतुष्टये ।। ४३ ।।
स्वाधोभूविषया लभ्या उचितास्तु विरागतः ।
तृतीया त्रीण्युपस्थानान्याद्यं श्रोत्रर्धिचक्षुषि ।। ४४ ।।
अव्याकृते श्रोत्रचक्षुरभिज्ञे इतराः शुभाः ।
तिस्रो विद्या अविद्यायाः पूर्वान्तादौ निवर्तनात् ।। ४५ ।।

त्रिधाद्यं कुशलान्यन्यान्याद्यं सर्वासु भूमिषु ।
धर्माद्यं षट्सु नवसु त्वन्वयाख्यं तथैव षट् ।। १४ ।।
ध्यानेष्वन्यमनोज्ञानं कामरूपाश्रयं च तत् ।
कामाश्रयं तु धर्माख्यमन्यत् त्रैधातुकाश्रयम् ।। १५ ।।
स्मृत्युपस्थानमेकं धीर्निरोधे परचित्तधीः ।
त्रीणि चत्वारि शेषाणि धर्मधीगोचरो नव ।। १६ ।।
नव मार्गान्वयधियोर्दुःखहेतुधियोर्द्वयम् ।
चतुर्णां दश नैकस्य योज्या धर्माः पुनर्दश ।। १७ ।।
त्रैधातुकामला धर्मा अकृताश्च द्विधा द्विधा ।
सांवृतं स्वकलापान्यदेकं विद्यादनात्मतः ।। १८ ।।
एकज्ञानान्वितो रागी प्रथमेऽनास्रवक्षणे ।
द्वितीये त्रिभिरूर्ध्वस्तु चतुर्भ्वेकैकवृद्धिमान् ।। १९ ।।
यथोत्पन्नानि भाव्यन्ते क्षान्तिज्ञानानि दर्शने ।
अनागतानि तत्रैव सांवृतं चान्वयत्रये ।। २० ।।
अतोऽभिसमयान्त्याख्यं तदानुत्पत्तिधर्मकम् ।
स्वाधोभूमिनिरोधेऽन्त्यं स्वसत्याकारं यात्निकम् ।। २१ ।।
षोडशे षट् सरागस्य वीतरागस्य सप्त तु ।
सरागभावना मार्गे तदूर्ध्वं सप्तभावना ।। २२ ।।
सप्तभूमिजयाऽभिज्ञाकोप्याप्ताकीर्णभाविते ।
आनन्तर्यपथेषूर्ध्वं मुक्तिमार्गाष्टकेऽपि च ।। २३ ।।
शैक्षोत्तापनमुक्तौ वा षट्सप्तज्ञानभावना ।
आनन्तर्यपथे षण्णां भवाग्रविजये तथा ।। २४ ।।
नवानां तु क्षयज्ञानेऽकोप्यस्य दशभावना ।
तत्सञ्चारेऽन्त्यमुक्तौ च प्रोक्तशेषेऽष्टभावना ।। २५ ।।
यद्वैराग्याय यल्लाभस्तत्र चावश्च भाव्यते ।
सास्रवाश्च क्षयज्ञाने लब्धपूर्वं न भाव्यते ।। २६ ।।
प्रतिलम्भनिषेवाख्ये शुभसंस्कृतभावने ।
प्रतिपक्षविनिर्घातविभावने सास्रवस्य तु ।। २७ ।।
अष्टादशावेणिकास्तु बुद्धधर्मा बलादयः ।
स्थानास्थाने दशज्ञानान्यष्टौ कर्मफले नव ।। २८ ।।
ध्यानाभ्यक्षाभिमोक्षेषु धातौ च प्रतिपत्सु तु ।
दश वा संवृतिज्ञानं द्वयोः षट् दश वा क्षये ।। २९ ।।

प्राङ्निवासच्युतोत्पादवलध्यानेषु शेषितम् ।
सर्वभूमिषु केनास्य वलमव्याहतं यतः ॥ ३० ॥
नारायणं वलं काये सन्धिष्वन्ये दशाधिकम् ।
हस्त्यादिसप्तकवलं स्प्रष्टव्यायतनं च तत् ॥ ३१ ॥
वैशारद्यं चतुर्धा तु यथाद्यदशमे वले ।
द्वितीयसप्तमे चैव स्मृतिप्रज्ञात्मकं त्रयम् ॥ ३२ ॥
महाकृपा संवृतिधीः सम्भाराकारगोचरैः ।
समत्वादाधिमात्र्याच्च नानाकरणमष्टधा ॥ ३३ ॥
सम्भारधर्मकायाभ्यां जगतश्चार्थचर्यया ।
समता सर्वबुद्धानां नायुर्जातिप्रमाणतः ॥ ३४ ॥
शिष्यसाधारणा अन्ये धर्माः केचित् पृथग्जनैः ।
अरणाप्रणिधिज्ञानप्रतिसंविद्गुणादयः ॥ ३५ ॥
संवृतिज्ञानमरणा, ध्यानेऽन्त्येऽकोप्यधर्मणः ।
नृजानुत्पन्नकामाप्तसवस्तुक्लेशगोचराः ॥ ३६ ॥
तथैव प्रणिधिज्ञानं सर्वलिम्बं तु तत् तथा ।
धर्मार्थयोर्निरुक्तौ च प्रतिभाने च संविदः ॥ ३७ ॥
तिस्रो नामार्थवाग्ज्ञानमविवर्त्यं यथाक्रमम् ।
चतुर्थी युक्तमुक्ताभिलापमार्गवशित्वयोः ॥ ३८ ॥
वाङ्मार्गालम्बना चासौ नव ज्ञानानि सर्वभूः ।
दश षड्वार्थसंवित् सा सर्वत्रान्ये तु सांवृतम् ॥ ३९ ॥
कामध्यानेषु धर्मे वित् वाचि प्रथमकामयोः ।
विकलाभिर्न तल्लाभी षडेते प्रान्तकोटिकाः ॥ ४० ॥
तत् षड्विधं ध्यानमन्त्यं सर्वभूम्यनुलोमितम् ।
वृद्धिकाष्ठागतं तच्च बुद्धान्यस्य प्रयोगजाः ॥ ४१ ॥

अशैक्ष्यन्त्या तदाख्ये द्वे तत्सन्तानसमुद्भवात् ।
इष्टे शैक्षस्य नोक्ते तु विद्ये साविद्यसन्ततेः ॥ ४६ ॥
आद्या तृतीया षष्ठी च प्रातिहार्याणि शासनम् ।
अग्र्यमव्यभिचारित्वाद्धितेष्टफलयोजनात् ॥ ४७ ॥
ऋद्धिः समाधिर्गमनं निर्माणं च गतिस्त्रिधा ।
शास्तुर्मनोजवान्येषां वाहिन्यप्याधिमोक्षिकी ॥ ४८ ॥
कामाप्तं निर्मितं वाह्यं चतुरायतनं द्विधा ।
रूपाप्तं द्वे तु निर्माणचित्तैस्तानि चतुर्दश ॥ ४९ ॥
यथाक्रमं ध्यानफलं द्वे यावत् पञ्च नोर्ध्वजम् ।
तल्लाभो ध्यानवत् शुद्धात् तत् स्वतश्च ततोऽपि ते ॥ ५० ॥
स्वभूमिकेन निर्माणं भाषणं त्वधरेण च ।
निर्मात्रैव सहाशास्तुरधिष्ठायान्यवर्तनात् ॥ ५१ ॥
मृतस्याप्यस्त्यधिष्ठानं नास्थिरस्यापरे तु न ।
आदावेकमनेकेन जितायां तु विपर्ययात् ॥ ५२ ॥
अव्याकृतं भावनाजं त्रिविधं तूपपत्तिजम् ।
ऋद्धिर्मन्त्रौषधाभ्यां च कर्मजा चेति पञ्चधा ॥ ५३ ॥
दिव्यश्रोत्राक्षिणी रूपप्रसादौ ध्यानभूमिकौ ।
सभागविकले नित्यं दूरसूक्ष्मादिगोचरे ॥ ५४ ॥
द्वित्रिसाहस्रकासंख्यदृशोऽर्हत्खड्गदैशिकाः ।
अन्यदप्युपपत्त्याप्तं तद्दृश्यो नान्तराभवः ॥ ५५ ॥
चेतोज्ञानं तु तत् त्रेधा तर्कविद्याकृतं च यत् ।
जानते नारका आदौ नृणां नोत्पत्तिलाभिकम् ॥ ५६ ॥

अष्टमं कोशस्थानम्

(समापत्तिनिर्देशः)

द्विधा ध्यानानि चत्वारि, प्रोक्तास्तदुपपत्तयः ।
समापत्तिः शुभैकाग्र्यं पञ्च स्कन्धास्तु सानुगम् ॥ १ ॥
विचारप्रीतिसुखवत् पूर्वपूर्वाङ्गवर्जितम् ।
तथारूप्याश्चतुःस्कन्धा अधोभूमिविवेकजाः ॥ २ ॥
विभूतरूपसंज्ञाख्याः सह सामन्तकैस्त्रिभिः ।
नारूप्ये रूपसद्भावः रूपोत्पत्तिस्तु चित्ततः ॥ ३ ॥
आकाशानन्त्यविज्ञानानन्त्याकिञ्चन्यसंज्ञकाः ।
तथाप्रयोगान्मान्द्यात्तु नसंज्ञानाप्यसंज्ञकः ॥ ४ ॥

सप्तास्वादनवच्छुद्धानास्रवाण्यष्टमं द्विधा ॥ ५ ॥
आस्वादनासम्प्रयुक्तं सतृष्णं लौकिकं शुभम् ।
शुद्धकं तत् तदास्वाद्यं लोकोत्तरमनास्रवम् ॥ ६ ॥
पञ्चाद्ये तर्कचारौ च प्रीतिसौख्यसमाश्रयः ।
प्रीत्यादयः प्रसादश्च द्वितीयेऽङ्गचतष्टयम् ॥ ७ ॥
तृतीये पञ्च तूपेक्षा स्मृतिः प्रज्ञा सुखं स्थितिः ।
चत्वार्यन्तेऽसुखादुःखोपेक्षास्मृतिसमाश्रयः ॥ ८ ॥
द्रव्यतो दश चैकं च प्रस्तव्विसुखमाद्ययोः ।
श्रद्धाप्रसादः प्रीतिस्तु सौमनस्यं द्विधागमात् ॥ ९ ॥
क्लिष्टेष्वसत्प्रीतिसुखं प्रसादः सम्प्रवीः स्मृतिः ।
उपेक्षा स्मृतिशुद्धिश्च केचित् प्रस्तव्युपेक्षणे ॥ १० ॥
अष्टापक्षालमुक्तत्वादानिञ्जं तु चतुर्थकम् ।
वितर्कचारौ श्वासौ च सुखादि च चतुष्टयम् ॥ ११ ॥
सौमनस्यसुखोपेक्षा उपेक्षासुमनस्कृते ।
सुखोपेक्षे उपेक्षा प्रविदो व्यानोपपत्तिषु ॥ १२ ॥
कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकं च यत् ।
द्वितीयादौ तदाद्याप्तमक्लिष्टाव्याकृतं च तत् ॥ १३ ॥
अतद्वान् लभते शुद्धं वैराग्येणोपपत्तितः ।
अनास्रवं तु वैराग्यात् क्लिष्टं हान्युपपत्तितः ॥ १४ ॥
तृतीयाद् यावदूर्ध्वोऽनास्रवानन्तरं शुभम् ।
उत्पद्यते तथा शुद्धात् क्लिष्टं चापि स्वभूमिकम् ॥ १५ ॥
क्लिष्टात् स्वं शुद्धकं क्लिष्टमेवं चावरशुद्धकम् ।
च्युतौ तु शुद्धकात् क्लिष्टं सर्वं क्लिष्टात्तु नोत्तरम् ॥ १६ ॥
चतुर्धा शुद्धकं हानभागीयादि यथाक्रमम् ।
क्लेशोत्पत्तिस्वभूम्यूर्ध्वानास्रवानुगुणं हि तत् ॥ १७ ॥
द्वे त्रीणि त्रीणि चैकं च हानभागाद्यनन्तरम् ।
गत्वागम्यं द्विधा भूमीरष्टाक्लिष्टैकलङ्घिताः ॥ १८ ॥
व्युत्क्रान्तकसमापत्तिविसभागतृतीयगा ।
स्वाधोभूम्याश्रया एव ध्यानरूप्या वृथाऽवरम् ॥ १९ ॥
आर्याकिञ्चन्यसाम्मुख्यात् भवाग्रे स्वान्ववस्थयः ।
सतृष्णाः स्वभवालम्बाः ध्यानं सद्विषयं शुभम् ॥ २० ॥

अशैक्ष्यन्त्या तदाख्ये द्वे तत्सन्तानसमुद्भवात् ।
इष्टे शैक्षस्य नोक्ते तु विद्ये साविद्यसन्ततेः ॥ ४६ ॥
आद्या तृतीया षष्ठी च प्रातिहार्याणि शासनम् ।
अग्र्यमव्यभिचारित्वाद्धितेष्टफलयोजनात् ॥ ४७ ॥
ऋद्धिः समाधिर्गमनं निर्माणं च गतिस्त्रिधा ।
शास्तुर्मनोजवान्येषां वाहिन्यप्याधिमोक्षिकी ॥ ४८ ॥
कामाप्तं निर्मितं वाह्यं चतुरायतनं द्विधा ।
रूपाप्तं द्वे तु निर्माणचित्तैस्तानि चतुर्दश ॥ ४९ ॥
यथाक्रमं ध्यानफलं द्वे यावत् पञ्च नोर्ध्वजम् ।
तल्लाभो ध्यानवत् शुद्धात् तत् स्वतश्च ततोऽपि ते ॥ ५० ॥
स्वभूमिकेन निर्माणं भाषणं त्वधरेण च ।
निर्मात्रैव सहाशास्तुरधिष्ठायान्यवर्तनात् ॥ ५१ ॥
मृतस्याप्यस्त्यधिष्ठानं नास्थिरस्यापरे तु न ।
आदावेकमनेकेन जितायां तु विपर्ययात् ॥ ५२ ॥
अव्याकृतं भावनाजं त्रिविधं तूपपत्तिजम् ।
ऋद्धिर्मन्त्रौषधाभ्यां च कर्मजा चेति पञ्चधा ॥ ५३ ॥
दिव्यश्रोत्राक्षिणी रूपप्रसादौ ध्यानभूमिकौ ।
सभागविकले नित्यं दूरसूक्ष्मादिगोचरे ॥ ५४ ॥
द्वित्रिसाहस्रकासंख्यदृशोऽर्हत्खड्गदैशिकाः ।
अन्यदप्युपपत्त्याप्तं तद्दृश्यो नान्तराभवः ॥ ५५ ॥
चेतोज्ञानं तु तत् त्रेधा तर्कविद्याकृतं च यत् ।
जानते नारका आदौ नृणां नोत्पत्तिलाभिकम् ॥ ५६ ॥

अष्टमं कोशस्थानम्

(समापत्तिनिर्देशः)

द्विधा ध्यानानि चत्वारि, प्रोक्तास्तदुपपत्तयः ।
समापत्तिः शुभैकाग्र्यं पञ्च स्कन्धास्तु सानुगम् ॥ १ ॥
विचारप्रीतिसुखवत् पूर्वपूर्वाङ्गवर्जितम् ।
तथारूप्याश्चतुःस्कन्धा अधोभूमिविवेकजाः ॥ २ ॥
विभूतरूपसंज्ञाख्याः सह सामन्तकैस्त्रिभिः ।
नारूप्ये रूपसद्भावः रूपोत्पत्तिस्तु चित्ततः ॥ ३ ॥
आकाशानन्त्यविज्ञानानन्त्याकिञ्चन्यसंज्ञकाः ।
तथाप्रयोगान्मान्द्यात्तु नसंज्ञानाप्यसंज्ञकः ॥ ४ ॥

इति मौलं समापत्तिद्रव्यमष्टविधं त्रिधा ।
सप्तास्वादनवच्छुद्धानास्रवाण्यष्टमं द्विधा ॥ ५ ॥
आस्वादनासम्प्रयुक्तं सतृष्णं लौकिकं शुभम् ।
शुद्धकं तत् तदास्वाद्यं लोकोत्तरमनास्रवम् ॥ ६ ॥
पञ्चाद्ये तर्कचारौ च प्रीतिसौख्यसमाधयः ।
प्रीत्यादयः प्रसादश्च द्वितीयेऽङ्गचतष्टयम् ॥ ७ ॥
तृतीये पञ्च तूपेक्षा स्मृतिः प्रज्ञा सुखं स्थितिः ।
चत्वार्यन्तेऽसुखादुःखोपेक्षास्मृतिसमावयः ॥ ८ ॥
द्रव्यतो दश चैकं च प्रस्रब्धिसुखमाद्ययोः ।
श्रद्धाप्रसादः प्रीतिस्तु सौमनस्यं द्विधागमात् ॥ ९ ॥
क्लिष्टेष्वसत्प्रीतिसुखं प्रसादः सम्प्रधीः स्मृतिः ।
उपेक्षा स्मृतिशुद्धिश्च केचित् प्रस्रब्ध्युपेक्षणे ॥ १० ॥
अष्टापक्षालमुक्तत्वादानिञ्जं तु चतुर्थकम् ।
वितर्कचारौ श्वासौ च सुखादि च चतुष्टयम् ॥ ११ ॥
सौमनस्यसुखोपेक्षा उपेक्षासुमनस्कृते ।
सुखोपेक्षे उपेक्षा प्रविदो व्यानोपपत्तिषु ॥ १२ ॥
कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकं च यत् ।
द्वितीयादौ तदाद्याप्तमक्लिष्टाव्याकृतं च तत् ॥ १३ ॥
अतद्वान् लभते शुद्धं वैराग्येणोपपत्तितः ।
अनास्रवं तु वैराग्यात् क्लिष्टं हान्युपपत्तितः ॥ १४ ॥
तृतीयाद् यावदूर्ध्वाधोऽनास्रवानन्तरं शुभम् ।
उत्पद्यते तथा शुद्धात् क्लिष्टं चापि स्वभूमिकम् ॥ १५ ॥
क्लिष्टात् स्वं शुद्धकं क्लिष्टमेवं चावरशुद्धकम् ।
च्युतौ तु शुद्धकात् क्लिष्टं सर्वं क्लिष्टात्तु नोत्तरम् ॥ १६ ॥
चतुर्धा शुद्धकं हानभागीयादि यथाक्रमम् ।
क्लेशोत्पत्तिस्वभूम्यूर्ध्वानास्रवानुगुणं हि तत् ॥ १७ ॥
द्वे त्रीणि त्रीणि चैकं च हानभागाद्यनन्तरम् ।
गत्वागम्यं द्विधा भूमीरष्टाकुष्टैकलङ्घिताः ॥ १८ ॥
व्युत्क्रान्तकसमापत्तिविसभागतृतीयगा ।
स्वाधोभूम्याश्रया एव व्यानरूप्या वृथाऽवरम् ॥ १९ ॥
आर्याकिञ्चन्यसाम्मुख्यात् भवाग्रे त्वास्रवक्षयः ।
सतृष्णाः स्वभवालम्बाः ध्यानं सद्विषयं शुभम् ॥ २० ॥

न मौलाः कुशलारूप्याः सास्रवाधरगोचराः ।
अनास्रवेण हीयन्ते क्लेशाः सामन्तकेन च ॥ २१ ॥
अष्टौ सामन्तकान्येषां शुद्धादुःखासुखानि हि ।
आर्यं चाद्यं त्रिधा केचित्, अतर्कं ध्यानमन्तरम् ॥ २२ ॥
त्रिधाऽदुःखासुखं तच्च महाब्रह्मफलं च तत् ।
सवितर्कविचारोऽधः समाधिः परतोऽद्वयः ॥ २३ ॥
आनिमित्तः समाकारैः शून्यतानात्मशून्यतः ।
प्रवर्ततेऽप्रणिहितः सत्याकारैरतः परैः ॥ २४ ॥
शुद्धामलाः, निर्मलास्तु ते विमोक्षमुखत्रयम् ।
शून्यताशून्यताद्याख्यास्त्रयोऽपरसमाधयः ॥ २५ ॥
आलम्बेते अशैक्षं द्वौ शून्यता चाप्यनित्यतः ।
अनिमित्तानिमित्तस्तु शान्ततोऽसङ्ख्यया क्षमम् ॥ २६ ॥
सास्रवा नृष्वकोप्यस्य सप्तसामन्तवर्जिताः ।
समाधिभावना ध्यानं शुभामाद्यं सुखाय हि ॥ २७ ॥
दर्शनाया क्ष्यभिज्ञेष्टा धीभेदाय प्रयोगजाः ।
वज्रोपमोऽन्त्ये यो ध्याने सास्रवक्षमभावना ॥ २८ ॥
अप्रमाणानि चत्वारि व्यापादादिविपक्षतः ।
मैत्र्यद्वेषोऽपि करुणा मुदिता सुमनस्कता ॥ २९ ॥
उपेक्षा लोभ आकारः सुखिता दुःखिता वत ।
मोदन्तामिति सत्त्वाश्च कामसत्त्वास्तु गोचरः ॥ ३० ॥
ध्यानयोर्मुदितान्यानि षट्सु केचित् तु पञ्चसु ।
न तैः प्रहाणं नृष्वेव जन्यन्ते त्र्यन्वितो ध्रुवम् ॥ ३१ ॥
अष्टौ विमोक्षाः प्रथमावशुभा ध्यानयोर्द्वयोः ।
तृतीयोऽन्त्ये स चालोभः शुभारूप्याः समाहिताः ॥ ३२ ॥
निरोधस्तु समापत्तिः सूक्ष्मसूक्ष्मादनन्तरम् ।
स्वशुद्धकाधारार्येण व्युत्थानं चेतसा ततः ॥ ३३ ॥
कामाप्तदृश्यविषया प्रथमा ये त्वरूपिणः ।
तेऽन्वयज्ञानपक्षोर्ध्वस्वभूदुःखादिगोचराः ॥ ३४ ॥
अभिभ्वायतनान्यष्टौ द्वयमाद्यविमोक्षवत् ।
द्वे द्वितीयवदन्यानि पुनः शुभविमोक्षवत् ॥ ३५ ॥
दश कृत्स्नान्यलोभोऽष्टौ ध्यानेऽन्त्ये गोचरः पुनः ।
कामा द्वे शुद्धकारूप्ये स्वचतुःस्कन्धगोचरे ॥ ३६ ॥

निरोध उक्तो वैराग्यप्रयोगाप्तं तु शोषितम्।
त्रिधात्वाश्रयसारूप्यसंज्ञं शेषं मनुष्यजम् ॥ ३७ ॥

हेतुकर्मबलाद् धात्वोरारूप्योत्पादनं द्वयोः।
ध्यानानां रूपधातौ तु ताभ्यां धर्मतयापि च ॥ ३८ ॥

सद्धर्मो द्विविधः शास्त्रागमाधिगमात्मकः।
धातारस्तस्य वक्तारः प्रतिपत्तार एव च ॥ ३९ ॥

काश्मीरवैभाषिकनीतिसिद्धः
प्रायो मयायं कथितोऽभिधर्मः।
यद् दुर्गृहीतं तदिहास्मदागः
सद्धर्मनीतौ मुनयः प्रमाणम् ॥ ४० ॥

निमीलते शास्तरि लोकचक्षुषि
क्षयं गते साक्षिजने च भूयसा।
अदृष्टतत्त्वैर्निरवग्रहैः कृतं
कुतार्किकैः शासनमेतदाकुलम् ॥ ४१ ॥

गते हि शान्तिं परमां स्वयम्भुवि
स्वयम्भुवः शासनधूर्धरेषु च।
जगत्यनाथे गणघातिभिर्मलैः
निरङ्कुशं स्वैरमिहाद्य चर्यते ॥ ४२ ॥

एवं कण्ठगतप्राणं विदित्वा शासनं मुने।
बलकालं मलानां च न प्रमाद्यं मुमुक्षुभिः ॥ ४३ ॥

—: o :—

ग्रन्थ-ग्रन्थकृतां सूची

मूले भाष्ये च व्याख्यायाम् आचार्याभ्यां स्मृता इह ।
ग्रन्था वा ग्रन्थकर्तारस्तेषां सूची प्रतायते ॥

अन्ये १०५६
अपरे १०३६, १०४०, १०४७, १०८१, १०६०, ११०५, १११६, ११२०, ११२७, ११५०, ११७३, ११७७
अभिधर्मः ११८७
आचार्यः (वसुवन्धुः) १०६२, १०६३, १११३
आचार्यसङ्घभद्रः १०६४, १०८०, १०८६, १११३
आभिधार्मिकाः १०४७
आर्यमहाकश्यपः १११६
आर्यशारद्वतीपुत्रादयः ११८७
आर्यशारिपुत्रः १०८८
एके १०४६, १०४७, १०५६
कपिलोलूकादयः ११८६, १२३२
काश्मीराः १०५६, १०८२, ११८६
केचित् ११४६, ११७३
पाणिनीयधातुपाठः १०५८
पाणिनीयसूत्रम् ११२६
पूर्वाचार्याः १०७१, ११४७
प्रकरणम् १११३
बहिर्देशकाः १०५६, ११८६
बाह्याभिधार्मिकाः १०८२
बुद्धः १०५०
बुद्धपुत्राः ११८७
बुद्धो भगवान् १०६६, १०८७
भगवद्विशेषः १११३, ११४८
भगवान् १०४६, १०६६, ११३७, ११५०
भदन्तानन्तवर्मा १०६३
मुनयः ११८७
योगाचारभूमिदर्शनम् ११४७
लाक्षणिकाः १२२८
वात्सीपुत्रीयाः ११८६
विभाषा ११४२
वृत्तिः (भाष्यम्) १०४८
वैभाषिकाः १०७१, १०८१, १०६२, ११०५, १११५, ११८५, ११८६
वैशेषिकाः १२२२
शास्त्रम् (त्रिपिटकम्) १०३६, १०४०, १०४३, १०४७, १०५०, १०५६, १०५६
साङ्ख्येयः १२०६
सूत्रम् १०४५, १०४६, १०५०, १०५१, १०५६, १०५८, १०६६, ११२७, ११३३, ११३४, ११४३, ११४४
सौत्रान्तिकाः ११४२, ११८५
स्तोत्रकारः ११८६
स्थविरराहुलः १२२२, १२३०
स्थविरो नागसेनः १२०६